# हेमचन्द्ररायकविभूषणः : तत्काव्यकृतेर्विश्लेषणात्मकं वीक्षणम्

यादवपुरविश्वविद्यालयस्य कलाविभागस्य
पिएइच्. डि. इत्युपाधिलाभाय प्रदत्तः शोधप्रबन्धः
जुलाइ, २०२१


गवेषकः प्रमितकुमारघोषः

निबन्धनसंख्या : A00SA1100216

शिक्षावर्षः : २०१६-१७

शोधनिर्देशिका

भूतपूर्वाध्यापिका डः. ऋताचट्टोपाध्याया

संस्कृतविभागः, यादवपुरविश्वविद्यालयः

कलिकाता - ७०००३२

# हेमचन्द्ररायकविभूषणः : तत्काव्यकृतेर्विश्लेषणात्मकं वीक्षणम्

यादवपुरविश्वविद्यालयस्य कलाविभागस्य

पिएइच्. डि. इत्युपाधिलाभाय प्रदत्तः शोधप्रबन्धः

जुलाइ, २०२१


**गवेषकः प्रमितकुमारघोषः**

**निबन्धनसंख्या : AOOSA1100216**

**शिक्षावर्षः : २०१६-१७**

**शोधनिर्देशिका**

**भूतपूर्वाध्यापिका डः. ऋताचट्टोपाध्याया**

**संस्कृतविभागः, यादवपुरविश्वविद्यालयः**

**कलिकाता - ७०००३२**

Certified that the Thesis entitled

हेमचन्द्ररायकविभूषणः : तत्काव्यकृतेर्विश्लेषणात्मकं वीक्षणम्

submitted by me for the award of the Degree of Doctor of Philosophy in Arts at Jadavpur University is based upon my work carried out under the Supervision of

PROF. DR. RITA CHATTOPADHYAY

And that neither this thesis nor any part of it has been submitted before for any degree or diploma anywhere / elsewhere.

Countersigned by the Supervisor :

Dated : 19/07/21

Prof. Dr. Rita Chattopadhyay
Ex Emeritus Fellow & Retd. Professor
Deptartment of Sanskrit
Jadavpur University
Kolkata 700032

Pranit Kumar Ghosh

Candidate :

Dated : 19/07/2021

# ❖ आभारप्रकटनम् ❖


कलिकातासंस्कृतमहाविद्यालये स्नातकोत्तरे द्वितीये वर्षे अध्यापिकायाः **अञ्जलिकामुखोपाध्यायायाः** सकाशाद् वङ्गीयाधुनिक-संस्कृत-साहित्येतिहासपठनकाले विषयेऽस्मिन् सातिशय आकृष्टोऽभवम् । ततः परं कलिकाताविश्वविद्यालये एम्. फिल्.-इति पाठक्रमस्य द्वितीये वर्षे **श्रद्धेयविद्युद्वरणघोषाचार्य्यस्य** उपदेशानुसारेण यादवपुरविश्वविद्यालयाधिष्ठितां ऋताचार्य्यां एम्.फिलस्य शोधनिर्देशिकारूपेण प्राप्तवान् । अधुना सैव आचार्या पि.एइच डि. इत्युपाधिलाभाय विहितस्य शोधकार्य्यस्यास्य निर्देशिका । पुनः विविधेषु प्रसङ्गेषु बहूनामाचार्याणां सकाशात् प्राप्ताः विविधोपदेशाः, ते यथा - स्वर्गीयः शिक्षकमहोदयो दुर्गाकुमारवन्द्योपाध्यायः, अध्यापकः सीतानाथाचार्य्यः, अध्यापकः प्रभुनाथद्विवेदीमहाभागः, अध्यापकः तारापदचक्रवर्तीमहाभागः, अध्यापिका रत्नावसुमहाभागा, अध्यापिका सुचित्रारायाचार्य्यमहाभागा, अध्यापकः अमितभट्टाचार्य्यमहाभागः, अध्यापिका पियालीप्रहराजमहाभागा, अध्यापिका शुक्तिचौधुरीमहाभागा, ड. देवदासमण्डलमहाभागः, ड. प्रतिमभट्टाचार्य्यमहाभागः, ड. स्वपनमाझिमहाभागः प्रमुखाः। अतः सर्वानेतानाचार्यान् प्रति तथा **विशेषतः आचार्यया अञ्जलिकामुखोपाध्यायया, विद्युद्वरणाचार्य्येण, पियालीप्रहराजमहाभागया च सह मे शोधनिर्देशिकां ऋताचार्य्यां** प्रत्यपि सातिशयम् आभारं प्रकटयामि ।

हेमचन्द्रस्य काव्यकृतीनां प्रतिलिपिसंग्रहणव्यापारे, आलोकचित्रसंग्रहणविषये च संस्कृतसाहित्यपरिषदिति ग्रन्थागारस्य कर्तृपक्षं प्रति, ग्रन्थागारानुजीविन् [ विशेषतो 'गौतम् रक्षित्' ('मिठु दा') इति महाशयम् ] प्रति आभारो ज्ञाप्यते मया ।

एतद्व्यतीत्य ड.देवव्रतमुखोपाध्यायमहोदयः, ड. धीरेन्द्रनाथवन्द्योपाध्यायमहोदयः, ड. कल्याणीवन्द्योपाध्याया, अध्यापिका ड. ईशानीनस्करमहोदया, ड. शिप्राचक्रवर्तीमहोदया, ड. शुभ्रजित्सेनमहोदयः, ड. सुकन्याभट्टाचार्या, श्रीसौम्यजित्सेनमहोदयः, श्रीपवनघोषमहोदयः, श्रीमतीभक्तिलतादासमहोदया, श्रीमती-अनुश्रितामण्डलमहाशया, ड. कृष्णादासमहोदया, श्रीमतीपारमिताराहामहाशया, ड. तन्मयकुमारपालमहोदयः, श्रीसञ्जीवमान्नामहोदयः, श्रीसौम्यघोषः, ड. रूप्सावन्द्योपाध्याया, श्रीमतीदेवदत्तावन्द्योपाध्याया, ड. प्रियावन्द्योपाध्याया, ड. पल्लवीमित्रमहोदया चेत्यादीन् विद्वज्जनान् प्रत्यपि आन्तरिकीं कृतज्ञतां मे ज्ञापयामिति ।

**विनीतः**

**प्रमितकुमारघोषः।**

# ॥ ॐ ॥ सर्वानुक्रमणिका ॥ ॐ ॥

**विषयाः** | **पृष्ठाङ्काः**


| विषयाः | पृष्ठाङ्काः |
|---|---|
| ❖ आभारप्रकटनम् | ... |
| ❖ आमुखम् | i-ii |
| ❖ मङ्गलाचरणम् | iii |
| ❖ समर्पणम् | iv |
| ❖ संकेतसूचिका | v-xi |
| ❖ प्रबन्धाध्यायानुसरणिका | xii-xiii |
| ❖ रेखाचित्राणां सूचिका | xiv |
| ❖ सारणीनां सूचिका | xv-xvii |
| ❖ चित्राणां सूचिका | xviii-xix |

# ❖ आमुखम् ❖

पिएइच्. डि. इत्युपाधिलाभाय शोधस्य विषयानुसन्धानावसरे संस्कृतसाहित्यपरिषदि विविधग्रन्थपाठकाले आकस्मिकतया उपलब्धानि हेमचन्द्ररायकविभूषणेन प्रणीतानि महाकाव्यानि, खण्डकाव्यानि तथा अन्यानि काव्यानीति ; यथा – 'परशुरामचरितम्', 'हैहयविजयम्', 'रुक्मिणीहरणम्', 'पाण्डवविजयम्', 'सत्यभामापरिग्रहम्' प्रभृतीनि । एतेषां काव्यानां नास्ति कापि टीका, पुनरेतेषां काव्यानामुपरि किमपि शोधकार्य्यं च नोपलभ्यते । केवलं संस्कृतसाहित्यपरिषदो मासिके मुखपत्रे एतेषु काव्यकृतिषु 'पाण्डवविजयमि'ति महाकाव्यस्य क्षितीशचन्द्रचट्टोपाध्यायकृतं पञ्चपृष्ठात्मकं समालोचनं प्राप्यते, समीक्षणस्यास्य सन्निवेशनमस्ति शोधप्रबन्धस्यास्य 'परिशिष्टम्' इत्यंशे चित्रसहयोगेन । परन्तु मनोहराणि काव्यानीमानि अपेक्षन्ते सम्यक् समीक्षणमिति ज्ञात्वा मे गवेषणाकार्यस्य शुभारम्भः कृतः शोधनिर्देशिकायाः सम्मतिक्रमेण । प्रायः वत्सरपञ्चकं यावत् क्षुद्रमत्यनुसारेण मे लिखितोऽयं गवेषणाप्रबन्धः **'हेमचन्द्ररायकविभूषणः : तत्काव्यकृतेर्विश्लेषणात्मकं वीक्षणम्'** इति । प्रबन्धस्यास्य प्रथमाध्यायात् प्रागेव महाकवेः हेमचन्द्ररायकविभूषणस्य मङ्गलाचरणरीतिं तथा ग्रन्थसमर्पणरीतिमनुसृत्य प्रथमे प्रबन्धस्यास्य विग्घविनाशाय विधीयते मङ्गलाचरणम्, ततः परं विधीयते प्रबन्धस्यास्य समर्पणम् । एतद्व्यतीत्य शोधप्रबन्धेऽस्मिन् संकेतानाम्, सारणीनाम्, रेखचित्राणाम्, चित्राणाञ्च सूचिकापि सन्निवेशिता ।

शोधप्रबन्धेऽस्मिन् विद्यते अध्यायचतुष्टयम् । तत्र प्रथमे अध्याये प्रथमे भागे ऊनविंशविंशैकविंशशतकेषु संस्कृतश्रव्यकाव्यधारायां वङ्गीयानामवदानं वर्णितमस्ति विषयगतदृष्ट्या, सारणीद्वारेण, रेखचित्रसहयोगेन च । अस्याध्यायस्य द्वितीये भागे हेमचन्द्रस्य सर्व्वेषां काव्यकृतीनां संक्षिप्तपरिचयः प्रदीयते ।

परन्तु आकृतिबाहुल्यवारणाय तत्रत्येषु काव्यकृतिषु केवलं महाकाव्यत्रयस्य [**'परशुरामचरितम्', 'हैहयविजयम्', 'पाण्डवविजयम्' चेति**] ; खण्डकाव्यत्रयस्य [**'सत्यभामापरिग्रहम्', 'दशावतारस्तोत्रम्', 'पतिदानव्रतम्' (संस्कृतानूदितं खण्डकाव्यम्) चेति**] च संक्षिप्तं समीक्षणमेव विधीयते शोधप्रबन्धेऽस्मिन् ।

उपर्युक्तस्य महाकाव्यत्रयस्य समीक्षणमस्ति द्वितीये अध्याये ; खण्डकाव्यत्रयस्य समीक्षणमस्ति तृतीयाध्यायस्य भागद्वितये, तत्र प्रथमे भागे सत्यभामापरिग्रहस्य, दशावतारस्तोत्रस्य च आलोचनमस्ति, द्वितीयभागे विद्यते पतिदानव्रतस्यालोचनम् । अस्माद् अध्यायद्वयादेवावगम्यते यद्, हेमचन्द्रस्य काव्यकृतिषु सनातनानि रामायण-महाभारत-पौराणिकवृत्तानि एव उपजीव्यत्वेन गृहीतानि । यतः तत्रैव विद्यते काव्यानाम् उत्सालोचनम्, प्रतिसर्गाख्यानकथनम्, महाकाव्यत्वादीनां विचारणम् । पुनः अध्यायद्वयेऽस्मिन् काव्यकृतिषु रसपरिवेशने,

छन्दोव्यवहारे, वृत्तविन्यासे, गुणरीतिवृत्त्यलंकारादीनां प्रयोगे कवेरस्य हेमचन्द्ररायस्य निपुणता, स्वकीयता चापि यथामतिरालोचिता जाता ।

शोधप्रबन्धोऽयमुपसंह्रियते भागचतुष्टयान्विते चतुर्थे अध्याये । अत्र कवेरस्य काव्यकृतिषु मङ्गलाचरणप्रक्रिया, रचनाशैल्यां सुप्राचीनानां भासकालिदासमाघादीनां कवीनां प्रभावः, रचनाशैलीमुपरि समकालिकानां पण्डितानामभिमतानि तथा ऐतिह्येन सह आधुनिकतायाः समन्वयोऽस्ति नास्ति वा इत्यस्य आलोचनमपि सन्निवेशितमस्ति । एतद्व्यतीत्य परिशिष्टस्य 'ख' इति विभागे हेमचन्द्रस्य काव्येषु उपलब्धानि सुभाषितान्यपि संयोजितानीति । अलमतिविस्तरेण ।

**इति**

**शोधप्रबन्धकर्त्ता**

**प्रमितकुमारघोषः।**

# ❖ मङ्गलाचरणम् ❖

ग्रन्थारम्भे महाकविना हेमचन्द्ररायकविभूषणेन विहिते मङ्गलाचरणे श्रीमाधवस्य स्तुतिः दृश्यते । तदेव मनसि निधाय विघ्नविनाशाय शोधप्रबन्धस्यास्य प्रारम्भात् प्रागेव विष्णोरवतारभूतस्य नृसिंहदेवस्य स्तुतिभूतं प्रसिद्धं श्लोकद्वयमिदमुद्धृत्य विधीयते मया मङ्गलाचरणम् –

उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥ वृहत्तन्त्रसारः ॥

स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः।
त्रायन्तां वो मधुरिपोः प्रपन्नार्त्तिच्छिदो नखाः॥ ध्वन्यालोकः ॥

# ❖ समर्पणम् ❖

**अत्र महाकवेः हेमचन्द्ररायकविभूषणस्य ग्रन्थसमर्पणरीतिं मनसि निधाय अनुसृत्य च विधीयते मया शोधप्रबन्धस्यास्य समर्पणम् –**

॥ शोधप्रबन्धोऽयं भगवति पाण्डवसखे वासुदेवेऽर्पितोऽस्तु ॥

# ❖ संकेतसूचिका ❖

- अ. - अध्यायः
- अग्नि.पु.(तर्करत्न.) - अग्निपुराणम्,सम्पा. पञ्चाननतर्करत्नः, नवभारत् पावलिशार्स्, १३८९ वङ्गाब्दः।
- अभि.श.(हरिदास.) - अभिज्ञानशकुन्तलम् (कालिदासप्रणीतम्), सम्पा. हरिदाससिद्धान्तवागीशः (अभिज्ञानकौमदीटीकोपेता), सिद्धान्त-विद्यालयः, १८८६ शकाब्दीयसौरभाद्रमासस्य त्रिंशत्तमदिवसः (तृतीयसंस्करणम्)।
- अष्टाध्य.(शास्त्री. पाण्डे.) - अष्टाध्यायी (पाणिनिप्रणीता) [चौखाम्बा-सुरभारती-ग्रन्थमाला १९] सम्पा. मम. पण्डितराज् ड. गोपाल् शास्त्री, प्रफेसर् गोपाल् दत्त् पाण्डे, चौखाम्बा सुर्-भारती प्रकाशन्, वारानसी, २०१५ खृ.।
- अ.सू. - अलङ्कारसूत्रम् (चन्द्रकान्ततर्कालंकारेण प्रणीतम्), मुद्रणकर्ता. उपेन्द्रनाथचक्रवर्ती, मुद्रणस्थलम्. दि स्यान्स्कृत् प्रेस्, कलिकाता, १८९९ खृ. (प्रथमसंस्करणम्)।
- आ.सं.का.बा.म.(चट्टो.) - आधुनिक् संस्कृत काव्य : बाङाली मनीषा [शतवर्षेर् आलोके], ऋता चट्टोपाद्याय्, संस्कृत पुस्तक् भाण्डार्, कल्काता, एप्रिल् २०१८ (प्रथम् प्रकाश्)।
- आ.सं.सा.(चट्टो.) - आधुनिक् संस्कृत साहित्य (१९१० - २०१०) छोटगल्प ओ नाटक्, ऋताचट्टोपाध्याय्, प्रग्रेसिभ् पावलिशार्स्, कलिकाता, एप्रिल् २०१२ (प्रथम् प्रकाश्)।
- आ.सं.सा.रू.(भट्टा.) - आधुनिक् संस्कृत साहित्येर् रूपरेखा, अमल् कुमार् भट्टाचार्य,

एम्. एल्. दे एण्ड् कों, कोल्काता, एप्रिल् २०१३ (प्रथम् प्रकाश)।

- एइच.सि.एस्.एल्.(कृष्णमा.) - हिस्टोरि अफ् क्लासिकाल् स्यांस्कृत् लिटारेचार्, एम्. कृष्णमाचारियार्, मोतिलाल् वनारसिदास्, माद्राज्, १९३७ खृ.।

- का.कृ. - काव्यकृतिः

- काव्य.प्र.(बाल.) - काव्यप्रकाशः (मम्मटभट्टेन प्रणीतः) , झलकीकारः (बालबोधिनी टीका), (संशोधितः) बनहट्टीत्युपाह्वयेन दशरथात्मजेन नारायणेन, परिमल् पब्लिकेशन्स्, दिल्ली, १९१७ खृ. (प्रथमसंस्करणम्), २००८ खृ. (पुनर्मुद्रितसंस्करणम्)।

- काव्याद.(चट्टो.) - काव्यादर्शः (श्रीदण्ड्याचार्य्यविरचितः), सम्पा. ड.चिन्मयी चट्टोपाध्याय, श्रीप्रेमचन्द्रतर्कवागीशकृतो मालिन्यप्रोञ्छनीटीकोपेतः, पश्चिमवङ्ग राज्य पुस्तक् पर्षत्, कलिकाता, डिसेम्बर् १९९५ खृ. (प्रथमसंस्करणम्)।

- काव्याद.(पाठक.) - काव्यादर्शः (दण्डिरचितः), सम्पा. ड. यमुनापाठकः, चौखाम्बा कृष्णदास् अकादेमी, २००५ खृ. (प्रथमसंस्करणम्)।

- काव्यालं.(शर्मा.) - काव्यालंकारः (भामहाचार्यकृतः), सम्पा. ड.रमणकुमारशर्मा, विद्यानिधिप्रकाशनम्, दिल्ली, २००८ खृ.।

- का.सू.वृ. (विद्याभूषण. विद्यारत्न.) - काव्यालङ्कारसूत्रवृत्तिः (श्रीवामनविरचिता, कामधेनुटीकोपेता) सम्पा. पण्डीत-श्रीआशुबोधविद्याभूषणः पण्डित-श्रीनित्यबोधविद्यारत्नश्च, कलिकाता, वाचस्पत्ययन्त्रे मुद्रिता, १९२२ खृ. (तृतीयसंस्करणम्)।

- का.सू.वृ.(सूरि.) - काव्यालंकारसूत्रवृत्तिः (वामनविरचिता), सम्पा. श्रीकृष्णसूरिः, श्रीवाणीविलास् प्रेस्, १९०९ खृ.।

- किरात.(भट्टाचार्य्य.) - किरातार्जुनीयम् (महाकविश्रीभारविवितचितम्) [श्रीमल्लिनाथकृतघण्टापथव्याख्यासमेतम्], सम्पा. प्रकाशकश्च जीवानन्दविद्यासागरभट्टाचार्य्यः, कलिकाता, मुद्रितम्. सिद्धेश्वरयन्त्रे, १९०५ खृ. (षष्ठसंस्करणम्)।

- किरात.(विद्यानिधि.) - किरातार्ज्जुनीयम् (भारविप्रणीतम्), सम्पा. गुरुनाथविद्यानिधिभट्टाचार्य्यः, (संशोधकः) गोविन्दचन्द्रकाव्यतीर्थपुराणशास्त्री, जानकीनाथकाव्य-तीर्थ एन्ड् ब्रस्. छात्रपुस्तकालयः, कलिकाता, १३४३ वङ्गाब्दः, दोलयात्रायाम्।

- क्र.सं. - क्रमिकसंख्या

- ख.का. - खण्डकाव्यम्

- खृ. - खृष्टाब्दः

- गीत.गो.(आचार्य्य.) - गीतगोविन्दम् (महाकविश्रीजयदेवविरचितम्) सम्पा. नारायणराम-आचार्यकाव्यतीर्थः, निर्णयसागरमुद्रणालयम्, मुंबई, १९४९ खृ. (नवमं संस्करणम्)।

- गीत.गो.(कालिप्रसन्न.) - श्री श्री गीतगोविन्दम् (जयदेवप्रणीतम्) सम्पा. कालिप्रसन्नविद्यारत्नः, श्रीपूजारिगोस्वामीविरचितया टीकया समेतम्, कलिकाता, वसुमतीयन्त्रे, १३१५ वङ्गाब्दः।

- छन्दो.म.(शिरोमणि.) - छन्दोमञ्जरी (वैद्यश्रीगङ्गादाससूरिविरचिता), सम्पा. रामतारणशिरोमणिः (मञ्जरीविवृतिटीका), कलिकाता, सरस्वतीयन्त्रे मुद्रिता, १८९१ खृ.।

- ज.स्था. - जन्मस्थानम्

- दश.रू.(परब.) - दशरूपकम् (श्रीधनंजयविरचितम्) सम्पा. काशीनाथपाण्डुरङ्गपरबः, (धनिककृतयावलोकाख्यया व्याखया समेतम्) निर्णय् सागर् प्रेस्, मुम्बई, शाके १८१९ वत्सरे (प्रथमसंस्करणम्)।

- दश.रू.(वेङ्कट.) - दशरूपकम् (धनञ्जयकृतम्), भट्टनृसिंहकृतलघुटीकासहितया धनिककृतयावलोकाख्यया व्याख्यया समेतम् (दि अड्यार लाइब्रेरि सीरीज, भल.९७), सम्पा. टि. वेङ्कटाचार्यः, ‘दि

अड्यार् लाइब्रेरि एन्ड् रिसार्च् सेन्टार्’, अड्यार्, माद्राज्, १९६९ खृ.।

- दश.स्तो. - दशावतारस्तोत्रम्
- दाश.पाँ.(चक्रवर्ती.) - दाशरथि रायेर् पाँचाली, सम्पा. श्रीहरिपद चक्रवर्ती, कलिकाता विश्वविद्यालय, १९६२ (प्रथमसंस्करणम्)।
- द्वि.सं. - द्वितीयसंस्करणम्
- ध्वन्या.(मूर्थि.) - ध्वन्यालोकः (आनन्दवर्धनप्रणीतः), सम्पा. ड. के. कृष्णमूर्थि, (फरोवार्डकर्ता) ड. के.आर्.श्रीनिवास् आयेङ्गार्, मोतिलाल् वनारसिदास्, दिल्ली, १९८२ खृ. (द्वितीयसंस्करणम्)।
- ना.शा.(बन्द्यो.) - नाट्यशास्त्रम् (भरताचार्यप्रणीतम्) प्रथमखण्डः, सम्पा. ड. सुरेशचन्द्रवन्द्योपाध्यायः, नवपत्रप्रकाशन्, कलिकाता, मार्च् १९८० खृ.।
- नि.स्था. - निवासस्थानम्
- पति.व्र. - पतिदानव्रतम्
- परशु.च.(प्र.सं.) - परशुरामचरितम् (हेमचन्द्ररायप्रणीतम्), हेमकुटी, पावना, १९०४ खृ. (प्रथमसंस्करणम्)।
- परि. - परिशिष्टम्
- पा.वि.(प्र.सं.) - पाण्डवविजयम् (हेमचन्द्ररायप्रणीतम्), हेमकुटी, पावना, १९१६ खृ. (प्रथमसंस्करणम्)।
- पा.वि.(द्वि.सं.) - पाण्डवविजयम् (हेमचन्द्ररायप्रणीतम्), हेमकुटी, पावना, १९३० खृ. (द्वितीयसंस्करणम्)।

- प्र.का. - प्रकाशकालः
- प्र.स्था. - प्रकाशस्थानम्
- प्र.सं. - प्रथमसंस्करणम्
- भा. - भागः
- म.का. - महाकाव्यम्
- मत्स्य.पु.(तर्करत्न.) - मत्स्यपुराणम् (महर्षिकृष्णद्वैपायनवेदव्यासप्रणीतम्) सम्पा. श्रीयुक्तपञ्चाननतर्करत्नः, श्रीनटवरचक्रवर्तिना मुद्रितं प्रकाशितञ्च, कलिकाता, १३१६ वङ्गाब्दः (प्रथमसंस्करणम्)।
- मम. - महामहोपाध्यायः
- मर्म. - मर्मोद्घाटनम्
- महा.आदि.(हरिदास.) - महाभारतम्, आदिपर्व्व १ (महर्षिकृष्णद्वैपायनवेदव्यासप्रणीतम्), सम्पा. हरिदाससिद्धान्तवागीशः, विश्ववाणी प्रकाशनी, कलिकाता, प्रथम् प्रकाश् १३३८ वङ्गाब्द्, १३६६ वङ्गाब्द (द्वितीय संस्करण्)।
- महा.सौप्तिक.(हरिदास.) - महाभारतम् (महर्षिकृष्णद्वैपायनवेदव्यासप्रणीतम्) सौप्तिकपर्व्व, सम्पा. हरिदास-सिद्धान्तवागीशभट्टाचार्य्यः, सिद्धान्तविद्यालयः, कलिकाता, १३४७ वङ्गाब्दः ।
- र.का. - रचनाकालः
- रघु.(पाण्डुरङ्ग.) - रघुवंशम् (कालिदासप्रणीतम्), सम्पा. काशीनाथपाण्डुरङ्गपरबः, दि निर्णयसागर् प्रेस्, बम्बे, १८८६ खृ. (तृतीयसंस्करणम्)।
- रवि. रचना. - रवीन्द्र रचनावली, विश्वभारती, कलिकाता, १३९३ वङ्गाब्द (प्रथम् संस्करण्)।

- रुक्मिणी.ह.(प्र.सं.) - रुक्मिणीहरणम् (हेमचन्द्ररायप्रणीतम्), हेमकुटी, पावना, १९१० खृ. (प्रथमसंस्करणम्)।

- रुक्मिणी.ह.(द्वि.सं.) - रुक्मिणीहरणम् (हेमचन्द्ररायप्रणीतम्), हेमकुटी, पावना, श्रावणमासि, १३३७ वङ्गाब्दः (द्वितीयसंस्करणम्)।

- व. - वङ्गाब्दः

- व.जी.(दे.) - वक्रोक्तिजीवितम् (कुन्तकविरचितम्), सम्पा. श्रीसुशीलकुमार् दे, कलिकाता, १९६२ खृ. (तृतीयसंस्करणम्)।

- व.जी.(मूर्थि.) - वक्रोक्तिजीवितम् (कुन्तकविरचितम्), सम्पा. ड. के. कृष्णमूर्थि, कर्णाटकविश्वविद्यालयः, धार्वाड्, १९७७ खृ. (प्रथमसंस्करणम्)।

- वि.सि.एस्.एल्.(दत्त.) - वेङ्गलस् कनट्रिबिउसन् टु स्यांस्कृत् लिटारेचार्, कालिकुमारदत्तशास्त्री, संस्कृतकलेज्, कलिकाता, १९७४ खृ.।

- वैया.सि.कौ. (चतुर्वेद. विद्याभास्कर.) - वैयाकरणसिद्धान्तकौमुदी (श्रीमद्भट्टोजिदीक्षितविरचिता) [द्वितीयो भागः] सम्पा. गिरिधरशर्मा चतुर्वेदः परमेश्वरानन्दशर्मा विद्याभास्करः, मोतिलाल् बनारसीदास्, दिल्ली, पुनर्मुद्रणम् २०१० खृ.।

- शाक. - शकाब्दः

- शिशु.व.(दुर्गाप्रसाद. शिवदत्त.) - शिशुपालवधम् (श्रीदत्तकसूनुमहाकविश्रीमाघप्रणीतम्) [मल्लिनाथप्रणीतं सर्वंकषाटीकोपेतम्] सम्पा. पण्डितदुर्गाप्रसादः पण्डितशिवदत्तश्च, निर्णयसागरयन्त्रालये, मुम्बई, १९०५ खृ. (चतुर्थसंस्करणम्)।

- शिशु.व.(हरिदास.) - शिशुपालवधम् (माघप्रणीतम्), (सम्पा) हरिदाससिद्धान्त-वागीशभट्टाचार्य्यः, नकीपुरहरिचरणचतुष्पाठी, १८४७ शकाब्दीयसौराग्रहायनस्य प्रथमदिवसः।

- श्लो.सं. - श्लोकसंख्या
- सत्य.प.(प्र.सं.) - सत्यभामापरिग्रहम् (हेमचन्द्ररायप्रणीतम्), हेमकुटी, पावना, १९१३ खृ. (प्रथमसंस्करणम्)।
- सत्य.प.(द्वि.सं.) - सत्यभामापरिग्रहम् (हेमचन्द्ररायप्रणीतम्), हेमकुटी, पावना, १९३२ खृ. (द्वितीयसंस्करणम्)।
- सम्पा. - सम्पादकः
- स.सं. - सर्गसंख्या
- स्वप्न.(गणपति.) - स्वप्नवासवदत्तम् (भासप्रणीतम्), सम्पा. टि. गणपतिशास्त्री, दि त्रावाङ्कर् गभर्मेन्ट् प्रेस्, त्रिवान्द्राम्, १९१२ खृ. (प्रथमसंस्करणम्)।
- सं.का.बा.(मुखार्जी.) - संस्कृत काव्यचर्चाय् बाङाली : सेकाल् ओ एकाल्, अञ्जलिका मुखार्जी, संस्कृत पुस्तक् भाण्डार्, कोल्काता, २०१३ खृ. (प्रथम् संस्करण्)।
- सं.सा.प.प. - संस्कृतसाहित्यपरिषत्पत्रिका
- सा.द.(हरिदास.) - साहित्यदर्पणः (श्रीमद्विश्वनाथकविराजप्रणीतः), सम्पा. हरिदाससिद्धान्तवागीशः (कुसुमप्रतिमाटीका), संस्कृत वुक् डिपो प्राः लिः, १९८१ खृ. (पञ्चमसंस्करणम्)।
- हेम. - हेमचन्द्ररायकविभूषणः
- हैहय.वि.(प्र.सं.) - हैहयविजयम् (हेमचन्द्ररायप्रणीतम्), हेमकुटी, पावना, १९०९ खृ. (प्रथमसंस्करणम्)।

# ❖ प्रबन्धाध्यायानुसरणिका ❖


| अध्यायाः | | पृष्ठाङ्काः |
|---|---|---|
| १. प्रथमोऽध्यायः : | अवतरणम् | १-३६ |
| १.१. प्रथमो भागः : | संस्कृतश्रव्यकाव्येतिहासे वङ्गीया मनीषा (ऊनविंशविंशैकविंशशतकेषु) | |
| १.२. द्वितीयो भागः : | हेमचन्द्ररायकविभूषणः(१८८२खृः) : संक्षिप्ता परिचितिः | |
| २. द्वितीयोऽध्यायः : | हेमचन्द्रप्रणीतानि महाकाव्यानि (संक्षिप्तं समीक्षणम्) | ३७-११७ |
| ३. तृतीयोऽध्यायः : | हेमचन्द्रप्रणीतानि खण्डकाव्यानि (संक्षिप्तं समीक्षणम्) | ११८-१८४ |
| ३.१. प्रथमो भागः : | सत्यभामापरिग्रहम् ; दशावतारस्तोत्रञ्च | |
| ३.२. द्वितीयो भागः : | संस्कृतानूदितं खण्डकाव्यम् : पतिदानव्रतम् | |
| ४. चतुर्थोऽध्यायः : | उपसंहृतिः | १८५-२१६ |
| ४.१. प्रथमो भागः : | हेमचन्द्रस्य काव्यकृतिषु मङ्गलाचरणविमर्षणम् | |
| ४.२. द्वितीयो भागः : | हेमचन्द्रस्य काव्यकृतिषु सुप्राचीनानां कवीनां प्रभावः | |

**४.३. तृतीयो भागः :** समकालिकैः पण्डितवर्यैः विहिता हेमचन्द्रस्य काव्यकृतेः समालोचना

**४.४. चतुर्थो भागः :** ऐतिह्य-आधुनिकतयोः समन्वयः

✠ **परिशिष्टम्** **२१७-२२७**

(क) हेमचन्द्ररायप्रणीतेषु काव्येषु सुभाषितानि

(ख) पाण्डवविजयम् [क्षितीशचन्द्रचट्टोपाध्यायकृतं समीक्षणम्] आलोकचित्रसहयोगेनैव सन्निवेशितम्

✠ **परिशीलिता ग्रन्थानुक्रमणी** **२२८-२४२**

# ❖ रेखचित्राणां सूचिका ❖

| रेखचित्रम् | पृष्ठाङ्काः |
|---|---|
| १.१ : कथावस्तुनो वैभिन्न्यानुसारेण महाकाव्यभेदाः | ४ |
| १.२ : खण्डकाव्यभेदाः | ८ |
| १.३ : स्तोत्रात्मककाव्यानां विभागः | १० |
| १.४ : हेमचन्द्ररायकविभूषणस्य सारस्वतसाधना | १४ |
| ३.१ : संस्कृतानूदितसाहित्यस्य विभागाः | १६७ |

## ❖ सारणीनां सूचिका ❖


| सारणी | पृष्ठाङ्काः |
|---|---|
| १.१ : रामायणाश्रितानि महाकाव्यानि | ५ |
| १.२ : महाभारताश्रितानि महाकाव्यानि | ५-७ |
| १.३ : खण्डकाव्यानि ('विविधानि' इति विभागतानि) | ८-९ |
| १.४ : स्तोत्र-स्तव-स्तुतयः | ११ |
| १.५ : हैहयविजयस्य चरित्राणि | १७ |
| १.६ : परशुरामचरितस्य प्रचीनत्वनिरूपणम् | २० |
| १.७ : परशुरामचरितस्य चरित्राणि | २० |
| १.८ : रुक्मिणीहरणस्य संस्करणद्वयस्य सर्गाः श्लोकाश्च | २३ |
| १.९ : रुक्मिणीहरणस्य चरित्राणि | २४ |
| १.१० : पाण्डवविजयस्य स.सं, श्लो.सं. | २८ |
| १.११ : पाण्डवविजयस्य चरित्राणि | २८-२९ |
| १.१२ : सत्यभामापरिग्रहस्य संस्करणद्वयस्य सर्गाः, श्लोकाश्च | ३२ |
| १.१३ : सत्यभामापरिग्रहस्य चरित्राणि | ३३ |
| १.१४ : पतिदानव्रतस्य चरित्राणि | ३४ |
| १. १५ : युद्धानि, राजद्रोहाश्च (स.का. १९०४-१६ खृ.) | ३६ |
| २.१ : परशुरामचरितस्य स.सं., श्लो.सं. | ५५ |

२.२ : हैहयविजयस्य स.सं., श्लो.सं. ५६

२.३ : पाण्डवविजयस्य स.सं., श्लो.सं. ५६

२.४ : गौणलक्षणान्वितानि स्थानानि (परशु.च.) १०२-१०३

२.५ : गौणलक्षणान्वितानि स्थानानि (हैहय.वि.) १०४

२.६ : गौणलक्षणान्वितानि स्थानानि (पा.वि.) १०५

३.१ : अङ्गरसानां स्थानानि (सत्य.प.) १३३

३.२ : पञ्चसन्धयः (सत्य.प.) १३४

३.३ : वृत्तविधानम् (सत्य.प.) १३७

३.४ : सर्गान्तविधानम् (सत्य.प.) १३७-१३८

३.५ : सर्गनामविधानम् (सत्य.प.) १३८-१३९

३.६ : गौणलक्षणान्वितानि स्थानानि (सत्य.प.) १३९-१४०

३.७ : अर्थालंकाराः (सत्य.प.) १५६

३.८ : वङ्गभाषातोऽनूदितानि रवीन्द्रेतराणि पद्यानि १६८

३.९ : भाषान्तरेभ्योऽनूदितानि रवीन्द्रेतराणि पद्यानि १६९

३.१० : वङ्गभाषातोऽनूदितानि रवीन्द्रेतराणि गद्यानि १६९

३.११ : संस्कृतानूदितानि वैदेशिकपद्यानि १७०

३.१२ : संस्कृतानूदितानि वैदेशिकगद्यानि १७०

३.१३ : पतिदानव्रते भावानुवादस्य निदर्शनम् १८१

३.१४ : पतिदानव्रते भावानुवादस्य निदर्शनम् १८२

३.१५ : पतिदानव्रते आक्षरिकानुवादस्य निदर्शनम् १८३

४.१ : हेमचन्द्ररायकृतेषु मङ्गलाचरणेषु श्लो.सं., वृत्तानि च १८७

४.२ : हेमचन्द्रकृतेषु मङ्गलाचरणेषु श्लोकानां पुनरावृत्तिः २०१

४.३ : सादृश्यम् (परशु.च., रघु. चेत्यनयोः) २०२

४.४ : सादृश्यम् (परशु.च. इत्यनेन सह रघु., स्वप्न., अभि.श. चेत्येतेषाम्) २०३

४.५ : सादृश्यम् (पा.वि., किरात. चेत्यनयोः) २०४

४.६ : सादृश्यम् (सत्य.प. इत्यनेन सह किरात., शिशु.व. चेत्यनयोः) २०५

४.७ : सादृश्यम् (सत्य.प., किरात. चेत्यनयोः) २०५

४.८ : सादृश्यम् (सत्य.प., किरात. चेत्यनयोः) २०६

४.९ : सादृश्यम् (सत्य.प., अभि.श. चेत्यनयोः) २०६

# ❖ चित्राणां सूचिका ❖


| चित्रम् | पृष्ठाङ्काः |
|---|---|
| १.१ : श्रीसूर्य्यकान्ततर्कतीर्थशास्त्रिणः पत्रम् | १२ |
| १.२ : आख्यापत्रम्, हैहय.वि.(प्र.सं.) | १५ |
| १.३ : आख्यापत्रम्, परशु.च.(प्र.सं.) | १८ |
| १.४ : हेमचन्द्ररायेण प्रेरितमुपहारपत्रम् | १९ |
| १.५ : आख्यापत्रम्, रुक्मिणी.ह.(प्र.सं.) | २१ |
| १.६ : आख्यापत्रम्, रुक्मिणी.ह.(द्वि.सं.) | २२ |
| १.७ : आख्यापत्रम्, पा.वि.(प्र.सं.) | २५ |
| १.८ : आख्यापत्रम्, पा.वि.(द्वि.सं.) | २६ |
| १.९ : आख्यापत्रम्, सत्य.प.(प्र.सं.) | ३० |
| १.१० : आख्यापत्रम्, सत्य.प.(द्वि.सं.) | ३१ |
| ४.१ : कार्ल् स्किमथ् महोदयस्य उक्तिः | २०७ |
| परि.१ : आख्यापत्रम् (सं.सा.प.प. Vol. XIII) | २१८ |
| परि.२ : सूचीपत्रम् (सं.सा.प.प. Vol. XIII) | २१९ |
| परि.३ : सं.सा.प.प. १३'शाब्दस्य १०म-संख्यायाम् पत्राङ्कम् ३३५ | २२० |
| परि.४ : सं.सा.प.प. १३'शाब्दस्य १०म-संख्यायाम् पत्राङ्कम् ३३६ | २२१ |
| परि.५ : सं.सा.प.प. १३'शाब्दस्य १०म-संख्यायाम् पत्राङ्कम् ३३७ | २२२ |

परि.६ : सं.सा.प.प. १३’शाब्दस्य १०म-संख्यायाम् पत्राङ्कम् ३३८ २२३

परि.७ : सं.सा.प.प. १३’शाब्दस्य १०म-संख्यायाम् पत्राङ्कम् ३३९ २२४

परि.८ : सं.सा.प.प. १३’शाब्दस्य १०म-संख्यायाम् पत्राङ्कम् ३४० २२५

# ✠ प्रथमोऽध्यायः ✠

## ॥ अवतरणम् ॥

प्रथमो भागः : संस्कृतश्रव्यकाव्येतिहासे वङ्गीया मनीषा

(ऊनविंशविंशैकविंशशतकेषु)

द्वितीयो भागः : हेमचन्द्ररायकविभूषणः(१८८२ खृः) : संक्षिप्ता परिचितिः

शोधस्यास्य विषयानुसन्धानावसरे संस्कृतसाहित्यपरिषदि विविधग्रन्थपाठकाले आकस्मिकतया उपलब्धानि हेमचन्द्ररायकविभूषणेन प्रणीतानि महाकाव्यानि, खण्डकाव्यानि तथा अन्यानि काव्यानीति ; यथा - 'परशुरामचरितम्', 'हैहयविजयम्', 'रुक्मिणीहरणम्', 'पाण्डवविजयम्', 'सत्यभामापरिग्रहम्' प्रभृतीनि । एतेषां काव्यानां नास्ति कापि टीका व्याख्या भाषान्तरो वा । पुनरेतेषां काव्यानामुपरि किमपि विस्तृतं शोधकार्य्यमपि नोपलभ्यते । परन्तु मनोहराणि काव्यानीमानि अपेक्षन्ते सम्यक् समीक्षणम् । एतद्व्यतीत्य हेमचन्द्रस्य काव्यानां विषये विद्वज्जनानां यानि अभिमतानि प्राप्यन्ते तेषु -

वेलुडमठस्य दर्शनशास्त्राध्यापकस्य महामहोपाध्यायरामकृष्णतर्कतीर्थस्य अभिमतम् "आपनार् पाण्डवविजय् महाकाव्यखानि पाठ् करिया अत्यन्त प्रीत हइलाम् । इहाते भावेर् सुविन्यास्, भाषार् पारिपाट्य प्रभृति सद्गुणावलि सम्यक् संयोजित देखिया प्रचीन् महाकविगणेर् कथा मने पडे।"[१],

ओडिशान्तर्गतात् कटकात् प्रकाशितायां वैतरणीति गवेषणापत्रिकायां (जानुयारी १९३१) रुक्मिणीहरणस्योपरि विहितं पर्य्यवेक्षणम् "Rukminiharanam (Sanskrit) By Sri Hem Chandra Ray M.A., Kavibhusan, Hemkuti, Pabna (Bengal),Price Rupee one only. The author writes with a facile pen. His poetry has the charm of ease and flow. This book may be made an additional book for Kavyatirtha students for extra reading. We admire the author."[२],

महामहोपाध्यायस्य कविराजस्य गणनाथसेनसरस्वतीमहाभागस्याभिमतम् "I thank you for your present of a copy of your revised edition of 'Pandavavijayam'. It is an excellent 'Mahakavya' and ought to be made a text-book. I have already said how much I like your writings and have always admired them."[३] चेति अभिमतत्रयं दृष्ट्वा मन्ये यद्, एतेषां विद्वज्जनानाम् अभिमतं प्रति श्रद्धाप्रदर्शनमवश्यकर्त्तव्यम् । तत्कर्त्तव्यपालनाय एव हेमचन्द्रस्य काव्यकृतिषु कतिपयान् आधारीकृत्यैव शोधकार्य्यमिदम् क्रियते । एतेन वर्तमानकालीनाः सुधीजनाः यदि हेमचन्द्रस्य काव्यकृतिषु आकृष्टाः सन्तः तर्हि शोधकार्य्यमिदं सार्थकं भविष्यतीति मन्ये ।

अधुना अस्मिन्नेवाध्याये विद्यते भागद्वयम् । तत्र प्रथमे भागे ऊनविंशादिषु शतकेषु संस्कृतश्रव्यकाव्येषु वङ्गीयानामवदानमेव आलोच्यते अतीव संक्षेपेन ; ततः परं द्वितीये भागे हेमचन्द्ररायकविभूषणस्य व्यक्तिगतजीवनं, सारस्वतसाधनायाः वर्णनञ्च सन्निवेशितमस्तीति ।

---

[१] सत्य.प.(द्वि.सं.) पृष्ठे iii

[२] तत्रैव. पृष्ठे v

[३] तत्रैव. तत्पृष्ठे

## १.१. प्रथमो भागः : संस्कृत-श्रव्यकाव्येतिहासे वङ्गीया मनीषा (ऊनविंशविंशैकविंशशतकेषु)


संस्कृतसाहित्यस्य विविधासु शाखासु वङ्गभूमेरवदानमतीव तात्पर्यपूर्णं गौरवावहञ्च । वङ्गीयकवीनां लेखनीतः दृश्यकाव्य-श्रव्यकाव्य-चम्पूकाव्य-प्रभृतीनि विविधानि काव्यानि निःसृतानि । प्राचीनकालतः एकविंशशताब्दीं यावत् संस्कृतकाव्यसंसदि वङ्गीयप्रतिभायाः अवदानं तु अम्लानमेव । निखिले संस्कृतसाहित्यसम्भारे नैकानि श्रव्यकाव्यानि विलसितानि । समेषां तेषां नामोल्लेखो न विहितोऽस्मिन्नध्याये आकारवैपुल्यवारणत्वात् । अतस्तेषु केवलं ऊनविंश-विंशै-कविंशशतकेषु वङ्गीयैः पण्डितैः प्रणीतानां श्रव्यकाव्यानां वर्णनमेवात्र विहितमस्ति समासेन -

### महाकाव्यानि[१]

ऊनविंशविंशैकविंशशतकेषु संस्कृतसाहित्येतिहासे वङ्गीयैः पण्डितैः नैकानि महाकाव्यानि प्रणीतानि । तेषु कथावस्तुनो वैभिन्न्यत्वात् वैचित्र्यपूर्णानि बहुन्येव महाकाव्यानि दरीदृश्यन्ते ।

अतः अधुना कथावस्तुनो भेदान् आश्रित्य महाकाव्यानि प्राथम्येन द्विधा विभज्यते, यथा - आर्षवृत्तान्ताश्रितं महाकाव्यम्, चरिताश्रितं महाकाव्यञ्चेति ; आर्षवृत्तान्ताश्रितं महाकाव्यमपि पुनः त्रैविध्यं धत्ते, यथा - रामायणाश्रितम्, महाभारताश्रितम्, पुराणवृत्ताश्रितञ्चेति ; अथ चरिताश्रितं महाकाव्यं तु प्राधान्येन द्विविधम्, यथा - मानवचरिताश्रितम्, देवचरिताश्रितञ्चेति ; तत्र च मानवचरिताश्रितानि महाकाव्यानि द्विधा विभज्यन्ते, यथा - महापुरुषचरिताश्रितम्, राजचरिताश्रितञ्चेति ; अन्ततः राजचरिताश्रितानि विरचनानि द्विविधानि, यथा - वैदेशिकराजचरिताश्रितानि, देशीयराजचरिताश्रितानि चेति -

[१] एइच.सि.एस्.एल्.(कृष्णमा.) ; वि.सि.एस्.एल्.(दत्त.) पृष्ठेषु ४२-४५ ; आ.सं.सा.रू.(भट्टा.) ; सं.का.बा.(मुखार्जी.) ; आ.सं.का.बा.म.(चट्टो.) पृष्ठे १३-३९




रेखचित्रम् १.१ : कथावस्तुनो वैभिन्न्यानुसारेण महाकाव्यभेदाः

उपर्युक्तेषु विभागेषु केवलं **आर्षवृत्तान्ताश्रितानां महाकाव्यानां विशेषतो रामायणाश्रितानां महाभारताश्रितानां च महाकाव्यानाम्** उदाहरणानि एव अधस्तादुपस्थाप्यन्ते महाकवीनां कालक्रमानुसारेण, **यतः अस्मिन्नेव विभागद्वये आपतन्ति हेमचन्द्ररायकविभूषणस्य महाकाव्यानि** -

## आर्षवृत्तान्ताश्रितानि महाकाव्यानि

### *रामायणाश्रितानि*

| क्र.सं | महाकविः | महाकाव्यनाम | संक्षिप्ता वर्णना | | |
|---|---|---|---|---|---|
| | | | प्र.का., प्र.स्था. | स.सं. | विषयः |
| १. | **अन्नदाचरणतर्कचुडामणिः** (जन्म - १८६२ खृ., ज.स्था. नोयाखालीति मण्डले सोमापारा इति ग्रामः पिता- कालीकिङ्करठाकुरः) | रामाभ्युदयम् | - | - | रामायणीयवृत्तान्तः। |
| २. | **हेमचन्द्ररायकविभूषणः** (जन्म - १८८२ खृ., ज.स्था. अखण्डे वङ्गे पावना-मण्डले रामनगर इति स्थानम्, पिता- यदुनन्दनरायः, पितृस्वषा- कृष्णकामिनीचौधुराणी) | हैहयविजयम् | १९०९ खृ., पावना | ९ सर्गाः | हैहय-पौलस्त्ययोर्युद्धं, तत्र रावणस्य पराभवः, पुलस्तानुरोधेन तस्य मुक्तिलाभः। |
| ३. | **श्रीउमापदचट्टोपाध्यायः** (समयकालः अज्ञातः, नि.स्था.- सम्भवतः हुगलीति मण्डले श्रीरामपुर इति स्थानम्) | धनुर्भङ्गम् | २००५ खृ., हुगलीमण्डले श्रीरामपुरतः | १३ सर्गाः | रामोपाख्यानम् । |

सारणी १.१ : रामायणाश्रितानि महाकाव्यानि

### *महाभारताश्रितानि*

| क्र.सं | महाकविः | महाकाव्यनाम | संक्षिप्ता वर्णना | | |
|---|---|---|---|---|---|
| | | | प्र.का., प्र.स्था. | स.सं. | विषयः |
| १. | **मम.चन्द्रकान्ततर्कालंकारः** ( १८३६-१९०६ खृ., ज.स्था. अखण्डे वङ्गे मयमनसिंह-मण्डले शेरपुरे ग्रामे, माता- ब्रह्ममयी देवी, पिता- राधानाथसिद्धान्तवागीशः) | चन्द्रवंशम् (महाभारताश्रितम्) | १९१२ खृ., कलिककातातः | २४ सर्गाः | चन्द्रवंशीयानां नृपतीनां गौरवमयवर्णनम् । |

| | | | | | |
|---|---|---|---|---|---|
| २. | **यदुनाथकविभूषणः**<br>(समयकालः अज्ञातः,<br>माता- ब्रह्ममयी देवी,<br>पिता- विश्वनाथभिषक्) | पाण्डुवंशः (प्रथमांशः)<br>(महाभारताश्रितम्) | १८७९ खृ.,<br>कलिकातातः | ९ सर्गाः | पाण्डवानां सामग्रिकः जीवनवृत्तान्तः। |
| ३. | **अन्नदाचरणतर्कचूडामणिः**<br>(जन्म – १८६२ खृ.,<br>ज.स्था. नोयाखालीति मण्डले सोमापारा इति ग्रामः<br>पिता- कालीकिङ्करठाकुरः) | महाप्रस्थानम् | - | - | महाभारतीयवृत्तान्तः। |
| ४. | **मम. पञ्चाननतर्करत्नः**<br>( १८६६-१९४० खृ.,<br>ज.स्था. भट्टपल्ली,<br>पिता- नन्दलालविद्यारत्नः) | पार्थाश्वमेधमहाकाव्यम्<br>(प्र.प्र. विद्योदयपत्रिका) | १९२६ खृ.<br>ग्रन्थत्वेन प्रकाशितम् | - | महाभारतीयाख्यानमेव वस्त्वस्य । |
| ५. | **मम.हरिदाससिद्धान्तवागीशः**<br>( १८७६-१९६१ खृ.,<br>ज.स्था. फरिद्पुरिति मण्डले कोटालिपाडा इति परगणायाम् उनशिया इति ग्रामः,<br>माता- विधुमुखी देवी<br>पिता- गङ्गाधरविद्यालंकारः) | रुक्मिणीहरणम्<br>(र.का. १९१० खृ.) | १९३३ खृ. | १६ सर्गाः | द्वारकाधीशेन माधवेन विदर्भराज-दुहितुः रुक्मिण्या हरणं तथा, तस्या भ्रातुः रुक्मिणः कृष्णेन सममाहवः पराजयश्चेत्यस्याशयः। |
| ६. | **हेमचन्द्ररायकविभूषणः**<br>(जन्म - १८८२ खृ.,<br>ज.स्था. अखण्डे वङ्गे पावना-मण्डले रामनगर इति स्थानम्,<br>पिता- यदुनन्दनरायः,<br>पितृस्वषा- कृष्णकामिनीचौधुराणी) | परशुरामचरितम्<br>(महाभारताश्रितम्) | १९०४ खृ.<br>पावना | १० सर्गाः | परशुरामावतारस्य जीवनलीला। |
| | | रुक्मिणीहरणम्<br>(महाभारताश्रितम्) | प्र.सं.१९१० खृ.<br>द्वि.सं.१३३६व.,<br>पावना | १२ सर्गाः | श्रीकृष्णेन रुक्मिण्याः हरणम्। |
| | | पाण्डवविजयम्<br>(महाभारताश्रितम्) | प्र.सं.१९१६खृ.<br>द्वि.सं.१९३२खृ.<br>पावना | १२ सर्गाः | उद्योगपर्वणः सौप्तिकपर्व यावद् महाभारतीय-वृत्तान्तः। |
| | | सुभद्राहरणम्<br>(महाभारताश्रितम्) | अप्राप्तः | ९ सर्गाः<br>(प्रायः) | अर्जुनेन सुभद्रायाः हरणम्। |

| | | | | | |
|---|---|---|---|---|---|
| ७. | **योगेन्द्रमोहनविद्यारत्न-चक्रवर्ती** ( १८८९-१९७६ खृ., ज.स्था. अखण्डे वङ्गे फरिद्पुर इति मण्डले कोटालिपाडा इति परगणायाम् उनशियैति ग्रामः, माता- रोहिणी देवी, पिता- काशीश्वरचक्रवर्त्ती) | कृतान्तपराजयम् | - | - | महाभारतीयं सावित्री-सत्यवतो-रूपाख्यानमेव वस्तु। |
| ८. | **श्रीजीवन्यायतीर्थः** ( १८९३ – १९९२ खृ., ज.स्था. भट्टपल्ली, पिता- मम. पञ्चाननतर्करत्नः) | पाण्डवविक्रमम् | १९८५ खृ. कलिकातातः | १८ सर्गाः | महाभारतस्य वनपर्वस्य अन्तिमभागादारभ्य विराटपर्वणो वृत्तान्तोऽत्र विधृतः। |

सारणी १.२ : महाभारताश्रितानि महाकाव्यानि

एतद्व्यतीत्य योगीन्द्रनाथतर्कचूडामणेः ‘दशाननवधम्’, नलिनीकान्तस्मृतितीर्थस्य ‘देवव्रतचरितम्’, ललितमोहनभट्टाचार्यस्य ‘खाण्डवदाहमहाकाव्यम्’, श्रीश्रीमाता-अर्चनापुर्याः ‘श्रीरामकृष्णमङ्गलकाव्यम्’ इत्यादीनि काव्यान्यपि महाकाव्येषु अन्तर्यान्ति । अतो वक्तुं शक्यते यत्, महाकाव्यधारायां वङ्गीयानां कवीनामवदानन्तु नैवानस्वीकार्यमिति।


## खण्डकाव्यानि[१]

संस्कृतश्रव्यकाव्यस्रोतसि द्वितीया प्रधाना धारा एव खण्डकाव्यम् । काव्यविधस्यास्य लक्षणप्रसङ्गे समुदीरितं तु विश्वनाथेन - “खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च यत्॥ ६/३०७॥ ”[२] इति अर्थाद् , महाकाव्यलक्षणानि अशंतः अनुसृत्य छन्दोवद्धं यत् काव्यं रचितं भवति तदेव खण्डकाव्यमित्यभिधयाभिधीयते । धारायामस्यामपि नूनमेव वङ्गीया कविमनीषा सुतरामेव चकास्तीति नास्त्यत्र सन्देहलेशः। काव्यसौन्दर्येण, विषयवैचित्र्यद्वारेण, वृत्तविधानवैभिन्न्येन च काव्यान्यत्रत्यानि सहृदयहृदयानि नियतमेवाह्लादयन्ति । काव्यविभागेऽस्मिन् दूत-स्तोत्र-प्रशस्ति-वन्दना-भिनन्दन-ऋतुवर्णन-संस्तव-विलाप-स्मृतितर्पणादीनि विविधप्रकारान्येव काव्यानि यथान्तर्यान्ति तथैव शतक-दशक-अष्टक-पञ्चकानाम् अन्तर्भावोऽपि नैवायौक्तिक इति । अस्मिन् प्रसङ्गे वक्तु शक्यते यत्, प्रकारवैचित्र्यं तथा नवीनत्वमाश्रित्य खण्डकाव्यानि पञ्चधा विभज्यन्ते, यथा – ‘दूतकाव्यानि’, ‘स्तोत्रात्मकानि काव्यानि’, ‘संस्तवानि’, ‘विलापात्मकानि

[१] वि.सि.एस.एल्.(दत्त.) पृष्ठेषु ४२-४६ ; सं.का.बा.(मुखार्जी.); आ.सं.का.बा.म.(चट्टो.) पृष्ठेषु ४०-१४७

[२] सा.द.(हरिदास.) पृष्ठे ४२६

काव्यानि', 'शतकानि' चेति । परन्तु कानिचन काव्यानि सन्ति यान्येतेषु खण्डकाव्यान्तर्गतेषु गौणविभागेषु नैवान्तर्यान्ति । तान्येवावशिष्टानि काव्यानि केवलं 'खण्डकाव्यम्' इति सामान्याभिधया अभिहितुं शक्यते, अतः काव्यानीमानि **'विविधानि' इति अतिरिक्ते गौणे विभागे सन्निवेशितानि** -




रेखचित्रम् १.२ : खण्डकाव्यभेदाः

हेमचन्द्ररायकविभूषणस्य खण्डकाव्यान्यपि केवलं **'विविधानि'**, **'स्तोत्राणि'** चेति विभागद्वये एव आपतन्ति । अतः अधुना केवलमिदं विभागद्वयमेव अधस्तादालोच्यते अतीव संक्षिप्ततया ।

## विविधानि

| **क्र. सं.** | **कविः** | **काव्यम्** | **क्र. सं.** | **कविः** | **काव्यम्** |
|---|---|---|---|---|---|
| १. | **गङ्गाधरकविराजः** (१७९८ - १८८४ खृ.) | दुर्गवधकाव्यम् | २. | **मम.कृष्णकान्त-विद्यावागीशः** (जन्म - १८१० खृ.) | गोपाललीलामृतम् |
| | | लोकालोकपुरुषीयम् | | | चैतन्यचन्द्रामृतम् |
| | | हर्षोदयम् (चित्रकाव्यम्) | | | कामिनीकामकौतुकम् |
| ३. | **चन्द्रकान्त-तर्कालंकारः** | प्रबोधप्रकाशम् | ४. | **अन्नदाचरण-तर्कचूडामणिः** | सुमनोऽञ्जलिः |
| | | आनन्दतरङ्गिनी | | | ऋतुचित्रम् |
| | | भावपुष्पाञ्जली | | | तदतीतमेव |
| ५. | **मम. प्रमथनाथ-तर्कभूषणः** | रासरसोदयम् | ६. | **मम.पञ्चाननतर्करत्नः** | सर्वमङ्गलोदयम् |
| | | विजयप्रकाशम् | | | श्रीविष्णुविक्रम-काव्यम् |
| ७. | **रजनीकान्त-** | चट्टलविलापम् | | | मुकुन्ददेवात्म-निदर्शनम् |

| | | | | | |
|---|---|---|---|---|---|
| | **साहित्याचार्यः** (१८६९ - १९२९ खृ.) | मङ्गलोत्सवम् | ८. | **मम.हरिदाससिद्धान्त-वागीशः** | वियोगवैभवम् |
| | | विधुविनोदम् | | | विद्यावित्तविवादम् |
| ९. | **मम. विधुशेखर-भट्टाचार्यः** | यौवनविलासम् | | | शङ्करसम्भवम् (अप्राप्तम् अधुनापि) |
| | | दुर्गासप्तसती | | | |
| | | बद्धविहगम् | १०. | **हरिचरणभट्टाचार्यः** (जन्म - १८७९ खृ.) | कर्णधारम् |
| ११. | **गुरुप्रसन्नभट्टाचार्यः** | मथुरा/माथुरम् | | | रूपनिर्झरः |
| | | वरूथिनीचम्पूः | १२. | **हेमचन्द्रराय-कविभूषणः** | सत्याभामापरिग्रहम् |
| १४. | **कालीपदतर्काचार्यः** | मन्दाक्रान्तावृत्तम् | | | भारतीगीतिः (अप्राप्ता अधुनापि) |
| | | शैशवसाधनम् | | | |
| | | आलोकतिमिरवैभवम् | १३. | **श्रीश्वरविद्यालंकार भट्टाचार्यः** | दिल्लीमहोत्सवकाव्यम् |
| | | आशुतोषावदानम् | | | विक्रमभारतम् |
| १५. | **श्रीजीवन्यायतीर्थः** | ऋतुचक्रचङ्क्रमणम् | १६. | **विश्वेश्वरविद्याभूषणः** (१९०३ - १९८४ खृ.) | वनवेणु |
| १७. | **नित्यानन्द-स्मृतितीर्थः** | जातीयपताका-भिनन्दनम् | | | काव्यकुसुमाञ्जलिः |
| | | | | | गङ्गासुरतरङ्गिनी |
| | | शैलकुमारस्मरणम् | १८. | **सुखमय-मुखोपाध्यायः** (१९२३ - १९९४ खृ. ) | मेघच्छाया |
| | | मातृपूजाकथाकाव्यम् (चम्पूकाव्यम्) | | | कुमारच्छाया |
| | | | | | काव्यमञ्जरी |
| १९. | **सीतानाथाचार्यः** (१९३९खृ.- वर्तमानः) | का त्वं शुभे | | | अध्यात्ममञ्जरी |
| | | शिशुयुवदुर्दैवविलसितम् | | | प्रकीर्णम् |
| २१. | **हासेमहाजरा** (जन्म-१९४४ खृ., माता- नहुराविवि, पिता- फकीरहाजरा, ज.स्था.- वर्धमानमण्डले मुक्तिपुरः) | स्रोतस्विनी (काव्यसंग्रहः) | २०. | **दीपकघोषः** (१९४१-२००५ खृ., माता- प्रफुल्लनलिनीदेवी, पिता-सुखरञ्जनघोषः, ज.स्था.- पूर्ववङ्गे वरिशालिति ग्रामः) | राजनीतिलीलामृतम् |
| | | स्वाद्यम् (काव्यसंग्रहः) | | | |


सारणी १.३ : खण्डकाव्यानि ('विविधानि' इति विभागतानि)

एतद्व्यतीत्य यादवेश्वरतर्करत्नस्य ‘अश्रुविसर्जनकाव्यम्’; हेमन्तकुमारतर्कतीर्थस्य ‘मकरसंक्रान्तीयकाव्यम्’; शिवरामचक्रवर्तिनो ‘बाणविजयकाव्यम्’; गोलोकनाथवन्द्योपाध्यायस्य ‘देव्यागमनकाव्यम्’, ‘हीरकजुबिलिकाव्यम्’ च; यादवेन्द्ररायस्य ‘मङ्गलोत्सवम्’, ‘आरण्यकविलासम्’ च; राजाशम्भुचन्द्ररायस्य ‘विक्रमभारतम्’; गोविन्दविद्याभूषणस्य ‘लघुभारतम्’ चेत्यादीनि अपि उल्लेखयोग्यानि ।

## स्तोत्रात्मकं काव्यम्

खण्डकाव्येषु स्तोत्रात्मकस्य काव्यस्य धारा तु सुप्रचीना एव । यतः महाकवेरश्वघोषस्य नाम्ना प्रचलितं ‘गण्डीस्तोत्रगाथा’, ‘त्रिदण्डमाला’ चेति काव्यद्वयमेव स्तोत्रात्मकेषु काव्येषु आदिभूतेन निदर्शनरूपेण विलसति संस्कृतसाहित्यसम्भारे । ऊनविंशशतकेऽपि एषा धारा नितरामेव प्रवहति । प्रवाहेऽस्मिन् ऊनविंशतके अधिष्ठितानां वङ्गीयानामवदानमपि अनस्वीकार्यम् ।

स्तोत्रात्मकेषु काव्येषु स्तोत्र-स्तव-स्तुति-प्रशस्ति-वन्दनाभिनन्दनादीनि काव्यानि अन्तर्यान्ति । अतः स्तोत्रात्मकानि काव्यानि प्रधान्येन त्रिधा विभज्यन्ते, यथा- स्तोत्र-स्तव-स्तुतयः, प्रशस्तिः, वन्दनाभिनन्दनानि –




रेखचित्रम् १.३ : स्तोत्रात्मककाव्यानां विभागः

उपर्युक्तेषु त्रिषु विभागेषु केवलं **प्रथमे विभागे एव अन्तर्याति हेमचन्द्ररायप्रणीतं स्तोत्रकाव्यम्** । अतः स एव विभाग अधुना अधस्तादालोच्यते –

### *स्तोत्र-स्तव-स्तुतयः*

एतेषु उल्लेखयोग्यानि कानिचन काव्यानि उदाहरणतया उल्लिखितानि रचयितॄनां कालानुक्रमेण, तानि यथा –

| क्र.सं. | कविः | स्तोत्र-स्तव-स्तुतयः |
|---|---|---|
| १. | पञ्चाननतर्करत्नः | स्तोत्रावली |
| | | दुर्गास्तवम् |
| २. | हेमचन्द्ररायकविभूषणः | दशावतारस्तोत्रम् |
| ३. | श्रीश्वरविद्यालंकार-भट्टाचार्यः | शिवकुसुमाञ्जलिः |
| ४. | श्रीजीवन्यायतीर्थः | श्रीभगवच्छङ्कराचार्यस्तुतिगीतिः |
| | | श्रीरामकृष्णस्तुतिगीतिः |
| | | श्रीगङ्गादशहरास्तोत्रम् |
| ५. | सीतानाथाचार्यः | सारदास्तवनम् |

सारणी १.४ : स्तोत्र-स्तव-स्तुतयः

परिशेषे वक्तुं शक्यते यदूनविंशविंशैकविंशशतकेषु संस्कृतसाहित्यघधारासु सृष्टिधर्मिणी बहुमुखिनी एषा श्रव्यकाव्यधारा वङ्गीयानां पण्डितानां प्रतिभया नितरामेव समृद्धा जाता । न केवलं श्रव्यकाव्येषु अन्यासु धारास्वऽपि वङ्गीया प्रतिभा चिरं प्रगल्भा देदीप्यते । अधुना कवेः सिद्धेश्वरचट्टोपाध्यायस्य स्मृतिकुसुममालिकायां विलसितां तेजविजृम्भितां वाणीमिमाम् उद्धृत्य समाप्यते प्रथमाध्यायस्य प्रथमो भागोऽयम् –

"काव्येऽपि कोमलधियो वयमेव नान्ये
तर्केऽपि कर्कशधियो वयमेव नान्ये ।
दृश्येऽपि संयतधियो वयमेव नान्ये
तन्त्रेऽपि यन्त्रितधियो वयमेव नान्ये ॥"[1] इति शम् ।

[1] सं.सा.प.प. ५६ तमवर्षस्य, ७म-८मसंख्ये, नभेम्बर् - डिसेम्बर् १९७३ खृ., पृष्ठे १७१


## १.२. द्वितीयो भागः : हेमचन्द्ररायकविभूषणः (१८८२ खृः) : संक्षिप्ता परिचितिः

### व्यक्तिगतजीवनम् [१]

ऊनविंश-विंशशताब्द्योः वङ्गीयसंस्कृतसाहित्येतिहासे अन्यतमः प्रसिद्धभूतो महाकविरेव प्रमथनाथ-फणिभूषणयोः सुयोग्यछात्रो हेमचन्द्ररायकविभूषणः । आसीद् हेमचन्द्ररायो गौतमगोत्रीयस्य वारेन्द्रकायस्थवंशोद्भूतस्य यदुनन्दनरायस्य पुत्रः । हेमचन्द्रस्य 'पाण्डवविजयम्' इति महाकाव्यस्य अन्तिमसर्गस्य ५१तमे श्लोके 'यादवनन्दनेन'[२] इति पदेन सूचितः तस्य पितृपरिचयः । कविरयं अविभक्तवङ्गस्य पावना इति मण्डलान्तर्गतस्य 'रामनगर' इत्याख्ये स्थाने द्विरशीत्यधिकाष्टादशशततमे आङ्गलाब्दे (१८०४ शकाब्दः, आश्विनमासस्य अष्टादश दिनाङ्कः) जन्मग्रहणं चकार। तस्य पितृष्वसा कृष्णकामिनीचौधुराणी, आसीत् सा घुघुडाङ्गानिवासिनी । कलिकाताविश्वविद्यालयात् स्नातकोत्तरोपाधिलाभादनन्तरं बभूव स पावनास्थितस्य एड्ओयार्डमहाविद्यालयस्य संस्कृतविभागस्य अध्यापकः । कवेरस्य जन्मभूमिः कर्मभूमिश्च अधुना 'बाङ्लादेश' इति देशस्यान्तर्गतः।

### हेमचन्द्ररायेण कविभूषणोपाधेः प्राप्तिः[३]

दशसर्गात्मके वीररसान्विते परशुरामचरितमित्याख्ये महाकाव्ये तृतीयपृष्ठाङ्कादेव ज्ञायते यत्, पावनास्थिताया दर्शनचतुष्पाठ्याः प्रसिद्धभूतो भूतपूर्वाध्यापको मथुरानिवासी सूर्यकान्ततर्कतीर्थशास्त्री काव्यमिदं पठित्वा हेमचन्द्रं कविभूषणोपाधिना भूषयामास, विषयेऽस्मिन् परशुरामचरिते हेमचन्द्रेणोद्धृता सूर्यकान्ततर्कतीर्थशास्त्रिणः पत्रमेव मानम्


"পাবনা-নিবাসিনঃ শ্রীমতো হেমচন্দ্ররায়স্য কবিত্ব-
শক্তি মবলোক্যাতীব হৃষ্টাঃ স্মঃ, কবিভূষণোপাধিনা চ
শ্রীমন্তং হেমচন্দ্রং ভূষয়ামঃ। সময়ে আয়ুষ্মান্ মহাকবির্ভবতু
ইত্যাশীরস্তু, তব 'পরশু-রাম-চরিতং কাব্যম্' অতিমধুরং
জাতম্, যদি কেনচিন্মহতা জনেনৈতৎ কাব্যং মুদ্রিতং
ভবেৎ, তদা সর্ব্বো জনস্তৎকাব্যরসমুপলভ্য সন্তুষ্যেদিতি
নাত্র সন্দেহ ইতি।

পাবনা
১৩১১।১১ই বৈশাখ। } শ্রীসূর্য্যকান্ত শর্ম্মণাম্।

चित्रम् १.१ : श्रीसूर्य्यकान्ततर्कतीर्थशास्त्रिणः पत्रम्

---

[१] एइच.सि.एस.एल.(कृष्णमा.) २५०,३५८ च अनुच्छेदौ. पृष्ठे ३०२, ३८२ च ; वि.सि.एस.एल.(दत्त.) पृष्ठे ४३ ; सं.का.बा.(मुखार्जी) पृष्ठे ५८

[२] पा.वि.(द्वि.सं.)१२/५१ पृष्ठे ११०

[३] परशु.च.(प्र.सं.) पृष्ठे ३

## सारस्वतसाधना [1]

बहूनि एव काव्यानि कविभूषणेन हेमचन्द्ररायेन विरचितानि, स्वोत्साहद्वारेण पावनातः स्वभवनादेव तानि प्रकाशितानि च । तस्य काव्यकृतिषु यथा महाकाव्यानि सन्ति, तथैव सन्ति खण्डकाव्यानि, संस्कृतानूदितानि काव्यानि च। तेषु कतिचन यथा –

*(क)* परशुरामचरितम् (प्र.सं. १९०४ खृ.),

*(ख)* हैहयविजयम् (प्र.सं. १९०९ खृ.),

*(ग)* रुक्मिणीहरणम् (प्र.सं. १९१० खृ., द्वि.सं. १३३७ व.),

*(घ)* सुभद्राहरणम् (समयकालोऽज्ञातः)

*(ङ)* सत्यभामापरिग्रहम् (प्र.सं. १९१३ खृ., द्वि.सं. १९३२ खृ.)


*(च)* पाण्डवविजयम् (प्र.सं. १९१६ खृ., द्वि.सं. १९३२ खृ.) चेति ।

उपर्युक्तेषु काव्येषु सत्यभामापरिग्रहं व्यतिरिच्य सर्वानि एव काव्यानि वीररसात्मकानि महाकाव्यानि, तान्येव कथावस्तुनो वैभिन्न्येन द्वैविध्यं दधते, यथा – रामायणवृत्ताश्रितानि, महाभारतवृत्ताश्रितानि चेति । सत्यभामापरिग्रहन्तु वीररसात्मकं खण्डकाव्यमिति । एतद्व्यतीत्य 'दशावतारस्तोत्रम्', 'पतिदानव्रतम्' (संस्कृतानूदितं खण्डकाव्यम्), 'भारतीगीतिः', 'भारविविमर्शः' (प्रबन्धः) इत्यादीनि विरचनानि तेनैव प्रणीतानि ।

अपि च तत्कालीने समये ( अर्थाद् ऊनविंशशताब्द्यां ) 'संस्कृतभारती'ति गवेषणामूलकपत्रिकायां तद्रचितानि बहून्येव काव्यानि प्रकाशितानि इत्येवं तथ्यं प्राप्यते कृष्णमाचार्यसम्पादिते 'History of Classical Sanskrit Literature' इति ग्रन्थे, परन्तु तान्येव काव्यानि अधुनापि नोपलभ्यन्ते । प्रसङ्गत उल्लेख्यं यत्, 'सुभद्राहरणम्', 'भारतीगीतिः', 'भारविविमर्शः' इत्यादीन्यपि अप्राप्तानि । अधुना निम्ने हेममहोदयस्य सारस्वतसाधनायाः संक्षिप्ता रूपरेखा सन्निवेशिता –

---


[1] एड्च.सि.एस.एल.(कृष्णमा.) २५०, ३५८ च अनुच्छेदौ. पृष्ठे ३०२, ३८२ च ; वि.सि.एस.एल.(दत्त.) पृष्ठे ४३ ; सं.का.बा.(मुखार्जी.) पृष्ठे ५८




रेखचित्रम् १.४ : हेमचन्द्ररायकविभूषणस्य सारस्वतसाधना

## रामायणवृत्ताश्रितानि महाकाव्यानि

### *हैहयविजयम् (खृः १९०९)* [१]




चित्रम् १.२ : आख्यापत्रम्, हैहय.वि.(प्र.सं.)

---

[१] हैहय.वि.(प्र.सं.)

हेमचन्द्ररचितेषु काव्येषु नवसर्गात्मकं हैहयविजयमेव एकमात्रं रामायणात्मकं महाकाव्यम् । पुनः महाकाव्यमिदं कवेः द्वितीया काव्यकीर्तिरूपेणैव प्रतिभाति, विषयेऽस्मिन् काव्यग्रन्थस्यास्य आत्मनिवेदनमित्यंशे कविवचनमेव मानम् "वर्तमान् काले उत्साहवारिर अभावे कवित्वाङ्कुरेर विनाशओ उपेक्षित हइवे । इहा जानियाओ अनिर्वचनीय कारण विशेषे द्वितीय काव्य हैहयविजय प्रकाशे मनोनिवेश करियाछि । परशुरामचरितेर न्याय एइ क्षुद्रायतन नव काव्य यदि कतिपयमात्रओ उदारचेता विद्वज्जनेर प्रीतिप्रद हय, तवेइ श्रम सफल मने करिव ।"

परशुरामचरितमिति महाकाव्यस्य प्रकाशकालस्तु १९०४ आङ्गलाब्दः। नवसर्गात्मकस्यास्य महाकाव्यस्य आत्मनिवेदने कवेराचार्यस्य प्रमथनाथतर्कभूषणस्य अभिमतपत्रमपि संयोजितमस्ति । तत्पत्रस्य दिनाङ्केनैव काव्यस्यास्य प्रकाशकालः अनुमीयते, पत्रस्य दिनाङ्कः ३/६/१९०९ अतएव प्रकाशकालोऽपि सम्भवतः १९०९ आङ्गलाब्द इति । पुनः आत्मनिवेदनस्य अन्ते कविभूषणोऽयं महाकाव्यस्यास्य प्रकाशकालं निर्देशितवान् अनेन प्रकारेण "भाद्र।१३१६" अर्थात् १९०९ आङ्गलाब्दे प्रकाशितं जातमिदं हैहयविजयं महाकाव्यम् । काव्यकृतेरस्य केवलं प्रथमं संस्करणमेवोपलभ्यते, द्वितीयं तु नाद्यापि प्राप्तं मयेति । अत्रत्ये सम्मुखे पृष्ठे रघुवंशमिति महाकाव्यतः हैहय-पौलस्त्ययोः वर्णनात्मकं पद्यद्वयम् उद्ध्रियते, यथा –

"संग्राममनिर्विष्टसहस्रबाहरष्टादशद्वीपनिखातयूपः।
अनन्यसाधारणराजशब्दो बभूव योगी किल कार्त्तवीर्य्यः॥
* * * * * * *
ज्याबन्धनिष्पन्दभूजेन यस्य विनिश्वसद्वक्त्रपरम्परेण ।
कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमाप्रसादात् ॥" इति ।

रावणहैहययोर्युद्धं तथा रावणस्य पराभव एवास्य विषयवस्तु । अत्रास्ति श्लोकचतुष्टयात्मकं मङ्गलाचरणम् । अस्याङ्गिरसो वीर एव । काव्यमिदं तेन उपहाररूपेण 'कलिकाता-संस्कृतमहाविद्यालय'स्य प्रसिद्धोऽध्यापकं श्रीयुक्तप्रमथनाथतर्कभूषणमुद्दिश्य समर्पितम्; पुनः कविनामुना काव्यमिदम् अक्षयकुमारपञ्चतीर्थहस्ते उपायनीकृतम् । काव्यस्यास्य 'आत्मनिवेदनमि'ति अंशे रामनाथतर्करत्नस्य 'वासुदेवविजयम्' , महेशचन्द्रतर्कचूडामणेः 'काव्यपेटिका' इति काव्यद्वयस्य सप्रशंस उल्लेखोऽपि दृश्यते । आत्मनिवेदनादस्माद् एतदपि अवगम्यते यद्, मुद्रणात् पूर्वम् अध्यापकः प्रमथनाथतर्कभूषणो 'हैहयविजयम्', 'परशुरामचरितमि'ति काव्यद्वयस्य संशोधनं तथा पाठपरिवर्तनं चकार ।

हैहयविजयस्य नव सर्गाः यथा ‘चरिताख्यानम्’, ‘रेवाविहारः’, ‘रावणरेवाभिगमनम्’, ‘रेवाप्रवाहरोधः’, ‘मन्त्रिवाक्यम्’, ‘समराभिगमनम्’, ‘रक्षःसैन्यपराभवः’, ‘दशग्रीवनिग्रहः’, ‘रावणमोचनम्’ । महाकाव्यस्यास्य मूल्यमासीद् अर्धमुद्रा इति ।


### महाकाव्ये उल्लिखितानि मुख्यानि गौणानि च चरित्राणि :

| चरित्रप्रकारः | चरित्राणि | चरित्रनामानि | परिचयः |
|---|---|---|---|
| मुख्यानि चरित्राणि | नायकः | अर्ज्जुनः | कार्त्तवीर्य्यो हैहयाधिपतिः सहस्रबाहुः |
| | प्रतिनायकः | रावणः | पौलस्त्यो लङ्केश्वरो रक्षपतिः दशाननः |
| गौणानि चरित्राणि | नायक सम्बन्धिनि | पुररक्षिणः | माहिष्मतीति पुरस्य रक्षिणः |
| | | मन्त्रिमुख्यः | हैहयामात्येषु मुख्यतमः |
| | प्रतिनायक सम्बन्धिनि | शुकसारणौ | लङ्केश्वरस्य मन्त्रिणौ |
| | | प्रहस्तः | रक्षसेनापतिः |
| | | पुलस्त्यः | सप्तर्षिषु अन्यतमः, रावणपितामहश्च |
| | | धनदः | कुवेरः (रावणस्य वैमात्रेयाग्रजः) |

सारणी १.५ : हैहयविजयस्य चरित्राणि

## महाभारतवृत्ताश्रितानि महाकाव्यानि

### *परशुरामचरितम् (खृ. १९०४)* [१]



# परशु-राम-चरितम् ।

काव्यम् ।

SANSKRIT SAHITYA PARISHAT
Library.
Regd 1916.
CALCUTTA

"क्षत्रिय-रुधिरमये जगदपगतपापं
स्नपयसि पयसि शमित-भव-तापम्
केशव धृतभृगुपतिरूप जय जगदीश हरे ॥"

जयदेवः ।


गुरु-पादानुध्यायिना
श्रीहेमचन्द्ररायेण कृतम् ।

मूल्यम् अर्द्धमुद्रा ।

चित्रम् १.३ : आख्यापत्रम्, परशु.च.(प्र.सं.)

[१] परशु.च.(प्र.सं.)

परशुरामचरितमिति दशसर्गात्मकं वीररसान्वितं महाकाव्यम् । परशुरामस्य समग्रजीवनचरितमवलम्ब्यैव कविभूषणेनामुना प्रणीतमिदं महाकाव्यम् । महाकाव्यस्यास्य चतुर्थपृष्ठाङ्काद् एतदपि ज्ञायते यद् महाकाव्यमिदं कविना परमार्चनीयस्य श्रीयुक्तहरिनारायणकाव्यतीर्थस्य श्रीपादपद्मेषु उपहाररूपेण समर्पितम् । कविकृतिरियं प्रकाशनकालानुसारेण कवेरस्य प्रथमा काव्यकीर्तिरूपेण प्रतिभाति मत्सकाशे, अपि च अस्मिन् विषये महाकाव्यस्य चतुर्थे पृष्ठाङ्के 'उपहार' इति अंशे हरिनारायणकाव्यतीर्थमहाभागान् प्रति कवेः पत्रमेव मानम् –


উপহার।

পরমার্চ্চনীয় শ্রীযুক্ত পণ্ডিত হরিনারায়ণ কাব্যতীর্থ মহাশয়
শ্রীশ্রীপাদপদ্মেষু।—

দেব!

যে আশ্রমবৃক্ষক ভবদীয় উৎসাহবারিসেচনে ক্রমে ক্রমে বর্দ্ধিত হইয়া সম্প্রতি সাধ্যানুরূপ ফলপ্রসবে উদ্যত হইয়াছে, তাহার এই প্রথম ফল, আশা করি, আনন্দের সহিত গ্রহণ করিবেন নিবেদনমিতি।

বিনয়ানতচ্ছাত্র
শ্রীহেমচন্দ্র রায়।
পাবনা।

चित्रम् १.४ : हेमचन्द्ररायेण प्रेरितमुपहारपत्रम्

महाकाव्यस्यास्य प्रथमसंस्करणमेव उपलभ्यते, द्वितीय संस्करणं न प्राप्यते मया अधुनापि । कवेः परमश्रद्धेयाध्यापकेन श्रीयुक्तप्रमथनाथतर्कभूषणमहाभागेन महाकाव्यस्यास्य मूलं संशोधितम् । काव्यकृतौ अस्मिन् सम्मुखे वा प्रथमे पृष्ठे जयदेवरचिताद् गीतगोविन्दमिति खण्डकाव्यात् दशावतारस्तोत्रस्य परशुरामावतारचरितज्ञापकं पद्यकुसुममिदं उद्ध्रियते –

"क्षत्रियरुधिरमये जगदपगतपापं स्नपयसि पयसि शमित-भव-तापम् ।
केशव धृतभृगुपतिरूप जय जगदीश हरे ॥" [1] इति।

महाकाव्येऽस्मिन् श्लोकाष्टकात्मकं मङ्गलाचरणमुपलभ्यते । अत्र विलसन्ति सर्गाः यथा - 'रामाविर्भावः', 'दिव्यास्त्रलाभः', 'वरप्राप्तिः', 'जमदग्न्यर्जुनसंघर्षः', 'रणप्रयाणम्', 'युद्धम्', 'पुनर्युद्धोपक्रमः', 'कार्त्तवीर्य्यार्जुनबधः', 'रामविलापः', 'क्षत्रसङ्क्षयः' । काव्यस्यास्य मूल्यमासीद् अर्धमुद्रा ।

[1] परशु.च.(प्र.सं.) पृष्ठे १

## हेमचन्द्ररायप्रणीतस्य परशुरामचरितस्य प्राचीनत्व-विचारणम्

ऊनविंशविंशैकविंशशतकेषु परशुरामम् अवलम्ब्य अतीव स्वल्पसंख्यकानि महाकाव्यानि सन्ति तेषु सम्भवतः हेमचन्द्रप्रणीतं महाकाव्यमेव प्राचीनतममिति पदवीं लब्धुं शक्नोति, विषयोऽयं प्रतिपादयामि निम्ने –

| क्र.सं. | महाकविः | महाकाव्यनाम | प्रकाशकः | प्र.का. |
|---|---|---|---|---|
| १ | हेमचन्द्ररायकविभूषणः | परशुरामचरितम् | कविरेव, हेमकुटी,पावना | १९०४ खृ. |
| २ | कृष्णदत्तशर्माशास्त्री | भगवान् परशुराम | अखिल-भारतीयब्राह्मण-महासभा, दिल्ली | १९९६ खृ. |
| ३ | प्रो. सुधीकान्तभारद्वाजः | परशुरामोदयम् | दिल्ली | २०१५ खृ. |


सारणी १.६ : परशुरामचरितस्य प्रचीनत्वनिरूपणम्

## महाकाव्ये उल्लिखितानि मुख्यानि गौणानि च चरित्राणि

| चरित्रप्रकारः | चरित्राणि | चरित्रनामानि | परिचयः |
|---|---|---|---|
| मुख्यानि चरित्राणि | नायकः | परशुरामः | जामदग्न्यः, विष्णोरवतारश्च |
| | प्रतिनायकः | अर्जुनः | कार्त्तवीर्य्यो हैहयाधिपो सहस्रबाहुः |
| गौणानि चरित्राणि | नायकसम्बन्धिनि | जमदग्निः | परशुरामस्य पिता |
| | | रेणुका | परशुरामस्य माता |
| | | महादेवः | परशुरामस्य अस्त्रगुरुः |
| | | गन्धर्व्वराजः | केवलमुल्लेखो अस्ति |
| | | रामाग्रजाः | केवलमुल्लेखो अस्ति |
| | | कश्यपः | परशुरामाद् हिरण्मयीवेदिनो निखिलावन्याश्च ग्रहिता |
| | प्रतिनायकसम्बन्धिनि | दत्तात्रेयो | कार्त्तवीर्य्यस्य वरदाता मुनिः |
| | | कृतवीर्य्यः | हैहयोऽर्ज्जुनस्य पिता |
| | | आपवो | कार्त्तवीर्य्यस्य अभिशप्ता मुनिः |


सारणी १.७ : परशुरामचरितस्य चरित्राणि

## रुक्मिणीहरणम् (खृ. १९१०)[१]




चित्रम् १.५ : आख्यापत्रम्, रुक्मिणी.ह.(प्र.सं.)

[१] रुक्मिणी.ह.(प्र.सं., द्वि.सं.)



Presented to the Sanskrit Sahitya Parishad Library.

रुक्मिणीहरणम्

महाकाव्यम् ।

पाण्डवविजयसुभद्राहरणसत्यभामापरिग्रहप्रभृतीनां
काव्यानां रचयित्रा
एम्. ए, कविभूषणोपाधिना
श्रीहेमचन्द्ररायेण विरचितम् ।

अन्तरान्तरा परिवर्त्त्य परिवर्द्ध्य च पुनः संस्कृतम्
लघुटिप्पण्या च संयोजितम् ।

पावना 'हेमकुटी' भवनाद्
ग्रन्थकारेण प्रकाशितम् ।

---

"निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुकाः ॥" श्रीमद्भागवतम् ।

---

Price Rupee One only. मूल्यं रूप्यकमात्रम् ।

SANSKRIT SAHITYA PARISHAD Library, Estd 1916. CALCUTTA.

चित्रम् १.६ : आख्यापत्रम्, रुक्मिणी.ह.(द्वि.सं.)

कवेरस्य अपरं महाकाव्यं द्वादशसर्गात्मकं 'रुक्मिणीहरणम्' इति । रुक्मिणीहरणस्य रसविषये न किमपि कथितं कविना कुत्रापि । कलिकातायां संस्कृतसाहित्यपरिषदि अस्य काव्यग्रन्थस्य चत्वारः प्रतिलिपयः सन्ति । अस्य ग्रन्थस्य संस्करणद्वयं प्राप्यते । प्रथमसंस्करणस्य प्रकाशकालः खृः १९१०, मूल्यं अर्धमुद्रा । द्वितीयसंस्करणस्य मूल्यं रूप्यकमात्रम्, प्रकाशकालः १३३७ बङ्गाब्दस्य श्रावणमासः । प्रथमसंस्करणे कविनामुना स्वरचना काव्यमिति अभिधया, द्वितीये संस्करणे महाकाव्यमिति अभिधया अभिधीयते । प्रथमसंस्करणे सन्ति दश सर्गाः, द्वितीये संस्करणे सन्ति द्वादश सर्गाश्च ; तत्रातिरिक्तं सर्गद्वयं यथा – 'दण्डनीतिविवेकः', 'कृष्णनारदसंवाद'श्च । संस्करणद्वयं यथा सर्गसंख्यासु वैभिन्न्यं धत्ते तथैव सर्गनामसु श्लोकसंख्यासु चापि वैभिन्न्यं धत्ते, तदेव अधस्तादुपस्थाप्यते -

| **रुक्मिणीहरणम्** | | | | | | |
|---|---|---|---|---|---|---|
| **प्र. सं.** | | | | **द्वि. सं.** | | |
| **स.सं.** | **सर्गनाम** | **श्लो.सं.** | | **स.सं.** | **सर्गनाम** | **श्लो.सं.** |
| १ | रूक्मिणीपूर्व्वरागः | ३२ | | १ | रूक्मिणीपूर्व्वरागः | ४२ |
| | | | | २ | दण्डनीतिविवेकः | ४७ |
| | | | | ३ | कृष्णनारदसंवादः | ४९ |
| २ | विप्रप्रेषणम् | ४१ | | ४ | लेख्यप्रेषणम् | ४२ |
| ३ | कृष्णपुरोहितसंवादः | ३१ | | ५ | कृष्णविप्रसमागमः | ४२ |
| ४ | रुक्मिणीलेख्यम् | ३१ | | ६ | रुक्मिणीलेखः | ३० |
| ५ | कुण्डिनप्रवेशः | ३४ | | ७ | कुण्डिनप्रयाणम् | ४८ |
| ६ | शिशुपालपक्षसङ्कल्पः | ४७ | | ८ | प्रतिपक्षाध्यवसायः | ५६ |
| ७ | हरणम् | २९ | | ९ | रुक्मिणीहरणम् | ३३ |
| ८ | राजकपराभवः | ५५ | | १० | राजकपराजयः | ६३ |
| ९ | रुक्मिदर्पशातनम् | ३२ | | ११ | रुक्मिदर्पशातनम् | ३२ |
| १० | द्वारकाप्रत्यावर्तनम् | २२ | | १२ | विजयोत्सवः | ३३ |

सारणी १.८ : रुक्मिणीहरणस्य संस्करणद्वयस्य सर्गाः श्लोकाश्च

द्वितीये संस्करणे द्वादशसर्गस्य समापनात् परमस्ति चतुर्दशश्लोकात्मकम् 'अथ स्वाभिप्रायाविष्करणम्', अत्र एकादशश्लोकादारभ्य चतुर्दशसंख्यकं श्लोकं यावदस्ति 'अथाभीष्टशंसनम्' । पावनास्थितस्य टोलस्य दर्शनविभागस्य अध्यापकः फणिभूषणतर्कवागीशः काव्यस्यास्य मूलसंशोधनं

आद्यन्तसमालोचनमपि चकार । तस्य समालोचनानुसारेण अत्र प्रसादगुणस्य एकाधिपत्यं दृश्यते, पुनः अन्ये गुणाः, ध्वनिः, रीतयोऽपि सन्ति । महाकाव्यस्यास्य अङ्गिरसो वीर एवेति प्रतीयते, श्रृङ्गारस्तु अङ्गरसः।

### महाकाव्ये उल्लिखितानि मुख्यानि गौणानि च चरित्राणि

| **चरित्रस्य प्रकारः** | **चरित्राणि** | **चरित्रनामानि** | **परिचयः** |
|---|---|---|---|
| **मुख्यानि चरित्राणि** | **नायकः** | श्रीकृष्णः | द्वारकाधीशः |
| | **नायिका** | रुक्मिणी | विदर्भराजदुहिता |
| | **प्रतिनायकः** | रुक्मी | विदर्भकुमारो रुक्मिण्याः अग्रजः |
| **गौणानि चरित्राणि** | **नायक-सम्बन्धिनि** | चारः | श्रीकृष्णस्य चरः |
| | | नारदः | देवर्षिः |
| | | विप्रः | रुक्मिण्याः लेख्यवाहकः |
| | | दारुकः | श्रीकृष्णसारथिः |
| | | बलभद्रः | श्रीकृष्णाग्रजः |
| | | सात्यकिः | श्रीकृष्णसहचरः |
| | | अक्रुरः | श्रीकृष्णसहचरः |
| | | कृतवर्मा | श्रीकृष्णसहचरः |
| | **प्रतिनायक - सम्बन्धिनि** | भीष्मकः | विदर्भराजः, रुक्मिरुक्मिण्योः पिता |
| | | शिशुपालः | चेदिभूमिपतिः |
| | | जरासन्धः | मगधमण्डलेश्वरः |
| | | शाल्वः | सौभपतिः |
| | | दन्तवक्रः | करूषराजः |
| | | पौण्ड्रः | पुण्ड्राधिपतिः |

सारणी १.९ : रुक्मिणीहरणस्य चरित्राणि

### *सुभद्राहरणम् (अप्राप्तम्)* [१]


काव्यमिदं न प्राप्तं मया । सत्यभामापरिग्रहस्य प्रथमसंस्करणस्य 'समालोचना' इति अंशे सुभद्राहरणस्य समालोचना दृश्यते, एतेन प्रतीयते यद् महाकाव्यमिदं सत्यभामापरिग्रहस्य पूर्ववर्ती।

---

[१] सत्य.प.(प्र.सं.)

सत्यभामापरिग्रहात् पूर्वभूतत्वाद् महाकाव्यमिदं सुभद्राहरणं पाण्डवविजयमिति महाकाव्यादपि पूर्ववर्ति एव, यतः सत्यभामापरिग्रहस्य प्रथमप्रकाशस्य कालः १९१३ खृः, पाण्डवविजयस्य प्रथमप्रकाशस्तु १९१६ खृः। सत्यभामापरिग्रहगते ‘समालोचना’ इति अंशे सिटि कलेज इति महाविद्यालयस्याध्यापकस्य उपेन्द्रनाथरायस्य (एम्.ए , विद्याभूषणः) सप्रशंससमालोचनादेव ज्ञायते यत् महाकाव्येऽस्मिन् अन्ततः सन्ति नवसंख्यकाः सर्गाः । माहाकाव्यमिदं वीररसात्मकम् ।

## *पाण्डवविजयम् (खृ. १९१६)*[१]


पाण्डवविजयम् ।

वीरकरुणारसाश्रितं महाकाव्यम् ।

रुक्मिणीहरण-सुभद्राहरण-सत्यभामापरिग्रह-प्रभृतिकाव्य-रचयिता

एम्, ए कविभूषणोपाधिना

श्रीहेमचन्द्ररायेण कृतम् ।

संस्कृत सहामण्डल ।

पावनावास्तव्येन तेनैव प्रकाशितम् ।


“मनसि वचसि काये पुण्यपीयूषपूर्णा-
स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून् पर्व्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ।” भर्तृहरिः ।

Rupee One only. मूल्यं रूप्यकमात्रम् ।

SANSKRIT SAHITYA PARISHAT
Library
Estd 1916.
CALCUTTA

चित्रम् १.७ : आख्यापत्रम्, पा.वि.(प्र.सं.)

[१] पा.वि.(प्र.सं., द्वि.सं.)



पाण्डवविजयम्

वीरकरुणरसप्रधानं महाकाव्यम् ।

'रुक्मिणीहरण' 'सुभद्राहरण' 'सत्यभामापरिग्रह'प्रभृतीनां
काव्यानां रचयिता—
एम्. ए कविभूषणोपाधिना
श्रीहेमचन्द्ररायेण विरचितम् ।

अन्तरान्तरा परिवर्त्त्य परिवर्द्ध्य च पुनः संस्कृतम्
लघुटिप्पण्या च संयोजितम् ।

पावना 'हेमकुटी'भवनाद् ग्रन्थकारेण प्रकाशितम् ।

"इदं कविवरैः सर्व्वैराख्यानमुपजीव्यते ।
उदयप्रेप्सुभिर्भृत्यैरभिजात इवेश्वरः ॥" महाभारतम् ।

*Price Rupee One only.* मूल्यं रूप्यकमात्रम्

चित्रम् १.८ : आख्यापत्रम्, पा.वि.(द्वि.सं.)

महाभारतस्य उद्योगपर्वणो भगवद्-यानपर्वाध्यायाद् आरभ्य सौप्तिकपर्वणः ऐषिकपर्वाध्यायं यावत् वृत्तमवलम्ब्य कविहेमचन्द्रेण रचितमिदं महाकाव्यम् । कविः काव्यस्यास्य रसविषये तस्य ग्रन्थस्य सम्मुखपृष्ठे एव उवाच "वीरकरुणरसप्रधानं महाकाव्यम्"[१] इति । अत्र सन्ति द्वादश सर्गाः, महाकाव्यस्यास्य द्वौ संस्करणौ उपलभ्येते । तेषु केवलं २ये संस्करणे द्वादशतमसर्गादनन्तरमस्ति 'अथ मर्मोद्घाटनम्' इति अंशः, सन्त्यत्र सप्तदशसंख्यकाः श्लोकाः, तेषु अन्तिमश्लोकद्वयं तु 'अथाभीष्टशंसनम्' इति अंशमध्ये आपतति । मर्मोद्घाटनमिति अंशे स कविः सङ्केतद्वारेण महाकाव्यस्यास्य रचनाकालं सूचयति प्रथमे श्लोके –

"अर्थवदत्रारब्धं हरतनुहुतवहफणीन्दुजुषि शाके।..॥१॥"[२] इति ।

अत्र हरतनु = ८, हुतवहः (अग्निः) = ३, फणिः = ८, इन्दु = १। अतः परम् 'अङ्कस्य वामा गतिः' इति नियमानुसारेण भवति १८३८ शकाब्दः, अनेन सह ७८ संयोजनेन भवति १९१६ आङ्गलाब्दः, अयमेव महाकाव्यस्यास्य रचनाकालः ।

ग्रन्थस्यास्य समालोचना अंशे एतदपि प्राप्यते यत् फणिभूषणतर्कवागीशः महाकाव्यस्यास्य प्रथमसंस्करणस्य पाण्डुलिपेः संशोधनं चकार परमस्नेहेन । प्रसङ्गतः उल्लेख्यं यद्, महाकाव्यस्यास्य यत् संस्करणं मया आदौ प्राप्तं तत्तु न प्रथमं, द्वितीयमेव । विषयेऽस्मिन् प्रमाणत्वेन हेमचन्द्रस्य उक्तिरेव गृह्यते 'अन्तरान्तरा परिवर्त्य परिवर्ध्य च पुनः संस्कृतम्, लघुटिप्पण्या च संयोजितम्' इति । द्वितीयसंस्करणस्यास्य मूल्यं तेन निर्धारितं रूप्यकमात्रमिति ।

महाकाव्यस्यास्य संस्करणद्वये कतिपयानि वैसादृश्यानि विराजन्ते । संस्करणद्वयस्यास्य वैषम्यस्य निदर्शनमारभ्यते सम्मुखपृष्ठादेव यतः प्रथमसंस्करणस्य सम्मुखे अस्ति भर्तृहरिवचनम्, द्वितीये च अस्ति महाभारतवचनमिति । पुनः १म'संस्करणस्य 'ग्रन्थकृतो मङ्गलाचरणमात्मनिवेदनञ्च' इति अंशे षड्लोकात्मकं मङ्गलाचरणं दृश्यते, २य'संस्करणे तु अस्ति श्लोकाष्टकात्मकं मङ्गलाचरणम् । अधुना पाण्डवविजयस्य संस्करणद्वयस्य सर्गसंख्या, श्लोकसंख्या च अधस्तादुपस्थाप्यते –

[१] पा.वि.(द्वि.सं.) पृष्ठे १

[२] तत्रैव.मर्म. पृष्ठे १११

| पाण्डवविजयम् | | | | | | |
|---|---|---|---|---|---|---|
| प्र. सं. | | | | द्वि. सं. | | |
| स.सं. | सर्गनाम | श्लो.सं. | | स.सं. | सर्गनाम | श्लो.सं. |
| १ | दूतविनियोगः | ३७ | | १ | दूतविनियोगः | ४० |
| २ | द्रौपदीवाक्यम् | ३७ | | २ | द्रौपदीवाक्यम् | ३८ |
| ३ | भक्तभगवत्समागमः | ३५ | | ३ | भक्तभगवत्समागमः | ३५ |
| ४ | कुन्तीकृष्णसंवादः | ३२ | | ४ | कुन्तीकृष्णसंवादः | ३३ |
| ५ | सामप्रयोगः | ६० | | ५ | सामप्रयोगः | ६९ |
| ६ | भेदप्रयोगः | ७५ | | ६ | भेदप्रयोगः | ८३ |
| **७** | **युद्धोद्योगः** | **३९** | | **७** | **दण्डोद्योगः** | **४०** |
| ८ | कुरुक्षेत्रयुद्धम् | ८८ | | ८ | कुरुक्षेत्रयुद्धम् | १०४ |
| ९ | दुर्योधनोरुभङ्गः | ४९ | | ९ | दुर्योधनोरुभङ्गः | ५३ |
| १० | सौप्तिकम् | ३३ | | १० | सौप्तिकम् | ३४ |
| ११ | दिव्यास्त्रप्रयोगः | ३३ | | ११ | दिव्यास्त्रप्रयोगः | ३३ |
| १२ | द्रौणिनिग्रहः | ४० | | १२ | द्रौणिनिग्रहः | ५२ |

सारणी १.१० : पाण्डवविजयस्य स.सं, श्लो.सं.

## महाकाव्ये उल्लिखितानि मुख्यानि गौणानि च चरित्राणि


| चरित्रस्य प्रकारः | चरित्राणि | चरित्रनामानि | परिचयः |
|---|---|---|---|
| मुख्यानि चरित्राणि | नायकः | पाण्डवाः | इन्द्रप्रस्थाधिकारिणः |
| | नायिका | द्रौपदी | पाण्डवजाया, द्रुपदात्मजा |
| | प्रतिनायकः | दुर्योधनः | हस्तिनापुरयुवराजः, धार्त्तराष्ट्रश्च |
| | | अश्वत्थामा | द्रौणिः |
| | नायक - सम्बन्धिनि | पाण्डुः | पाण्डवानां पिता |
| | | कुन्ती | पाण्डवजननी |
| | | श्रीकृष्णः | पाण्डवदूतः |
| | | विदुरः | हस्तिनापुरमन्त्री, माधवभक्तश्च |
| | | सात्यकिः | यदुवीरः कृष्णसहचरश्च |

| | | | |
|---|---|---|---|
| **गौणानि चरित्राणि** | | द्रुपदः | पाञ्चालेश्वरः |
| | | धृष्टद्युम्नः | द्रुपदात्मजः, पाण्डवसेनापतिश्च |
| | | शिखण्डी | अम्बायाः अस्त्रीभूतो रूपः |
| | | विराटः | मत्स्यनरेशः |
| | | उत्तरा | विराटात्मजा, अभिमन्युभार्या च |
| | | अभिमन्युः | अर्जुनसुभद्रयोः पुत्रः |
| | | घटोत्कचः | भीमहिडिम्बयोः पुत्रः |
| | | द्रौपदीपुत्राः | अस्वथ्थाम्ना निहताः |
| | | द्वैपायनः | कृष्णद्वैपायनवेदव्यासः |
| | **प्रतिनायक-सम्बन्धिनि** | भीष्मः | देवव्रतः, शान्तनुसुतश्च |
| | | कृपाचार्य्यः | कौरवकुलगुरुः |
| | | कृपी | द्रोणपत्नी, अश्वथ्थामाजननी |
| | | आचार्य्यः | द्रोणाचार्य्यः, कौरवानामस्त्रगुरुः |
| | | धृतराष्ट्रः | हस्तिनापुरनरेशः |
| | | शकुनिः | गान्धारेश्वरः, दुर्य्योधन-मातुलः |
| | | सौवलः | शकुनिसुत उलुकः |
| | | दुःशासनः | धर्त्तराष्ट्रः, दुर्य्योधनभ्राता |
| | | कर्णः | अङ्गराजः |
| | | जयद्रथः | सिन्धुनरेशः, धृतराष्ट्रजामाता |
| | | शल्यः | मद्रनरेशः, पाण्डवमातुलः |
| | | भगदत्तः | प्राग्ज्योतिषपुराधिपतिः |
| | | सोमदत्तः | कुरुवंशीयो वाह्लीकराजपुत्रः |
| | | वृहद्बलः | कोशलाधिपः |
| | | सुशर्मा | त्रिगर्ताधिपतिः |
| | | कृतवर्मा | भोजवंशीयो यादवप्रधानः |

सारणी १.११ : पाण्डवविजयस्य चरित्राणि

## खण्डकाव्यानि

### *सत्यभामापरिग्रहम् (खृः १९१३)* [१]


सत्यभामापरिग्रहम्
काव्यम् ।
परशुरामचरित, रुक्मिणीहरण, सुभद्राहरणप्रभृति
काव्यरचयित्रा
एम्, ए, कविभूषणोपाधिना
श्रीहेमचन्द्ररायेण कृतम् ।
पावनावास्तव्येन तेनैव प्रकाशितम् ।


"तत्रैव गङ्गा यमुना च तत्र
गोदावरी तत्र सरस्वती च ।
सर्व्वाणि तीर्थानि वसन्ति तत्र
यत्राच्युतोदारकथाप्रसङ्गः ॥"
पाण्डवगीता ।

संवत् १९७२ ।

मूल्यं रजतपादमात्रम् ।

चित्रम् १.९ : आख्यापत्रम्, सत्य.प.(प्र.सं.)

[१] सत्य.प.(प्र.सं., द्वि.सं.)


Presented to Sanskrit Sahitya Parishat Library. Hem Chandra Ray Pabna.

सत्यभामापरिग्रहम्।

( खण्डकाव्यम्। )

सपरिशिष्टम्।

'रुक्मिणीहरण' 'पाण्डवविजय' प्रभृतीनां काव्यानां
रचयित्रा
एम्. ए. कविभूषणोपाधिना
श्रीहेमचन्द्ररायेण विरचितम्।

अन्तरान्तरा परिवर्त्य परिवर्द्ध्य च पुनः संस्कृतम्।

पावना 'हेमकुटी'भवनाद् ग्रन्थकारेण प्रकाशितम्।

"तत्रैव गङ्गा यमुना च तत्र
गोदावरी तत्र सरस्वती च।
सर्व्वाणि तीर्थानि वसन्ति तत्र
यत्राच्युतोदारकथाप्रसङ्गः॥" पाण्डवगीता।

*Price Annas Six only*] [मूल्यमाणकषट्कम्।

चित्रम् १.१० : आख्यापत्रम्, सत्य.प.(द्वि.सं.)

कवेरस्यास्ति 'सत्यभामापरिग्रहम्' इति खण्डकाव्यम् । अत्र सन्ति चत्वारः सर्गाः । काव्यस्यास्य संस्करणद्वयमेवोपलभ्यते, तत्र प्रथमसंस्करणस्य प्रकाशकालः १९१३ खृष्टाब्दः, मूल्यमासीद् रजतपादमात्रम् । खण्डकाव्यस्यास्य द्वितीयसंस्करणस्य प्रकाशकालः १९३२ खृष्टाब्दः । संस्कृतसाहित्यपरिषदि अस्य चत्वारि पुस्तकानि सन्ति । तेषु एका प्रतिलिपिः ग्रन्थकारेण सूपायनीकृतम् अक्षयकुमारपञ्चतीर्थस्य करकमलेषु ।

सत्यभामया सह श्रीकृष्णस्य परिणयवृत्तान्त एव उपजीव्यरूपेण परिगृह्यते कविभूषणेनामुना अस्मिन् सत्याभामापरिग्रहे काव्ये । कवेः परमश्रद्धेयाध्यापकेन पावनास्थितेन दर्शनविद्यालयाध्यापकेन श्रीयुक्त-फणिभूषण-तर्कवागीशमहाभागेन खण्डकाव्यस्यास्य मूलं संशोधितम् । खण्डकाव्यस्यास्य संस्करणद्वयस्यैव सम्मुखे पृष्ठे समुद्धृतः पाण्डवगीतातः श्लोकोऽयम्, यथा –

"तत्रैव गङ्गा यमुना च तत्र गोदावरी तत्र सरस्वती च ।
सर्व्वाणि तीर्थानि वसन्ति तत्र यत्राच्युतोदारकथाप्रसङ्गः ॥ "[1] इति।

काव्यस्यास्य प्रथमे संस्करणे सर्गचतुष्टयस्य नामानि सन्ति, परन्तु द्वितीये संस्करणे सर्गनामानि न दृश्यन्ते ; दृश्यते तूभये संस्करणे श्लोकसंख्यागतं वैभिन्न्यं प्रत्येकेषु सर्गेषु । अतः अधुना प्रथमसंस्करणगतानि चत्वारि सर्गनामानि तथा संस्करणद्वयस्य श्लोकसंख्यागतं वैचित्र्यमपि उपस्थाप्यन्ते, यथा –

| **सत्यभामापरिग्रहम्** | | | |
|---|---|---|---|
| **स.सं.** | **सर्गनामानि** | **सर्गाणां श्लोकसंख्या** | |
| | | **प्र.सं.** | **द्वि.सं.** |
| १ | कृष्णाभिशस्तिः (प्र.सं.) | ३४ | ३२ |
| २ | मणिविचयः (प्र.सं.) | ५१ | ६५ |
| ३ | जाम्बवत्समागमः (प्र.सं.) | ३३ | ३४ |
| ४ | परिग्रहः (प्र.सं.) | २७ | ३३ |

सारणी १.१२ : सत्यभामापरिग्रहस्य संस्करणद्वयस्य सर्गाः, श्लोकाश्च

अस्मिन्नपि काव्ये रसकथनविषये दृश्यते कवेः नीरवता ।

[1] सत्य.प.(प्र.सं., द्वि.सं.) सम्मुखे पृष्ठे

## सत्याभामापरिग्रहे उल्लिखितानि मुख्यानि गौणानि च चरित्राणि

| चरित्रस्य प्रकारः | चरित्राणि | चरित्रनामानि | परिचयः |
|---|---|---|---|
| मुख्यानि चरित्राणि | नायकः | श्रीकृष्णः | द्वारकाधीशः |
| | नायिका | सत्यभामा | सत्राजितस्तनया |
| | प्रतिनायकः | सत्राजित् | स्यमन्तकमणेः प्रभुः |
| गौणानि चरित्राणि | नायकसम्बन्धिनि | चारः | श्रीकृष्णचरः |
| | | दारुकः | श्रीकृष्णसारथिः |
| | | ऋक्षकुमारः | जाम्बवतः सुतः |
| | | धात्री | ऋक्षकुमारधात्री |
| | | जाम्बवान् | ऋक्षयूथपः |
| | | जाम्बवती | जाम्बवतस्तनया |
| | | रुक्मिणी | श्रीकृष्णमहिषी |
| | प्रतिनायकसम्बन्धिनि | प्रसेनः | सत्राजितो भ्राता |

सारणी १.१३ : सत्यभामापरिग्रहस्य चरित्राणि

### *दशावतारस्तोत्रम्*[१]

'रुक्मिणीहरणमि'ति महाकाव्यस्य द्वितीयसंस्करणस्य परिशिष्टमिति अंशे **'दशावतारस्तोत्रमि'**ति एकादशश्लोकात्मकं स्तोत्रकाव्यमपि अस्ति । जयदेवस्य गीतगोविन्दगतं दशावतारस्तोत्रम् अनुसृत्य एव हेमचन्द्रेण प्रणीतमिदं काव्यम् । पुनः एतदपि अहं वक्तुं शक्यते यत्, ऊनविंशे शतके हेमचन्द्ररायकविभूषणं तथा गणपतिसरकारविद्यारत्नं विहाय सम्भवतो नान्यः कोऽपि आसीद् 'दशावतारस्तोत्र'विरचने उद्योगी । जयदेवस्य गीतगोविन्दगते दशावतारस्तोत्रे यथा प्रत्येकश्लोकस्य उत्तरार्धे "जय जगदीश हरे" इति अंशो विराजते तथैव हेमचन्द्रप्रणीते दशावतारस्तोत्रेऽपि "स जयतु" इति अंशो दृश्यते प्रत्येकश्लोकस्य पूर्वार्धे, तदुदाहरणं यथा –

"स जयतु मीनाकृतिरवतारः । प्रलयापदि कृतो वेदोद्धारः ॥१॥...
स जयतु विश्रुतवर्त्मा बुद्धः । प्राणिहिते हितसाधनशुद्धः ॥९॥"[२]

---

[१] रुक्मिणी.ह.(द्वि.सं.) परिशिष्टे दश.स्तो.(हेम.) पृष्ठे. १०८

[२] तत्रैव. तत्पृष्ठे

## संस्कृतानूदितं खण्डकाव्यम्

### *पतिदानव्रतम्*[१]

सत्यभामापरिग्रहस्य द्वितीयसंस्करणस्य परिशिष्टे हेमचन्द्रप्रणीतं **'पतिदानव्रतमि'ति** लघुकाव्यमपि संयोजितम् अस्ति । काव्यमिदं नवत्रिंशत्श्लोकात्मकं खण्डकाव्यमेव । माधवस्य अखण्डप्रेमलाभाय सत्यभामया नारदहस्ते श्रीकृष्णदानात् परं नारदात्तस्य निष्क्रय इति पुण्यकव्रतमित्याख्यं व्रतमेव 'पतिदानव्रतमि'ति काव्यस्यास्य उपजीव्यम् । उपाख्यानमिदं केवलं प्रचलति वङ्गभूमिषु, वस्तुतो वङ्गीयकवेः काशीरामदासकृतस्य महाभारते, सुप्रसिद्धस्य पाँचालीरचयितुः सुकवेः दाशरथिरायस्य 'सत्यभामार् व्रत पाँचाली' इति वङ्गभाषानिबद्धायां रचनायामेव विद्यते । लिखितमिदं काव्यम् अनुष्टुपिति छन्दसा कविनामुना । काव्येऽस्मिन् शृङ्गारहास्यरसयोः अवस्थितिर्दृश्येते । काव्यमिदं यथा साहित्यदर्पणदृशा खण्डकाव्यरूपेण तथा शृङ्गारप्रकाशदृशा आख्यानप्रबन्धरूपेणापि प्रतिभातीति । परन्तु न केवलमेतत्, कविकृतिरियं मूलतः दाशरथीरायस्य 'सत्यभामार् ब्रत पाँचाली' इति रचनायाः भावानुवादरूपेणैवापि प्रतिभाति सकाशे मे । अस्मिन् विषये सम्यग् आलोचना विद्यते शोधप्रबन्धस्यास्य तृतीये अध्याये द्वितीये भागे ।

### काव्येस्मिन् उल्लिखितानि मुख्यानि गौणानि च चरित्राणि

| चरित्रस्य प्रकारः | चरित्राणि | चरित्रनामानि | परिचयः |
|---|---|---|---|
| मुख्यानि चरित्राणि | नायिका | सत्यभामा | तृतीया महिषी |
| | | रुक्मिणी | प्रथमा महिषी |
| | नायकः | श्रीकृष्णः | द्वारकाधीशः |
| | मुख्यसहायकः | नारदः | देवर्षिः |
| गौणानि चरित्राणि | नायिकासम्बन्धिनि | सपत्न्यः | श्रीकृष्णस्य पत्न्यः |
| | | जनाः | द्वारकावासिनः |

सारणी १.१४ : पतिदानव्रतस्य चरित्राणि

## महाकवेः हेमचन्द्ररायकविभूषणस्य चरित्रानुसन्धानम्

महाकवेः हेमचन्द्ररायस्य तस्य पितुः पितृष्वसायाः तथा तस्य कर्मक्षेत्रस्य उल्लेखं व्यतिरिच्य अन्यत् किमपि तथ्यं नोपलभ्यते जीवनविषये अधुनापि । अतो महाकवेरस्य चरित्रप्रसङ्गे ज्ञानार्जनाय तस्य काव्यकृतीनां

[१] सत्य.प.(द्वि.सं.) परिशिष्टे पति.व्र. पृष्ठेषु १-४

गभीराध्ययनमेव अत्यावश्यकमिति । यतः कवेरस्य प्रकृतिः कीदृशी आसीत्, आसीत्तस्य जीवनदर्शनं किम्, आसीत् शास्त्रे धर्मे च आस्था न वा – इत्यादीनां प्रश्नानामुत्तरं महाकवेः साहित्यपाठात्तथा विश्लेषणादेव ज्ञातुं शक्यते ।

हेमचन्द्रस्य काव्यकृतिषु विहितेभ्यो मङ्गलाचरणेभ्यो ज्ञायते यदासीत् स नम्रः, विनयी, अहंकारविविक्तः, सातिशयस्पष्टभाषी, कृतज्ञतापरायणो जनः। एतेषु केवलं तस्य स्पष्टभाषित्वस्य उदाहरणं प्रदीयते –

"ये दोषान्वेषणव्यग्रा घूका इव समत्सराः।
वाक्छटापि रुजे तेषां सत्कवेभारवेरिव ॥७॥"[१] इति ।

न केवलं काव्यस्य मङ्गलाचरणे, समग्रे काव्येऽपि महाकवेरस्य धर्मविश्वासस्य सुष्ठुपरिचय एवोपलभ्यते ; यतः काव्यकृतिषु सर्वत्रैव (काव्यारम्भे, काव्यान्ते, काव्यानां कथावस्तु चयनेऽपि) कवेः कृष्णभक्तिस्तु परिस्फुटिता ।

हेमचन्द्रस्य काव्यपाठेन एतदनुमीयते यदासीत् कविरयं अर्थनैकितसुखदुःखानुभूतो जनः। यतः तस्य काव्यकृतिषु पाण्डवविजये पाण्डवानां वनवासगतं दैन्यं यथा वर्णितमस्ति तथैव अन्यत्रेषु तु दृश्यते सुखावहजीवनस्य चित्रणमिति ।

महाकविं कालिदासमिव हेमचन्द्रस्य काव्यकृतिषु अपि सौन्दर्य्यस्य उपासनं दृश्यते । यतः कवेरस्य काव्येषु प्राकृतिकसौन्दर्य्यम्, नरनार्य्योः रूपसौन्दर्य्यम्, लोकव्यवहारसौन्दर्य्यम्, चरित्राणां मानसिकसौन्दर्य्यम् इत्यादीनि वर्णितानि । परन्तु सत्राजितः चरित्रे मानसिकदैन्यस्य वर्णनमुपलभ्यते माधवविषये मिथ्यापवादप्रचारणद्वारेण ।

पुनः जन्मान्तरवादतत्त्वे तथा अवतारतत्त्वे हेमचन्द्रस्य विश्वासमस्तीति दृश्यते तदीये दशावतारस्तोत्रे, पतिदानव्रते, परशुरामचरिते, सत्यभामापरिग्रहे चेत्यादिषु काव्येषु ।

हेमचन्द्रस्य साहित्यानि पठित्वा एतदवगम्यते यत् कविरयं दुःखमेव जीवनस्य मूलमिति न स्वीकरोति । परन्तु जीवनस्याङ्गभूतस्य दुःखस्य प्रासङ्गिकत्वमपि न अस्वीकृतं कविनामुना हेमचन्द्रेण । यतस्तस्य काव्यकृतिषु यथा करुणस्य प्रावल्यं दृश्यते तथैव वीरस्य प्रावल्यमपि नयनपथमायाति, तेन सह भक्तिशृङ्गारयोः उपस्थितिरपि दृश्यते । परन्तु एतान् व्यतिरिच्य एक एव विषयः तस्य काव्येषु प्रावल्येनैव स्पुटितः, स एव धर्मस्य सत्यस्य च विजय एवेति । यतः कवेरस्य सकाशे दुःखमिलनभक्तिप्रेमवीरादिभ्यः असत्यस्य तथा अधर्मस्योपरि सत्यधर्मयोः विजय एवासीद् गुरुत्वपूर्ण इत्याशयो मे ।

हेमचन्द्रस्य काव्यानि पठित्वा मन्ये यद्, नासीद् महाकविरयं रसिकजन इति । यतस्तस्य विरचनेषु सरसाः चातुर्यपूर्णा उक्तयः, विचित्रवेशाः, अद्भुताङ्गवैकल्यानि इत्यादीनि नोपलब्धानि । अपि तु पतिदानव्रतं व्यतिरिच्य

[१] पा.वि.(द्वि.सं.) मङ्गलाचरणे

हास्यरसस्य उपस्थितिरपि नास्ति अन्येषु काव्येषु, दृश्यते तु वीररसस्य तथा युद्धस्य प्राचुर्य्यमेव केवलमिति । प्रसङ्गत उल्लेख्यं यद्, हेमचन्द्रस्य सारस्वतसाधनायाः प्राथमिकी कालसीमा प्रायः १९०४-१९१६ खृ., यतः अस्यां कालसीमायामेव हेमचन्द्रस्य काव्यानां प्रथमसंस्करणानां प्रकाशनमभूत् । समये अस्मिन् पराधीने भारते युद्धस्य प्रचुर्य्यं यथा दृश्यते तथैव सशस्त्रराजद्रोहानामुपस्थितिरपि दरीदृश्यन्ते, यथा –

| **युद्धम् /राजद्रोहः/ आन्दोलनम्** | **समयः** | **पक्षः** | **विपक्षः** |
|---|---|---|---|
| तिव्वताङ्गलयोर्युद्धम् | १९०३-०४ खृ. | ब्रिटिशभारतः | तिव्वत् |
| वङ्गभङ्गविरोधान्दोलनम् | १९०५ खृ. | ब्रिटिशप्रशासनः | वङ्गवासिनः |
| बम्बाठाविद्रोहः | १९०६ खृ. | ब्रिटिशभारतः | जुलुजातिगोष्ठीया जनाः |
| बजार् भैलि क्याम्पेन् | १९०८ खृ. | ब्रिटिशभारतः | आफ्रिदिजातिगोष्ठीया जनाः |
| आलिपुरविस्फोरणम् | १९०८ खृ. | ब्रिटिशप्रशासनः | विप्लविनः (खुदिरामादयः) |
| करजनस्य विल्लेः वधम् | १९०९ खृ. | ब्रिटिशप्रशासनः | विप्लविनः |
| हाओडा ग्याङ्ग् केस् | १९१० खृ. | ब्रिटिशप्रशासनः | विप्लविनः |
| दिल्लि-लाहोरषडयन्त्रम् | १९१२ खृ. | ब्रिटिशप्रशासनः | विप्लविनः |
| घदरान्दोलनम् | १९१३ खृ. | ब्रिटिशप्रशासनः | घदरिति विप्लवीसमुहः |
| बालेश्वरयुद्धम्/बुडिबालाम्युद्धम् | १९१५ खृ. | ब्रिटिशप्रशासनः | विप्लविनः (यतीन्द्रनाथमुखोपाध्यायादयः) |
| प्रथमविश्वयुद्धम् | १९१४-१८ खृ. | मित्रशक्तिः | केन्द्रीयशक्तिः |

सारणी १.१५ : युद्धानि, राजद्रोहाश्च (१९०४-१६ खृ.)

सम्भवतः, एषा पारिपार्श्विकी स्थितिरेवासीद् युद्धविग्रहान्विते वीररसावच्छिन्ने काव्यप्रणयने अस्य कवेः प्रेरणा ।

एतद्व्यतीत्य हेमचन्द्ररायकविभूषणो विवाहावच्छिन्नः ससन्तान आसीन्न वा इत्यस्य उल्लेखोऽपि नोपलभ्यते अधुनापि । तथा हि तस्य काव्येषु नारीणां पीडा, विचक्षणता, प्रणयस्याभिजात्यम्, व्यक्तित्त्वशीलतापि प्रकाशिता । अत एव अन्तिमे वक्तुं शक्यते यदासीद् महाकविरयं विनयी ; निरहंकारी ; स्पष्टभाषी ; कृतविद्यः ; कारयित्री, भावयित्री चेति प्रतिभासम्पन्नः पुरुषो ; वासुदेवभक्तश्च । अतः अनेनैव प्रकारेण अध्यायस्यास्य द्वितीयो भागोऽयं समाप्यते । इति शम् ।

***********************

# ✠ द्वितीयोऽध्यायः ✠

## ॥ हेमचन्द्रप्रणीतानि महाकाव्यानि ॥

## (संक्षिप्तं समीक्षणम्)

हेमचन्द्रीयेषु काव्यकृतिषु सन्ति पञ्च महाकाव्यानि, यथा ‘परशुरामचरितम्’, ‘हैहयविजयम्’, ‘सुभद्राहरणम्’, ‘रुक्मिणीहरणम्’, ‘पाण्डवविजय’श्चेति । एतेषु केवलं त्रयमेवाधारीकृत्य संक्षिप्तं समीक्षणं विधीयते शोधप्रबन्धस्यास्य अस्मिन्नेवाध्याये । तेषु अन्तर्याति कवेरस्य प्रथमकाव्यकृतिभूतं परशुरामचरितम्, ततः परं द्वितीयविरचनं हैहयविजयम्, अथ सम्भवतः तस्यान्तिमकाव्यं पाण्डवविजयश्चेति काव्यत्रयम् । संक्षिप्ते समीक्षणेऽस्मिन् सन्ति केवलं काव्यत्रयस्य उत्सालोचनम्, समासेन प्रतिसर्गाख्यानकथनम्, साहित्यदर्पणानुसारेण महाकाव्यत्वविचारणम्, अपराणां वैशिष्ट्यानां समासेनालोचनञ्चेति ।

## उत्सप्रसङ्गालोचनम्

### ⅄ परशुरामचरितम्

महाकाव्यमिदं हेमचन्द्रस्य प्रथमा काव्यकृतिरेव । परशुरामसम्बन्धिनि आख्यानानि प्राप्यन्ते महाभारते, रामायणे तथा वहुषु पुराणेषु यथा - ब्रह्माण्डपुराणे, श्रीमद्भागवते अष्टमे स्कन्धे, कूर्मपुराणे, वराहपुराणे, विष्णुपुराणे, ब्रह्मवैवर्तपुराणे, लिङ्गपुराणे, मत्स्यपुराणे, अग्निपुराणे, वायुपुराणे चेति । एतेषु महाभारते तथा ब्रह्माण्डपुराणे परशुरामस्य जीवनचर्या विस्तृततया वर्णिता, परन्तु उभयत्र वृत्तान्तगतं वैसादृश्यं नयनपथमुपैति । एतयोर्मध्ये महाभारतमेव हेमचन्द्रग्रथितस्य परशुरामचरितस्य कृते उत्सत्वमर्हति, द्वयोः वृत्तान्तविन्याससादृश्यात् । परन्तु हेमचन्द्रेण महाभारतगतो वृत्तान्तविन्यासः पुङ्खानुपुङ्खतया नानुस्रियते, यतो युगपत् स्वकीयं संयोजनं वियोजनञ्चावलोक्यते । यथा –

क. महाभारते शान्तिपर्वणि तथा ब्रह्माण्डपुराणे दृश्यते यत्, जमदग्नेराश्रमे आतिथ्यलाभादनन्तरं मुनेः गोहरणकाले राज्ञो मन्त्रिणा जमदग्नेः हननम् अभूद्, अथ शुक्राचार्येण स मुनिः पुनर्जीवितो जातः । परन्तु परशुरामचरिते चतुर्थे सर्गे गोहरणावसरे कार्त्तवीर्य्यार्जुनेन जमदग्निवधः, शुक्राचार्य्येण तस्य मुनेः पुनर्जीवनलाभश्चेति वृत्तान्तद्वयं नोपलभ्यते ।

ख. उत्सभूते महाभारते गोहरणविषये मातया रेणुकया सह परशुरामस्य कथोपकथनं न दृश्यते, परन्तु अत्रत्ये परशुरामचरिते पञ्चमे सर्गे आश्रमागमनात् परं पितरं दृष्ट्वा मातुः सकाशाद् परशुरामेण गोहरणवृत्तान्तस्य श्रवणं दृश्यते । अत्र मातुः रेणुकाया उक्तिषु गोहरणवर्णनेन सह आश्रमपादपनाशवर्णनं, कृतवीर्य्यसुनूना जमदग्नेरुपहासवर्णनम्, कार्त्तवीर्य्यस्य निन्दा तथा हैहयस्य निग्रहणाय परशुरामं प्रति आदेशप्रदानमित्यादयरेव सन्निवेशिताः। प्रसङ्गत उल्लेख्यं यद्,

ब्रह्मवैवर्तपुराणे परशुरामेण मातुः सकाशात् गोहरणादीनां वृत्तान्तानां श्रवणं दृश्यते ; परन्तु तत्र मात्रा रेणुकया हैहयनिग्रहादेशप्रदानं न दृश्यते । दृश्यते तु हैहयनिग्रहितुकामं पुत्रं परशुरामं प्रति अमर्षत्यागादेश इति ।

ग. परशुरामचरिते षष्ठे, सप्तमे च सर्गे हैहयजामदग्न्ययोः युद्धे परशुरामस्य अस्त्राघातेन कार्त्तवीर्य्यार्ज्जुनो मूर्छितो जातः, ततः परं पुनः चेतनां प्राप्य स सहस्रबाहुः समराभिगमनाय सारथिमादिदेश । अस्मिन्नेवावसरे दृश्यते यत्, महिष्या एवावरुध्यते कार्त्तवीर्य्यस्य मार्गः। मार्गावरोधादनन्तरमस्ति पत्निना सह कार्त्तवीर्य्यस्य कथोपकथनम्, वार्त्तालापेऽस्मिन् अर्ज्जुनं प्रति तस्या युद्धपरिहाररूपो राजनैतिकोपदेशः, अर्ज्जुनेन तदुपदेशस्य याथार्थ्यखण्डनात् परं युद्धाभिगमनं, अर्ज्जुनस्य विनाशमनुभूय महिष्या पत्युः पूर्वं स्वर्गारोहणोद्योगश्चेत्यादयो विषयाः सन्निवेशिताः। परन्तु एतादृशं कथोपकथनं यथा महाभारते नास्ति तथैव अन्यत्रापि न चित्रितमस्तीति । अतः कथोपकथनमिदं कवेः स्वकीयं संयोजनमेव ।

घ. प्रसङ्गत उल्लेख्यं यत्, ब्रह्मवैवर्तपुराणे जमदग्नेः होमधेनुरूपेण कपिलाया उल्लेखो दृश्यते, महाभारते तथा ब्रह्माण्डपुराणे तु दृश्यते सुशीलाया उल्लेखः। अस्माद् वैमत्याद् मुक्तिकामिना कविनामुना हेमचन्द्रेण तस्य परशुरामचरिते केवलं "मुनिहोमसाधनीं धेनुमि"ति प्रयोगः क्रियते, नामोल्लेखस्तु न दृश्यते ।

## ⅄ हैहयविजयम्

हेमचन्द्रस्य काव्यकृतिषु द्वितीयभूतस्यास्य महाकाव्यस्य उत्सत्वेन केवलं रामायणमेव स्वीकर्तुं शक्यते । यतः रावणार्ज्जुनयोः आख्यानं केवलं रामायणे एव प्राप्यते, मानमस्मिन्विषये "Puranic Encyclopedia" इति कोषग्रन्थः। यद्यपि आख्यानमिदमवलम्ब्य भट्टेन भीमेन प्रणीतं 'रावणार्ज्जुनीयमि'ति महाकाव्यम्, तदेव महाकाव्यन्तु नार्हति हैहयविजयस्य उत्सत्वं यतः वृत्तान्तविन्यासे हेमकवेः महाकाव्यमिदं रामायणमेव अनुसरति । रामायणे उत्तरे काण्डे सर्गत्रितये (सर्गाः ३६-३८) वर्णितमाख्यानमिदमाधारीकृत्य कविना हेमेन ग्रथितं नवसर्गात्मकमिदं काव्यम् । अतः काव्यकृतौ अस्मिन् वृत्तान्तविन्यासे कवेः स्वकीयता त्वनिवार्यैवेति । प्रसङ्गेऽस्मिन् कवेरस्य स्वकीयता दृश्यते स्थानत्रितये, यथा –

क. आदौ प्रथमे सर्गे हैहयस्य चरितवर्णने । यतो रामायणे कार्त्तवीर्य्यार्ज्जुनस्य चरितस्य वर्णनमस्ति श्लोकद्वये, परन्तु हैहये कार्त्तवीर्य्यार्ज्जुनस्य चरितवर्णने समग्रः सर्ग एव व्ययितो जातः।

ख. ततः परं समग्रे द्वितीये सर्गे सहस्रवधूभिः सह रेवायां जलक्रीडावर्णने दृश्यते कवेर्हेमचन्द्रस्य स्वकीयता । यतो रामायणे उत्सरूपेण चिह्निते अंशे जलक्रीडायाः केवलं उल्लेखो दृश्यते, नास्ति किमपि वर्णनमिति ।

ग. काव्येऽस्मिन् तृतीये सर्गे रावणस्य चरितवर्णने चतुर्दशसंख्यकाः श्लोका व्ययिता जाताः, रामायणे उत्सभूते अंशे तु नोपलभ्यते रावणस्य चरितवर्णनमिति ।

सर्गानेतान् व्यतिरिच्य शेषेषु सर्गेषु रामायणोक्तस्य वृत्तान्तस्यैव अनुसरणं दृश्यते, अतो हैहयविजयमिति काव्यस्य कृते रामायणस्य उत्सत्वमेव यथार्थमित्यभिप्रायो मे ।

## ⅄ पाण्डवविजयम्

महाकाव्यस्यास्य उत्सरूपेण साधारणतया महाभारतमेव सर्वाग्रे अस्माकं नयनपथमुपैति । परन्तु महाभारतं व्यतिरिच्य अन्यानि कानिचन काव्यानि तथा पुराणान्यपि अस्य उत्सत्वं लब्धुमर्हन्ति, तानि यथा - 'अग्निपुराणम्', 'देवीभागवतम्', वासुदेवकवेः 'युधिष्ठिरविजयम्', क्षेमेन्द्रकवेः 'महाभारतमञ्जरी' इत्यादीनि काव्यानि पुराणानि च ।

### ✓ *अग्निपुराणम्*

अत्र 'आदिपर्वादिवर्णनमि'ति त्रयदशाध्यायस्य श्लोकचतुष्टये (२६-२९ श्लोकाः) सन्ति शमस्थापनाय श्रीकृष्णेन हस्तिनापुराभिगमनम्, दौत्ये विफले माधवस्य प्रत्यावर्तनम्, युद्धस्योध्योगश्च । अथ 'महाभारतवर्णनमि'ति चतुर्दशाध्याये द्वाविंशतिषु श्लोकेषु (१-२२ श्लोकाः) विद्यते भीष्मपर्वणः सौप्तिकं यावद् (विशेषतः द्रौणिनिग्रहपर्यन्तम्) वर्णिता महाभारतकथा । उदाहरणतया श्लोकोऽयमुद्ध्रियते –

"पुत्रहीनां द्रौपदीं तां रुदन्तीमर्ज्जुनस्ततः ।
शिरोमणिस्तु जग्राह ऐषिकास्त्रेण तस्य च ॥१४/२२॥"[१]

### ✓ *देवीभागवतम्*

इह द्वितीयस्कन्धे सप्तमे अध्याये श्लोकषट्के (१-६ श्लोकाः) सन्ति सौभदेयस्य द्रौपदेयानाञ्च पञ्चत्वप्राप्तेः वर्णनम्, उत्तरया मृतपुत्रप्रसवः, कृष्णेन तस्मै पुनर्जीवनप्रदानम्, परीक्षिदिति नामकरणवृत्तान्तस्य वर्णनञ्चेत्यादयः ।

---

[१] अग्नि.पु.(तर्करत्न.) पृष्ठे २७

### ✓ *युधिष्ठिरविजयम्*

केरलनिवासिनो महाकवेः वासुदेवस्य युधिष्ठिरविजयस्यास्य सप्तमे अष्टमे च सर्गे पाण्डवविजयनिष्ठं वृत्तमुपलभ्यते ।

### ✓ *महाभारतमञ्जरी*

क्षेमेन्द्रप्रणीते महाभारतमञ्जर्यामपि अनुरूपमेवोपलभ्यते यतोऽत्र समग्रिकमहाभारतवृत्तस्य संक्षेपणमेव विहितमस्तीति ।

एतेन प्रतीयते यत्, पाण्डवविजयस्य वृत्तान्तविन्यासपरम्परामनुसृत्य केवलं महाभारतमेवास्य उत्सत्वमाप्नोति सम्यक्तया । कविना हेमचन्द्रेणात्र पाण्डवविजये महाकाव्ये तु महाभारतवृत्तं नानुसृतं पुङ्खानुपुङ्खतया । विशेषेषु स्थानेषु उपलभ्यन्ते कवेरस्य स्वकपोलकल्पितसंयोजनभूतानि निदर्शनानि ; यथा –

क) महाकाव्यस्यास्य दूतविनियोग इति प्रथमे सर्गे युधिष्ठिरः कुरुसभायां दौत्याय केशवमनुरुरोध, ईदृशः अनुरोधो महाभारतस्य भगवद्-यानपर्वाध्याये युधिष्ठिरवाक्यमिति सप्तषष्टितमाध्याये १३-८६ इत्यादिषु श्लोकेषु, पुनः ९०-१०० इत्यादिषु श्लोकेषूपलभ्यते विस्तृततया । परन्तु अनुरोधस्यास्य उत्तरे सन्धेरसाफल्ये युद्धमेव करणीयमिति मतं प्रतिपादनाय अत्रत्ये कृष्णवाक्यमिति अष्टषष्टितमाध्याये १-४२ तमेषु श्लोकेषु श्रीकृष्णस्य या उक्तिपरम्परा दृश्यते तदत्र नोपलभ्यते । आलोच्ये दूतविनियोग इत्याख्ये सर्गे १३-२१ तमेषु श्लोकेषु दौत्यविषये माधवमुपदिदेश ज्येष्ठपाण्डुसुतः, विषयोऽयं नास्ति महाभारतकथायाम्, यतः तत्र स सदैव कृष्णोपदेशप्रार्थी न तु उपदेशदाता । अत्रत्ये सर्गे दौत्यप्रसङ्गे युधिष्ठिरवचनेभ्योऽनन्तरं सन्ति केवलम् अर्जुनवचनानि । पक्षान्तरे भगवद्-याने विराटसभायां दौत्यविवेचने युधिष्ठिरमाधवयोः आलोचने सात्यकिना सह सभास्थितैः सर्व्वैरेव स्वाभिमतानि उपस्थापितानि । परन्तु कविभूषणेनामुना हेमचन्द्रेण विस्तृतिपरिहाराय भगवद्-याने भीमवाक्यमिति ६९'तमाध्यायात् सहदेवसात्यकिवाक्यमिति ७५'तमाध्यायं यावद् वर्णितानि वृत्तान्युपेक्षितानि । प्रसङ्गत उल्लेख्यं यद्, महाभारते भगवद्-याने दौत्यविवेचने विराटसभायामुपस्थिता आसीद्द्रौपदी । दौत्यविषये तस्याभिमतानि सन्निवेशितानि द्रौपदीकृष्णवाक्यमिति ७६'तमाध्याये, हेमचन्द्रेणापि अध्यायमेनमाश्रित्यैव पाण्डवविजये प्रथमे सर्गे अन्ते द्रौपद्या आगमनं वर्णयित्वा, ततः परं द्रौपदीवाक्यमिति द्वितीये सर्गे कृष्णेन सह तस्याः कथोपकथनान्युपस्थापितानि ।

ख) पाण्डवविजयस्य तृतीये सर्गे कवेः स्वकीयकता परिदृष्टा घटनाविन्यासक्रमे विषयवर्णने च । यतः अत्रत्ये श्रीकृष्णस्य हस्तिनापुरगमनवर्णने महाभारताद् वैसादृश्यमेवोपलभ्यते । महाभरतवृत्तमिव पाण्डवविजयेऽपि सात्यकिना सैन्यैश्च सह माधवो हस्तिनापुरं जगाम ; सायंकाले प्राप्य हस्तिनापुरं सात्यकिसविधे भावियुद्धभीताया नगर्या वर्णनां तथा द्यौत्यस्य भाविव्यर्थतामपि ज्ञापितवान् । परन्तु महाभारते यात्रारम्भे श्रीकृष्णस्य क्रियाकलापः, यात्राकालः, माधवेन सह वशिष्ठवामदेवशुक्रनारदादीनां रथारोहनम्, रथारोहणात् परं कृष्णयुधिष्ठिरयोः कथोपकथनम्, केशवसकाशे अर्ज्जुनस्य युद्धप्रतिज्ञा, भीमस्योत्साह इत्यादीनां वर्णना नोपलब्धा अत्र । ततः परं व्यासमनुसृत्य कविनात्र हस्तिनापुरागतेन कृष्णेन सह दुर्य्योधनविदुरकुन्तीप्रमुखानां साक्षात्कार एव वर्णितः । नानुस्त्रियते तु महाभारतीयक्रमोऽस्मिन् क्षेत्रे । यतो महाभारते हस्तिनागतो माधव आदौ धृतराष्ट्रमभिवाद्य जगाम विदुरगृहम्, ततः परं कुन्तीसविधे गत्वा तामाश्वास्य दुर्य्योधनभवनं ययौ, तत्र दुर्य्योधनसकाशे भोजनप्रस्तावमपनोद्य विदुरगृहे अन्नग्रहणं चकार । पक्षान्तरे पाण्डवविजये तृतीये सर्गे आदौ दुर्य्योधनमाधवयोः साक्षात्कारः, ततः परं विदुरगृहे आतिथ्यग्रहणम्, सर्गान्ते तत्रस्थितया पृथया सह माधवस्य साक्षात्कारः ; अथ कृष्णकुन्तीसंवाद इत्याख्ये चतुर्थे सर्गे शौरेः सकाशे कुन्तीविलापः, शौरिणा विलापातुरायाः पृथायाः समाश्वासनमित्यादयो दृश्यन्ते ।

ग) पाण्डवविजये पञ्चमे षष्ठे च सर्गे कविभूषणेन हेमचन्द्रेण यथाक्रमेण कौरव्यां सभायां सामेन कृष्णस्य शान्तिस्थापनप्रचेष्टा, तच्चेष्टायां व्यर्थता, तस्मात् कर्णस्य कृते भेदप्रयोगः, उपप्लव्यं प्रत्यावर्तनकाले पथि मद्रादिपं प्राप्य कृष्णेन पूर्व्वप्रतिश्रुतं तं कर्णतेजोवधरूपस्य प्रतिश्रुतेः स्मारणमित्यादीनि वृत्तान्युदीरितानि इति । अत्रापि स्वकीयतयैव कथावस्तुनो विन्यासो दृश्यते । प्रथमतः, मूले महाभारते श्रीकृष्णेन एकेनैव दिवसेन दौत्यं सम्पादितम्, हेमचन्द्रेण दिवसद्वयं यावद् दौत्यमिदं सम्प्रसारितमिति । षष्ठे सर्गे ४५'तमे, ४६'तमे च श्लोके दृश्यते यत्, सामे विफले स शौरिः पृथया सह तस्याः कानीनपुत्रमुपजापाय उपाससाद तत्समीपम् ; परन्तु मूले महाभारते केवलं माधव एव हस्तिनापुरत्यागावसरे पाण्डवपक्षावलम्बनाय कर्णमनुरुरोध, बभुव च प्रत्याख्यात उभयत्रैव । परन्तु दृश्यते यत्, कविर्हेमचन्द्रः स्वप्रतिभया कृष्णप्रयुक्तभेदनीतिं व्यासापेक्षया संक्षिप्ततया, अधिकतररमणीयरूपेण, तीव्रतया च उपस्थापयति । पुनः अपर एकः स्वकपोलकल्पितवृत्तान्तोऽपि दृश्यते षष्ठसर्गादौ, तदेव दुर्य्योधनं प्रति धृतराष्ट्रस्य युद्धनिवारणोपदेश इति ।

घ) पाण्डवविजये सप्तमे सर्गे कथावस्तुनि उद्योगपर्वणः सैन्यनिर्याणपर्वाध्यायः, उलूकदूतागमनपर्वाध्यायः चेति अध्यायद्वितयस्य समन्वयो दृश्यते । अत्रापि कविना हेमचन्द्रेण नानुस्त्रियते महाभारतीयवृत्तान्तविन्यासक्रमः। यतः महाभारते कुरुक्षेत्रे शिविरस्थापनादनन्तरमभूद् उलूकदौत्यम्,

परन्तु पाण्डवविजये दौत्यमिदमनुष्ठीयते विराटसभायां श्रीकृष्णस्य प्रत्यावर्तनात् परमेव । अत्रत्ये सर्गे कुरूणां युद्धसज्जावर्णनप्रसङ्गे कविभूषणेन वर्णिता केवलं पाण्डवरणसज्जा, द्रौपदीसुभद्रादीनां विषण्णता च । महाभारतानुसारेण बलरामो रुक्मिश्च कुरुक्षेत्रयुद्धाद् आत्मानौ वियुक्तवन्तौ । परन्तु आलोच्ये सर्गे ३९'तमे श्लोके केवलं बलरामस्य तीर्थगमनमेवोपलभ्यते, नोपलभ्यते तु भीष्मकसुतस्य रुक्मेः युद्धवर्जनस्य वृत्तान्तमिति । प्रसङ्गत उल्लेख्यं यद्, उद्योगपर्वणो रथ्यातिरथ-संख्यानपर्वाध्यायः, अम्बोपाख्यानपर्वाध्यायश्चेति अध्यायद्वितयस्य वृत्तं विवर्जितमस्ति अस्मिन् महाकाव्ये ।

ङ) अथ पाण्डवविजयस्य नवमसर्गस्य उपजीव्यः शल्यपर्वणो गदायुद्धपर्वाध्यायः। पर्वाध्यायमेनमनुसृत्य अत्रत्ये सर्गे भीमदुर्य्योधनयोः गदायुद्धम्, दुर्य्योधनोरुभङ्गः, दुर्य्योधनेन पाण्डवकृष्णादीनां तिरस्कारः, दुर्य्योधनसकाशे कृपाश्वत्थामादीनां विलापाः प्रभृतयः उपलभ्यन्ते । परन्तु शल्यपर्वणि गदायुद्धे बलदेवसान्त्वनमिति ५६'तमाध्याये कपटगदायुद्धे भीमेन दुर्य्योधनोरुभङ्गत्वाद् बलदेवस्य क्रोधः तथा तत्क्रोधनिवारणस्य या वर्णना विहिता व्यासेन, सा अत्र विवर्जिता कविभूषणेनामुना ।

च) द्वादशसर्गस्य द्रौणिनिग्रहवृत्तान्तो यद्यपि महाभारतमनुस्रियते तथापि तत्रैकम् अमहाभारतीयवृत्तमपि विद्यते । महाभारते सौप्तिके पर्वणि ऐषिकपर्वाध्याये द्रौणिवधाय भीमगमनमिति द्वादशे अध्याये दृश्यते यत्, पुत्रशोकातुरा क्रोधान्विता द्रौपदी स्वयमेव अश्वत्थाम्नो वधार्थं मणिग्रहणार्थञ्च अनुरुरोध भीमयुधिष्ठिरसकाशे । अश्वत्थामाऽपि अर्ज्जुनसकाशे पराभवं प्राप्य व्यासादेशेन स्वशिरोमणिं पाण्डवेभ्यः अयच्छद् द्रौपदीसान्त्वनमिति षोडशे अध्याये, तदुक्तं व्यासेन –

"प्रदायाथ मणिं द्रौणिः पाण्डवानां महात्मनाम् ।
जगाम विमनास्तेषां सर्व्वेषां पश्यतां वनम् ॥"[१] इति ।

परन्तु पाण्डवविजये आलोच्यमाने सर्गे २६'तमश्लोकतः ३२'तमश्लोकं यावद् दृश्यते द्रौपदीचरित्रस्य पूर्णतयैव भिन्ना भूमिका । सा तत्र अश्वत्थाम्नो मणेः आनयनार्थं नानुरुरोध । व्यासोऽपि न आदिदेश अश्वत्थामानं मणिदानाय अत्र । पक्षान्तरे दृश्यते यद्, अर्ज्जुनेन स द्रौणिः बन्धनपुरःसरं रथोपरि समारोप्य आनीतोऽभूद् द्रौपदीसकाशे । तं द्रौणिं दृष्ट्वा पुत्रशोकाहता सा आदौ मुमोह, ततः परम् अर्ज्जुनाश्वासेन संज्ञां लब्ध्वा गुरुपुत्रस्तु गुरुस्वरूपम् इति मतं सिताश्वसकाशे प्रतिस्थाप्य तं द्रौणिं बन्धनाद् मुमोच । अथ पुत्रवधामर्षप्रदीप्तस्य भीमस्य परितापप्रशमनाय माधवोपदेशेन अर्ज्जुनो द्रौणेः शिरोमणिं सञ्जहार कृपाणेन ।

---

[१] महा.सौप्तिक. (तर्करत्न.) अध्यायः १६. पृष्ठे १७१

# समासेनोदीरणं प्रतिसर्गाख्यानानाम्

## ⅄ परशुरामचरितम्

प्रथमः सर्गः>

रामाविर्भाव इति सर्गेऽस्मिन् कार्त्तवीर्य्यार्जुनवीर्यनिर्जिताः प्रपीडिता नाकसदः विष्णुं प्रपेदिरे । अथ द्वितीय श्लोकतः पञ्चमश्लोकं यावद् विराजते क्षीरसमुद्रे अनन्तशय्यायां शायितस्य हरेः वर्णना । षष्ठश्लोकतः अष्टमश्लोकं यावद् देवान् प्रति हरेरुक्तिरेव विराजते, तदनन्तरं विद्यते देवानां निवेदनं, ततः परं २९'त्तमात् श्लोकात् सर्गान्तं यावद् विद्यते रामाविर्भावस्य वर्णनमिति ।

द्वितीयः सर्गः>

दिव्यास्त्रलाभो नामकेऽस्मिन् सर्गे आदौ अस्ति रामस्य शैशवस्य शिक्षाग्रहणस्य च वर्णना । ततः परं विद्यते दर्पान्वितस्य हैहयार्जुनस्य वर्णना मुनेरापवसकाशाद् अभिशापलाभवृत्तान्तश्च (६-१५श्लोकाः), अथ शिवानुकम्पालाभाय तपस उद्योगः, महेश्वरस्य शिष्यत्वलाभाद् दिव्यास्त्रलाभः, तथा 'परशुरामः' इति अभिधालाभोऽपि अत्र सन्निवेशितः(१६-३८श्लोकाः)।

तृतीयः सर्गः>

जलसंग्रहाय गङ्गायामुपेतया जमदग्निप्रियया रेणुकया कुतूहलात् सुरङ्गनाभीरममाणं गन्धर्व्वराजदर्शनम् । तज्जनितं परपुरुषदर्शनदोषमवगम्य पुत्राणां सकाशे क्रुद्धेन जमदग्निना मातृहत्यादेशदानम्, पुत्रचतुष्टयेन तदादेशलङ्घनत्वात् पित्राभिशापात् तेषामरणीरूपलाभः, परशुरामेण तदादेशपालनादनन्तरं सन्तुष्टस्य पितुः सकाशात् वरप्राप्तिरित्यादीनि वृत्तानि सन्निवेशितानि।

चतुर्थः सर्गः> जमदग्नेः होमधेनुलाभाय जमदग्न्यर्जुनयोः विवादः एव सर्गस्यास्य मूलविषयः ।

पञ्चमः सर्गः>

मात्रादेशेन तथा पितुरुपरि हैहयस्य अत्याचारं दृष्ट्वा हैहयं निगृहीतुकामस्य परशुरामस्य माहिष्मत्याभिमुखं रणप्रयाणस्य वर्णना एव विद्यते अत्र ।

षष्ठः सर्गः> सर्गेऽस्मिन् परशुरामहैहययोः युद्धस्य प्रथमार्धस्य वर्णनमस्ति ।

सप्तमः सर्गः> परशुरामहैहययोः युद्धस्य द्वितीयार्धगतस्याहवस्य वर्णनमस्त्यत्र ।

अष्टमः सर्गः> अत्र च विराजते कार्त्तवीर्यार्जुनवधवृत्तान्तः ।

नवमः सर्गः>

हैहयसुतैः जमदग्निनिधनः, मृतञ्च जनकं दृष्ट्वा रामविलापः, रामेण पितृसत्कारः, मातायाः रेणुकायाः पित्रा सह अग्निप्रवेशः, परशुरामेण हैहयात्मजानां क्षत्रियाणाञ्च निधनप्रतिज्ञा इत्यादय एव सर्गस्यास्य विषयाः ।

दशमः सर्गः>

धरा निःक्षत्रिया जाता परशुरामेण वारैरेकविंशत्या, ततःपरं परशुरामेण कश्यपाय समग्रपृथिवीदानम्, तपश्चरणाय महेन्द्राद्रिगमनञ्चेति सर्गस्यास्य विषयः।

## हैहयविजयम्

प्रथमः सर्गः>

अत्र हैहयाधिपतेः कृतवीर्य्यसुतस्य अर्ज्जुनस्य चरितमेव वर्णितमस्ति समग्रे सर्गे ।

द्वितीयः सर्गः>

सर्गेऽस्मिन् आदौ श्लोकद्वये माहिष्मत्यां ग्रीष्मऋतोरागमनं दृश्यते । ततः परं ग्रीष्मे वहिर्वारिविहारकामस्य हैहयस्य वधूसहस्रेण सह रेवागमनम्, तथा तस्यां रेवायां वधूभिः सह जलविहारवर्णना एव विहिता, नान्या इति ।

तृतीयः सर्गः>

रावणरेवाभिगमनम् इत्याख्ये अस्मिन् सर्गे आदौ श्लोकत्रयदशे विद्यते प्रतिनायकभूतस्य रावणस्य वर्णनम् (श्लोकाः १-१३)। ततः परं सन्ति हैहयस्य गौरवमवगम्य युद्धाय दशाननेन माहिष्मत्याभिमुखं गमनम्, तत्र हैहयो रेवाभिगत इति श्रुत्वा स निशाचरेश्वरेणापि रेवाभिमुखं गमनम्, अथ रेवां प्राप्य रावणेन रेवायाः सौन्दर्य्यवर्णनम् तथा रक्षपतेः अनुमतिं प्राप्य रक्षसां रेवाविहारश्चेत्यादीनि वृत्तानि कविना हेमचन्द्रेण ।

चतुर्थः सर्गः>

सर्गोऽयमारभ्यते रेवायां ससचिवैः दशाननस्य स्नानपूजनादिवर्णनद्वारेण । स्नानादनन्तरं हरस्याग्रे नृत्यकाले स लङ्केशः पुष्पोपहारहरारिणीं प्रतिकूलस्रोतस्विनीं तटप्लावयन्तीं रेवां ददर्श । प्रतिकूलायाः रेवायाः वर्णना दृश्यते श्लोकसप्तके (श्लोकाः ५-११)। अथ रेवाप्रवाहं दृष्ट्वा रावणस्य चिन्तनम्, ततः परं कारणं निर्णयितुं शुकसारणयोः प्रेषणम्, ताभ्यां जलविहारिणो हैहयस्य दर्शनमित्यादयो विषया अपि चित्रिताः सर्गेऽस्मिन् ।

पञ्चमः सर्गः>

सचिवेभ्यो रेवाप्रवाहसकाशे हैहयाधिपतेः अवस्थानमवगम्य रावणेन ससैन्यैः युद्धाय हैहयाभिमुखं गमनम्, पथि कार्त्तवीर्य्यस्य अमात्यपुंगवान् प्राप्य तेषां सकाशे राक्षसमन्त्रिना सारणेन लङ्केश्वरस्य युद्धेच्छा प्रकटनं, तच्छ्रुत्वा हैहयामात्यानामुपहासः, ततः हैहयामात्यैः सह लङ्केशमन्त्रिणः सारणस्य वादानुवाद इत्यादय एवास्य सर्गस्य मूलविषयः।

षष्ठः सर्गः>

हैहयामात्यानां वचनानि श्रुत्वा क्रोधान्वितेन लङ्केशेन युद्धारम्भः, युद्धे हैहयसैन्यानां पराजयः, राक्षससैन्यानां हुङ्कारेण स्वसैन्यक्षयमवगम्य जलकेलिं वधूसहस्रञ्च विहाय कार्त्तवीर्य्यार्ज्जुनस्य समराभिगमनमिमान्येव वृत्तान्यत्र समुपवर्णितानि ।

सप्तमः सर्गः>

सर्गोऽयं रक्षसैन्यैः सह हैहयाधिपतेः कार्त्तवीर्य्यार्ज्जुन्य रणवर्णनेनैवारभ्यते । दृश्यते च तत्रत्ये रणे हैहयाधिपसकाशे रक्षसैन्यपराभवः, तदनन्तरं रक्षसेनापतेः प्रहस्तस्यागमनम्, कार्त्तवीर्य्यप्रहस्तयोः तेजोविजृम्भितवार्तालापः, तयोर्युद्धः, युद्धे च प्रहस्तस्य पराजयः, भूमौ पतीतं मुग्धं प्रहस्तं विहाय सन्त्रस्तानां धुम्राक्षमारीचमहोदरादीनां शरणलाभाय दशास्याभिमुखं पलायनम् – इमे वृत्तान्ताः कथावस्तुत्वेन स्वीकृताः सर्गेऽस्मिनिति ।

अष्टमः सर्गः>

सर्गेऽस्मिन् पौलस्त्येन सह कार्त्तवीर्य्यस्य युद्धः, युद्धे निशाचरेश्वरस्य पराभवश्च चित्रितः। पराजयादनन्तरं हैहयेन दशग्रीवस्य निग्रहोऽपि समुपस्थापितः श्लोकार्धेनैव –

“…रजसि विजयहर्षादाचकर्षानुरेवं
पशुमिव दशकण्ठं कण्ठपाशावरुद्धम् ॥८/३७॥”[१] इति।

नवमः सर्गः>

विजितारिणा सह हैहयस्य रेवातटाभिगमनं, तत्र वधूगणैः रावणस्यावमानना, ततः परं हैहयस्य माहिष्मत्यागमनम्, मन्दुरागृहे दशाननस्य विनिवेशनम्, अथ माहिष्मत्यां सभायां पुलस्त्यागमनम्,कार्त्तवीर्य्येण विहितं पुलस्त्यस्य सत्कारं तथा हैहयपुलस्त्योः कथोपकथनम्, पुलस्त्यानुरोधेन रावणमोचनञ्चेत्यादीनि वृत्तानि चित्रितानि कविभूषणेनामुना हेमचन्द्रेण ।

---

[१] हैहय.वि.(प्र.सं.) पृष्ठे ५२

## ⅄ पाण्डवविजयम्

प्रथमः सर्गः>

अत्र द्यूतक्रीडायां पराजितस्य युधिष्ठिरस्य वनवासान्ते अज्ञातवासान्ते च शमेन राज्यलाभप्रचेष्टया वृत्तान्तोऽयमारभ्यते । स युधिष्ठिरो रिपौ अर्थाद् दुर्य्योधनादिषु सन्दिग्धतावशाद् अर्थाद् द्यूतस्य संकल्पपालने तेषां सदिच्छाया अभावमाशङ्क्य कुरुराजसंसदि शमाय दौत्ये सुहृदुत्तमं हरिं स्वयं वृणानः । भगवतो विष्णोरवतारः श्रीकृष्णः ; अतः तस्य कृते न किमपि उपदेष्टव्यमस्ति । तथापि राज्ञः कर्त्तव्यमनुसृत्य स युधिष्ठिरः कृष्णं प्रति दौत्यविषये उपदिदेश । अथ युधिष्ठिरं प्रणम्य मितभाष्यभाषी कृष्णसखा अर्ज्जुनः कृष्णसकाशे सन्धिप्रस्तावविरोधिनीं गामुवाच । न केवलं सन्धौ दूतनीत्यामपि युधिषिठिराद् अर्ज्जुनस्य वैमत्यमपि दृश्यते अत्र, यतः स युधिष्ठिरोपदिष्टं शत्रौ अनुद्धतवाक्प्रयोगनीतिं न समर्थयति । हरिरपि पार्थवचः प्रतिगृह्य कुरुसंसदि पाण्डवदूतविधौ विनियोगमवाप्य गमनोद्यतमभूत् । तदा करेण कुरुकुलकालभूजङ्गमिव शिथिलं केशपाशम् आकलय्य चिरधृतमिव शोकमुद्वहन्ती सा कृष्णा कतमपि कृष्णमुपाससाद । तद्दृष्ट्वा श्रीनिवासः सपदि तां मुञ्चतीमश्रुनम्रां पालयामास, अनेनैव प्रकारेण द्रौपद्या मानसिकावस्थां विवृत्य स कविः दूतविनियोग इति सर्गस्य समापनं चकार ।

द्वितीयः सर्गः>

सर्गेऽस्मिन् कविना उपनिवद्धा चिरमन्युभराभिपीडिताया द्रौपद्या दुःखज्वाला प्रथमेषु त्रयविंशतिश्लोकेषु । ततः परं दृश्यते कृष्णेन तस्याः समाश्वासनम् अन्तिमे श्लोकपञ्चदशके इति ।

तृतीयः सर्गः>

अत्र शस्त्रगर्भयानस्थितस्य प्रस्थितस्य माधवस्य वर्णनेन सर्गस्यास्य आरम्भो दृश्यते । यदुवीरः शिनिसुतः सात्यकिः आयुधान्वितैः भटैः तं माधवमन्वगात् । अथ सायंकाले हस्तिनापुरं प्राप्य तथा युद्धमवश्यम्भावीति अनुभूय स शौरिः सात्यकिं कथयति यद्, भग्ने मृद्घटे यथा कदापि सन्धिकार्यं न सम्भवति, तथैव रिपौ सन्धिचेष्टितमिदं तु वृथा । अतो यावदेव स कुरुसंसदि साम्ना सन्धिस्थापनं चेष्टयिष्यति तावदेव सात्यकिना गुप्ततया चारचक्षुषा शत्रूणामुपरि निरीक्षणम् तथा तत्सकाशे तेषां निभृतचेष्टानां ज्ञापनमपि कर्त्तव्यम् इति एवमेव सात्यकिमुपदिश्य सैन्यं वहिः परिपाल्य हस्तिनापुरं विवेश । तत्र दृश्यते कृष्णदुर्य्योधनयोः वार्तालापः । श्लोकचतुष्टयात्मके अस्मिन् कुटनैतिके वार्तालापे दुर्य्योधनस्य पराजयोऽपि चित्रितः अतीव मनोज्ञतया कविनामुना । अथ दुःखितं सुयोधनं विहाय स सज्जनस्य विदुरवेश्म जगाम । अथ विद्यते कृष्णविदुरसाक्षात्कारः, विदुरेण माधवस्य सश्रद्धं तथा सस्नेहं भक्तिभावान्वितमाप्यायनम्, एवमेव

भगवतः श्रीकृष्णेन सह धार्मिकस्य विदुरस्य मिलनद्वारेणैव अभूद् हस्तिनापुरे भक्तभगवत्समागम इति ।

चतुर्थः सर्गः>

इह आदौ आकुलीभूतायाः सन्तानवत्सलायाः कुन्त्याः विलापः (१-२६श्लोकाः), ततः परं कृष्णेन तस्याः समाश्वासनमपि (२७-३३ श्लोकाः) दृश्यते ।

पञ्चमः सर्गः>

सर्गेऽस्मिन् आरभ्यते श्रीकृष्णस्य दौत्यकर्म । अथ रात्रीयापनादनन्तरं स मधुसूदनः प्रातरुत्थाय शमार्थमुपाससाद कौरवीं सभाम् । कविरत्र दूतविधिमनुसृत्यैव माधवमुखेन अभिवाद्य शान्तिप्रस्तावम् उपस्थापितम् । तदनन्तरं पाण्डवैः सह युद्धं कथं न करणीयमिति व्याख्यातुं माधवेन विहितं पाण्डवानाम् अतीतसाफल्यकीर्तनं तथा अन्येषां वीराणां गुणकीर्तनञ्च (१९-२३ श्लोकाः)। एवमेव परिज्ञाप्य विरराम स कोशवः शान्तिदूतः। अथ दृश्यते अत्रपस्य धृतराष्ट्रस्य असहायस्तथा उदासीनप्रतिक्रिया (२५-२७ श्लोकाः), यतः वार्धक्यत्वाद् अन्धत्वाच्च विषयेऽस्मिन् स अनीश्वरः। अथ गाङ्गेयविदुरादयः दुर्य्योधनं प्रति शान्तिस्थापनाय अनुरुरुधुः । परन्तु तत्र सुयोधनस्य सकाशे युधिष्ठिरस्य सामनीतिः भिक्षावृत्तिरिव भाति । एवमेव उक्त्वा स स्वसिद्धान्तरूपेण युद्धमुद्घोषितवान् । सुयोधनस्य वचनगरलं श्रुत्वा माधवेन युद्धनिवारणाय धृतराष्ट्रसकाशे कुरुयुवराजस्य कृते त्यागबन्धनादिकं प्रस्तावितम् । ततः परं कविहेमचन्द्रः माधवनिग्रहे सुयोधनस्य व्यर्थप्रचेष्टां तथा माधवेन स्वविभुतिप्रदर्शनवृत्तमपि वर्णयति । सर्गस्यास्य अन्तिमे अंशे कविनामुना विहितं सन्ध्यावर्णनम्, तदनन्तरम् अन्तिमे श्लोके विश्रमाय कृष्णस्य विदुरगृहगमनमपि चित्रितमिति ।

षष्ठः सर्गः>

सर्गस्यास्य आदौ अरिभयार्द्दितः कुरुमहीपतिः रात्रौ एव एकान्ते पुत्रदुर्य्योधनमाहूय रणनिर्व्वन्धस्य त्यजनाय अनुरुरोध उपदिदेश च चतुर्दशसंख्यकेषु श्लोकेषु (२-१५ श्लोकाः)। परन्तु कुरुयुवराजो दुर्य्योधन उद्धतवचसा पाण्डवानां हीनवीर्यत्वं तथा स्वकीयबलसमृद्धिं च प्रतिपाद्य स्वपितरमाश्वासितवान् (१७-४३ श्लोकाः)। साम्नि विफले कुन्त्या सह मन्त्रणाया अनन्तरं तस्याः कानीनपुत्रम् उपजापाय पृथयानुगतः स पार्थसारथिः कर्णं प्रपेदे । भेदस्यास्य वर्णनं दृश्यते ४४-८२ इत्यादिषु श्लोकेषु । अथ हस्तिनापुरतः प्रत्यावर्तनकाले दैववशाद् मद्राधिपं शल्यं प्राप्य तं प्रति कृष्णेन कर्णतेजहानिरिति पूर्वप्रतिश्रुतेः स्मारणम्, ततः परं उपप्लव्याभिमुखं गमनेनैव समाप्यते सर्गोऽयम् ।

सप्तमः सर्गः>

श्रीकृष्णस्य उपप्लव्यागमनात् परमेव दुर्य्योधनप्रेरितस्य उलूकस्य दौत्येन (१-९ श्लोकाः) सर्गोऽयमारभ्यते । शकुनिसुताद् उलूकमुखाद् दुर्य्योधनस्य निन्दात्मकवार्तां निशम्य भीमो विससर्ज वचोविषम् ऊनविंशतिश्लोकेषु (१०-१८ श्लोकाः)। तस्योग्रप्रतिक्रियां प्रति अर्जुनो वासुदेवश्च ज्ञापितवन्तौ तयोः समर्थनमिति । अथास्ति उलूकं प्रति अर्ज्जुनस्य उत्तरम् श्लोकचतुष्टये (२१-२४ श्लोकाः)। ततः परं विसृज्य तमुलूकं युधिष्ठिरो युद्धाय सन्नद्धमियेष । सर्गेऽस्मिन् पाण्डवानां सैन्यसज्जा, शिविरस्थापनम्, पाण्डवपक्षे पाञ्चाल-मत्स्य-सात्यकि-अभिमन्यु-हैडिम्बेय-द्रौपदेयादीनां वीराणां योगदानवृत्तान्तोऽपि समुपवर्णितः (२६-३४ श्लोकाः)। ततः परं श्लोकद्वये वर्णिता भाव्यमङ्गलभीतानां पाण्डवबधूनां विशेषतो द्रौपद्या मानसिकावस्थाया वर्णना (३५, ३६ च)। ततः परं श्लोकद्वये (३७, ३८ च) विद्यते धृष्टद्युम्ने सैन्यापत्यदानं, पाण्डवव्युहसज्जावर्णनम् । अथ उपान्तिमे श्लोके दृश्यते बलरामस्य तीर्थगमनम्, एवमेव सर्गेऽयं समाप्यते ।

अष्टमः सर्गः>

कुरुक्षेत्रयुद्धमिति नाम्नैव बुध्यते यद्, महाभारतीयो धर्मयुद्ध एवात्र वर्णितः। अत्रत्ये श्लोकषट्के (१-६ श्लोकाः) विद्यते पाण्डवधार्त्तराष्ट्राणां सैन्यसमावेशवर्णनम् । ७’मे, ८’मे च श्लोके अस्ति श्रीमद्भगवद्गीतोपनिषदः सारवर्णनम् । अथास्ति शतश्लोकेषु रणवर्णनम् (९-१०८ श्लोकाः), तत्र कविनामुना हेमचन्द्रेण श्लोकद्वयेन (९५, ९६ च) चित्रितो दुर्य्योधनावसादः । सञ्जयमुखात् स्वपुत्रावस्थां विज्ञाय स धृतराष्ट्रो बहु विलपन् मुहुरापेदे मोहम् । अथ स भाग्यश्रिया विरहितो हतबन्धुवर्गो दुर्य्योधनो द्वैपायनह्रदमुपेत्य निलीय तस्मिन्, संस्तम्भिताम्भसि भूजङ्ग इवावतस्थे इति शम् ।

नवमः सर्गः>

दुर्य्योधनोरुभङ्ग इति नाम्नैव बुध्यते यद्, गदायुद्धपर्वाध्यायस्य वृत्तमेव सर्गस्यास्य कथावस्तु । सर्गेऽस्मिन् द्वैपायनह्रदे अन्तर्जलसन्निविष्टं दुर्य्योधनं प्राप्य युधिष्ठिरेण दुर्य्योधनभर्त्सनम् (५-९ श्लोकाः); ह्रदोत्थितस्य गदाभृतो दुर्य्योधनस्य तेजोमयरूपवर्णनम् (११-१५ श्लोकाः); युधिष्ठिरेण भर्त्सितेन सुयोधनेन प्रत्युत्तरप्रदानम् (१६, १७ च श्लोकौ); ततः परं श्लोकद्वादशे (२०-३१ श्लोकाः) भीमदुर्य्योधनयोः गदायुद्धवर्णनम्, दुर्य्योधनस्य ऊरुभङ्गः पराजयश्च, युधिष्ठिरेण भीमस्य शत्रुनिर्यातननिवारणम्, दुर्य्योधनेन माधवयुधिष्ठिरयोः भर्त्सनम्; अथ ३२-५३’तमेषु श्लोकेषु भग्नसक्थं मृत्युपथयात्रिणं कुरुयुवराजमवलोक्य कृपकृतवर्माश्वत्थामादीनां विलापः, दुर्य्योधनेन तेषां समाश्वासनम्, दुर्य्योधनसकाशे अश्वत्थाम्ना रजनीमध्ये पाण्डवानां विनाशप्रतिज्ञा,

प्रतिज्ञामिमां श्रुत्वा दुर्य्योधनेन उषाकालं यावत् स्वप्राणधारणस्य आश्वासनम्, अहितोच्छेदनायाश्वत्थामादीनां प्रस्थानम् इत्यादीनि वृत्तानि वर्णितानि ।

दशमः सर्गः>

सौप्तिकमिति सर्गेऽस्मिन् प्रथमश्लोकद्वये उपलभ्यते रजनीवर्णनम् । ततः परं स अस्वत्थामा कृतवर्माणं कृपञ्च वहिः संस्थाप्य तस्कर इव पाण्डवशिविरे विवेशकाले महद्भूतरूपवीर्यसम्पन्नं भूतं ददर्श । तमर्ज्जुनमिति मत्वा सः अश्वत्थामा तेन सह युद्धारम्भं चकार । युधि तं भूतं भूतपतिरिति विज्ञाय स द्रौणिः तस्य शरणं प्रपन्नः। अथ सुप्तेषु पाञ्चालेषु स द्रौणिः तान् वधाय प्रपेदे । अथास्ति वर्णितं पाञ्चालद्रौपदेयानां वधवृत्तं श्लोकचतुष्टये (१५-१९ श्लोकाः), तत्रत्यात् शिविराद् द्रुपदात्मजस्य यन्तैव केवलं कथमपि निर्ययौ । तदनन्तरं पाञ्चालद्रौपदेयानां वधवृत्तं श्रुत्वा दुर्य्योधनस्य हर्षः, प्राणत्यागश्च चित्रितः श्लोकचतुष्टये (२५-२८ श्लोकाः)। सुयोधनोपरमात् परं त्रयस्ते (कृपः, कृतवर्म्मा, अश्वत्थामा) घोरतरं विषादं प्राप्तवन्तः। अथापत्यवियोगातुराणाममर्षप्रदीप्तानां पाण्डवानां पराक्रमं संस्मर्य सोद्वेगास्ते तिसृषु दिक्षु प्रचलिताः। तेन प्रपदात्मविषयं कृतवर्म्मा, कृपश्चावाप हस्तिनापुरं, द्रौणिस्तु ययौ व्यासपदमिति ।

एकादशः सर्गः>

दिव्यास्त्रप्रयोग इति सर्गोऽयमारभ्यते प्रभातवर्णनेन (१-४ श्लोकाः)। अथ द्रुपदात्मजस्य यन्तुः सकाशे गुरुपुत्रस्य हस्ते सौप्तिके पाञ्चालद्रौपदेयानां वधं श्रुत्वा पाण्डवाः शोकाद्धतबुद्धयोऽभवन् । युधिष्ठिरादेशाद् नकुलः समानीतवान् द्रौपदीमपि । ततः परं दृश्यते, हतपुत्रवान्धवानावलोक्य द्रौपद्या विलापः (१०-१४ श्लोकाः)। द्रौपदीविलापं श्रुत्वा भीमनकुलकृष्णैः सह अर्ज्जुनोऽपि व्यासपदं ययौ अश्वत्थामावधाय । अथ तपोवनमध्ये द्रौणिभीमयोः युद्धम्, द्रौणिना 'अपाण्डवायेति' उक्त्वा ब्रह्मशिरास्त्रमोचनम्, माधवोपदेशं परिगृह्य गुरोः द्रोणस्य शासनं स्मृत्वा केवलमेव परास्त्रवारणाय सिताश्वेन द्रोणादधीतं ब्रह्मशिरास्त्रमोचनमित्यादीनि वृत्तान्यत्र समुपवर्णितानि ।

द्वादशः सर्गः>

सर्गारम्भे लोकहिताय दिव्यास्त्रद्वयनिवारणाय द्वैपायनो मुनिः तत्राविर्भूतोऽभूत्, समादिदेश द्रौणिं फाल्गुनिं च महास्त्रप्रशमनाय । ततो धनञ्जयः प्रतिसञ्जहार स्वमन्त्रम्, न तु शशाक तत्कर्तुं स द्रौणिः। अथ द्वैपायनभर्त्सितः स द्रौणि दिव्यास्त्रप्रशमणे असामर्थ्यं तथा अनिच्छां प्रतिपाद्य अभिमन्युपत्न्याः गर्भे निक्षेपितुमैच्छत् । तस्य वचनमिदमाकर्ण्य तन्तर्ज्जयनुवाच शापवाणीं द्रौणेः कृते स द्वारकाधीशः कृष्णः। एवमेव पराजितं तं द्रौणिं वद्ध्वा द्रौपदीसकाशे कृतां प्रतिज्ञां स्मृत्वा स सिताश्वः तं रथोपरि समारोप्य शिविराभिमुखं प्रतस्थे । अथ दृश्यन्ते वन्धनपीडितं गुरुपुत्रं साक्षात्

प्राप्य गुरुं द्रोणं संस्मर्य द्रौपद्या अर्ज्जुनसकाशे तस्य मोचनानुरोधः, भीमस्यामर्षः, भीमस्य मनस्तापप्रशमणाय माधवोपदेशाद् अर्ज्जुनेन कृपीसुतस्य शिरोमणिग्रहणं कृपाणाघातेन, द्रुपदात्मजया पुत्रशोकाभिभवाय युधिष्ठिरे मणिसमर्पणम्, द्रौणिना अन्यत् शरणमप्राप्य वनगमनमित्यादीनि वृत्तानि । ततो हरिं प्रपेदे विलापातुरा उत्तरा, नवविधवां तामालोक्य युधिष्ठिरो बहुविललाप । एवमेव स्थितौ शौरिरेव तौ आश्वासयितुं निजगाद ज्ञानोज्ज्वलामाश्वासवाणीम् श्लोकचतुष्टये (४५-४८ श्लोकाः), आदौ स उत्तरामाश्वास्य अवशिष्टे श्लोकत्रये युधिष्ठिरं समाश्वास्य राज्यभारग्रहणाय आदिदेश । सर्गस्यास्य अन्तिमे श्लोकचतुष्टये (४९-५२ श्लोकाः) दृश्यते युधिष्ठिरस्य राज्याभिषेकवर्णनम्, एवमेव समाप्यते अन्तिमसर्गोऽयम् ।

## महाकाव्यत्वविमर्षणम्

ऊनविंशशताब्द्यां गौडभूमिषु सरस्वती-पदक्षरित-सारस्वत-स्रोतसि अवगाहनं कृतवता कविभूषणेनामुना हेमचन्द्ररायेन प्रणीतं महाकाव्यत्रितयमिदं अलंकारशास्त्र-सम्मतमहाकाव्यमेव । अतः कथमिदं काव्यत्रितयं महाकाव्यमिति पदवाच्यं, तत्तु प्रतिपाद्यमेव । महाकाव्यत्व-प्रतिपादनविषये अनेकैरालंकारिकैः स्व-स्व-वक्तव्यानि प्रकाशितानि, तेषु अलंकारप्रस्थानस्य भामहाचार्यस्य, गुणप्रस्थानालंकारिकस्य दण्ड्याचार्यस्य तथा रसप्रास्थानिकस्य विश्वनाथकविराजस्य मतान्यनुसन्धेयानि । भामह-दण्डी-विश्वनाथकृतानां महाकाव्यलक्षणानां मध्ये तु वैसादृश्यमपेक्षया सादृश्याधिक्यमेव दृश्यते । अतः प्राथमिकतया विश्वनाथस्य मतमवलम्ब्यैवात्र हेमचन्द्ररायकविभूषणस्य 'परशुरामचरितम्', 'हैहयविजयम्', 'पाण्डवविजयम्' चेति काव्यत्रितयस्य महाकाव्यत्वविचारणं विधीयते।

## नामकरणालोचनम्

संस्कृतालंकारिकस्तथा साहित्यदर्पणकारो विश्वनाथः तस्य ग्रन्थस्य षष्ठपरिच्छेदे महाकाव्यस्य नामकरणविषये कथयति यत्, कवेः नामानुसारेण, वर्णनीयविषयानुसारेण, नायकस्य नामानुसारेण, कस्यचन गौणविषयस्य नामानुसारेण वा महाकाव्यस्य नामकरणं भवतीति । निगदितञ्च साहित्यदर्पणे –

"कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा । ॥६/३०२॥"[1]

-इति विधानस्यास्य तृतीयं (नायकनाम्ना) तथा द्वितीयविकल्पम् (वृत्तनाम्ना) अनुसृत्यैव यथाक्रमेण विहितं 'परशुरामचरितम्', 'हैहयविजयम्', 'पाण्डवविजयम्' -चेति महाकाव्यत्रितयस्य नामकरणमिति । तेषां नामकरणस्य याथार्थ्यमधस्तादुपस्थाप्यते –

---

[1] सा.द.(हरिदास.) पृष्ठे ४२३

## परशुरामचरितम्

भगवतो विष्णोरवतारभूतस्य परशुरामस्य जीवनलीलामेवावलम्ब्य ग्रथितेऽस्मिन्नेव महाकाव्ये नामकरणविधानभूतेन 'नायकस्य नाम्ना' इति तृतीयेन विकल्पेन विहितं परशुरामचरितमिति नाम, यतः परशुराम एवात्र नायकः। दशसर्गात्मके महाकाव्येऽस्मिन् जगत्त्राणाय प्रतिश्रुतस्य विष्णोः आविर्भावः जमदग्निरेणुकयोः सुतभूतेन रामरूपेण, देवादिदेवसकाशाद् दिव्यास्त्रलाभात् परशुराम इति अभिधायाः प्राप्तिः, परशुरामेण कार्त्तवीर्य्यार्ज्जुनवधः, पितृवधामर्षप्रदीप्तेन तेन भृगूत्तमेन एकेनैव परशुना वारैरेकविंशत्या पृथिव्या निष्क्षत्रीकरणम् इत्यादिभिः परशुरामस्य जीवनचरितमेव चित्रितमेनेन कविभूषणेन हेमचन्द्रेण । 'परशुधारको रामः' इति विग्रहे "शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्"[१] इति वार्तिकानुसारेण शाकपार्थिवादिवत्-समासे प्रथमैकवचने 'परशुरामः' इति पदं निष्पद्यते । अथ 'परशुरामस्य चरितम्' इति विग्रहे "षष्ठी"[२] इति सूत्रेण षष्ठीतत्पुरुषे निष्पद्यते 'परशुरामचरितमि'ति पदम् । पुनः 'परशुरामचरितम् आश्रित्य प्रणीतं महाकाव्यं परशुरामचरितम्' इति विग्रहेणापि परशुरामचरितमिति भवति । महाकाव्यमिति पदन्तु क्लीवलिङ्गम् अतः पदस्यास्य विशेषणत्वात् परशुरामचरितमिति पदेऽपि क्लीवलिङ्गम् भवतीति । अतः सार्थकमिदं नामकरणमिति ।

### हैहयविजयम्

हैहयराक्षसयोर्युद्धे लङ्केश्वरस्य तथा राक्षसानामुपरि कार्त्तवीर्यार्जुनाधीनानां हैहयानां विजयवृत्तमवलम्ब्यैव प्रणीतेऽस्मिन् महाकाव्ये नामकरणविधानान्तर्गतेन 'वृत्तस्य नाम्ना' इति द्वितीयेन विकल्पेन विहितं हैहयविजयमिति नाम। नवसर्गात्मकेऽस्मिन् महाकाव्ये कार्त्तवीर्यार्जुनस्य चरितकथनम्, रावणहैहययोः युद्धे रावणनिग्रहः, अन्तिमे पुलस्तमुनेः अनुरोधेन रावणस्य मुक्तिलाभः इत्यादिभिः हैहयानां विजय एव प्रतिपादयति कविः। न केवलम् एतत् स कविरत्र कार्त्तवीर्यार्जुनस्य महानुभवतां तथा दाक्षिण्यमपि प्रतिपादयति रावणमोचनमिति सर्गे, अतः हैहयविजयमिति नामकरणं तु सार्थकतामेति ।

'हैहयविजयम्' इति पदस्य व्युत्पत्तिर्यथा - 'हेहय' इति अव्युत्पन्नात् प्रातिपदिकादेव निष्पद्यते 'हैहय' इति शब्दः । अतस्तत् प्रातिपदिकादनन्तरं "जनपदशब्दात्क्षत्रियादञ्"[३] इति सूत्रेण अञ्'प्रत्यययोगे पुंलिङ्गे प्रथमाविभक्तैकवचने 'हैहयः' इति पदं निष्पद्यते । पुनः वि'पूर्वकाद् जि'धातोः उत्तरे अच्'प्रत्यययोगे पुंलिङ्गे 'विजयः' इति पदं निष्पद्यते । 'हैहयानां विजयः' इति विग्रहेण "षष्ठी"[४] इति सूत्रेण च 'हैहयविजयः' इति पदं निष्पद्यते । पदमिदं

---

[१] अष्टाध्य.(शास्त्री.,पाण्डे.) पृष्ठे १३

[२] तत्रैव. २/२/८. पृष्ठे १४

[३] तत्रैव. ४/१/१६६. पृष्ठे ३९

[४] तत्रैव. २/२/८. पृष्ठे १४

महाकाव्यस्य विशेषणत्वाद् "ह्रस्वो नपुंसके प्रातिपदिकस्य"[१] इति सूत्रेण 'हैहयविजयः' इति पदे जायते नपुंसकत्वम्, तेनैव निष्पद्यते 'हैहयविजयमि'ति पदम् ।

**पाण्डवविजयम्**

धर्म्मक्षेत्रे कुरुक्षेत्रे धर्म्मयुद्धे धार्त्तराष्ट्राणामुपरि पाण्डवानां विजयवृत्तमाधारीकृत्यैव रचितेऽस्मिन् महाकाव्ये नामकरणविधानभूतेन 'वृत्तस्य नाम्ना' इति द्वितीयेन विकल्पेन विधीयते पाण्डवविजयमिति नामकरणम् । द्वादशात्मके सर्गान्विते एतस्मिन् महाकाव्ये सभायां कौरव्यां कृष्णदौत्याद् युद्धान्ते विहिते द्रौणिनिग्रहे पाण्डवानामेव विजयः प्रतिपद्यते कविनामुना । न केवलं रणजयेन विजयो लभ्यते, लभ्यते तु रणजयादनन्तरं वंशानुक्रम्येण राजत्वभोगेन, नान्यथेति । महाकाव्येस्मिन्नन्तिमे सर्गे श्लोकत्रये उत्तरे काले अभिमन्युसुतस्य परीक्षितस्य राज्यभोगसम्भावनाया वर्णना एव वर्णिता –

"....छिन्नोऽपि पाण्डोः कुलतन्तुरेवं मयैव संयोजयिता स्वशक्त्या ॥१२/१३॥
...राजाऽभिमन्योस्तनयः परिक्षित् क्षितिं प्रशासिष्यति ते समक्षम् ॥१२/१४॥
........अस्त्रं कृपाद्वंशगुरोरवाप्य भोक्ता च षष्टिं शरदः स लक्ष्मीम् ॥१२/१५॥"[२] - इति ।

ततः परं एकपञ्चाशत्तमे श्लोके माधवशङ्खनादेन पाण्डवीयविजयस्य समापनमपि विहितम् –

"....शङ्खस्वनैर्यादवनन्दनेन स पाण्डवीयो विजयः समाप्तः ॥१२/५१॥"[३] - इति ।

अतः पाण्डवविजयमिति नामकरणं तु यथायथमेव इत्यत्र नास्ति सन्देहलेश इति ।

पुनः पाण्डवविजयमिति पदस्य व्युत्पत्तिर्यथा 'पण्ड्' इति धातोः अनन्तरम् "उणादयो बहुलम्"[४] इति सूत्रेण ञुण्'प्रत्यययोगे 'पाण्डु' इति शब्दो निष्पद्यते, ततः पाण्डुशब्दादनन्तरम् "ऋष्यन्धकवृष्णिकुरुभ्यश्च"[५] इति सूत्रेण अण्'प्रत्यये पुंलिङ्गे प्रथमाविभक्तैकवचने 'पाण्डवः' इति पदं निष्पद्यते । अथ वि'पूर्वकाद् जि'धातोः उत्तरे अच्'प्रत्यये पुंलिङ्गे प्रथमाविभक्तैकवचने 'विजयः' इति पदं निष्पद्यते । अथ 'पाण्डवानां विजयः' इति विग्रहेण "षष्ठी"[६] इति सूत्रेण

---

[१] अष्टाध्य.(शास्त्री.,पाण्डे.) पृष्ठे ६

[२] पा.वि.(द्वि.सं.) पृष्ठे १०२, १०३

[३] तत्रैव. पृष्ठे ११०

[४] अष्टाध्य.(शास्त्री.,पाण्डे.) ३/३/१. पृष्ठे २९

[५] तत्रैव. ४/१/११४. पृष्ठे ३८

[६] तत्रैव. २/२/८. पृष्ठे १४

च 'पाण्डवविजयः' इति पदं निष्पद्यते । पदमिदं महाकाव्यस्य विशेषणत्वाद् "ह्रस्वो नपुंसके प्रातिपदिकस्य"[१] इति सूत्रेण 'पाण्डवविजयः' इति पदे नपुंसकत्वे जाते 'पाण्डवविजयम्' इति रूपं सिद्ध्यते इति ।

## सामान्यलक्षणस्य सर्गविधानस्य च विचारणा

सामान्यतया सर्गशब्दोपस्थापिताध्यायैः विन्यस्तरसवत्पद्यसमुह एव महाकाव्यमिति अभिधया अभिधीयते –

"सर्गबन्धो महाकाव्यम्... ॥६/३०२॥"[२] इति।

लक्षणेऽस्मिन् बन्ध इति पदेन रसवत्पद्यसमूहानां विन्यास एव बुध्यते, अतः पद्यं किम् ? छन्दोबद्धपदानि पद्यरूपेणाभिधीयते[३]। पद्यं पुनः पञ्चधा विभज्यन्ते, यथा – 'मुक्तकम्', 'युग्मकम्', 'सन्दानितकम्', 'कलापकम्', 'कुलक'श्चेति [४]। पद्यविभागभूतत्वाद् मुक्तकादीनां महाकाव्याङ्गत्वमपि स्वीकर्तव्यम्, विषयेऽस्मिन् दण्ड्याचार्यस्य मतमेव मतमेव प्रमाणत्वेन गृह्यते[५]। हेमचन्द्रस्य महाकाव्यत्रये ( 'परशुरामचरितम्', 'हैहयविजयम्', 'पाण्डवविजयम्' चेति ) सर्व्वेषु सर्गेषु मुक्तकस्यैव प्रयोगाधिक्यं प्राप्यते, अधुना मुक्तकान् व्यतिरिच्य युग्मकप्रभृतीनां प्रयोगस्थानानि अधस्ताद् निर्दिश्यते, यथा –

**परशुरामचरितम्** > युग्मकं दृश्यते द्वितीये, सप्तमे, अष्टमे, दशमे च सर्गे (२/१६,१७ ; ७/१,२ ; ८/२७,२८ ; १०/३१,३२)। सन्दानितकमुपलभ्यते तृतीये, चतुर्थे, षष्ठे, दशमे च सर्गे (३/२-४ ; ४/१९-२१ ; ६/१-३ ; १०/१-३)। कलापकं दृश्यते सर्गद्वितये (१/१-४ ; ७/५६-५९)। कुलकमस्ति केवलं सप्तमे सर्गे (७/५१-५५)।

**हैहयविजयम्** > युग्मकं दृश्यते सर्गद्वये (७/१,२ ; ८/८,९ ; २१,२२)। सन्दानिकतकमुपलभ्यते सर्गत्रितये (४/६-८ ; ५/१३-१५ ; ८/२-४)। अस्मिन् महाकाव्ये कुत्रापि कलापकस्य प्रयोगो न दृश्यते । अथ कुलकं दृश्यते केवलं तृतीये सर्गे (३/२०-२४)।

**पाण्डवविजयम्** > युग्मकानि दृश्यन्ते सर्गपञ्चके (४/२-३, ४-५ ; ५/४८,४९ ; ६/८१,८२ ; ८/५-६, ७-८, ३७-३८, ५८-५९, ८०-८१, १०१-१०२ ; ११/१५-१६)। सन्दानितकस्य प्रयोगो विद्यते सर्गत्रितये (५/२०-२२ ; ७/२७-२९ ; ८/१७-१९)। कलापकमस्ति सर्गद्वितये (४/६-९ ; ११/१-४)। कुलकमपि सर्गद्वये एव विद्यते (४/१२-१६ ; ६/२३-२७)।

---

[१] अष्टाध्य.(शास्त्री. पाण्डे.) पृष्ठे ६

[२] सा.द.(हरिदास.) पृष्ठे ४२३

[३] तत्रैव. "छन्दोबद्धपदं पद्यम् ....॥६/३०१॥" इति, पृष्ठे ४२१

[४] तत्रैव. "...तेनैकेन च मुक्तकम्। द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते।कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्॥६/३०१॥" इति, तत्पृष्ठे

[५] काव्याद.(पाठक.) "मुक्तकं कुलकं कोषः सङ्घात इति तादृशः। सर्गबन्धाङ्गरूपत्वादनुक्तः पद्यविस्तरः॥१/१३॥" इति, पृष्ठे १८

प्रसङ्गतः उल्लेख्यं यद् महाकविहेमचन्द्रः सन्दानितकमिति पद्यभेदं बोधयितुकामस्तस्य विशेषकमिति नामान्तरं व्यवहृतवान् तदीयेषु महाकाव्येषु ।

## सर्गविधानम्

सर्गबन्धत्वमेव महाकाव्यस्य सामान्यं वैशिष्टयम्, अस्मिन् सर्गविधानविषये विश्वनाथेनोक्तम् यत्, अष्टसंख्यकाः तदधिकसंख्यका वा सर्गाः सन्ति महाकाव्ये, अपि च ते सर्गाः नातिदीर्घा नातिस्वल्पाः स्युः – "नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह।..॥६/३०२॥"[१] इति । अत्र परशुरामचरिते दश सर्गाः, हैहयविजये नव सर्गाः, पाण्डवविजये च सन्ति द्वादश सर्गाः । अत एतेन सम्पूर्णतया सर्गाणां अष्टाधिकत्वमेव सूच्यते महाकाव्यत्रयेऽस्मिन् ।

अथ आयाति सर्गाणां नातिदीर्घत्वं तथा नातिस्वल्पत्वम्, अस्मिन् नातिदीर्घत्वस्वल्पत्वस्वरूपविषये साहित्यदर्पणस्य कुसुमप्रतिमाटीकायां हरिदाससिद्धान्तवागीशेन उक्तम् – "नातिस्वल्पाः पञ्चविंशत्यन्यूनपद्यघटिताः। ....नातिदीर्घास्त्रिशतानधिकपद्यघटिता इति साम्प्रदायिकाः।"[२] इति । अधुना हेमचन्द्रस्य महाकाव्यत्रयस्य नातिदीर्घत्वं नातिस्वल्पत्वञ्च अधस्तात् प्रतिपद्यते -

परशुरामचरितमिति महाकाव्यस्य सर्वे सर्गाः त्रिशताननधिकपद्यघटिताः ; परन्तु पञ्चमं सर्गं विहाय उपलभ्यन्ते पञ्चविंशत्यधिकाः श्लोकाः तत्रत्येषु सर्वेषु सर्गेषु । यतः पञ्चमे सर्गे केवलं त्रयविंशति श्लोका एव सन्ति । एतेन बुध्यते महाकाव्येऽस्मिन् यथैवास्ति अतिस्वल्पत्वं पञ्चमे सर्गे तथैवास्ति नातिदीर्घत्वं शेषेषु सर्गेषु । परशुरामचरितस्य दशसु सर्गेषु श्लोकसंख्या यथा –

| परशुरामचरितम् | | | | | | |
|---|---|---|---|---|---|---|
| स.सं. | सर्गनाम | श्लो.सं. | | स.सं. | सर्गनाम | श्लो.सं. |
| १ | रामाविर्भावः | ३३ | | ६ | युद्धम् | ३२ |
| २ | दिव्यास्त्रलाभः | ३८ | | ७ | पुनर्युद्धोपक्रमः | ६० |
| ३ | वरप्राप्तिः | २७ | | ८ | कार्त्तवीर्यार्जुनवधः | २९ |
| ४ | जमदग्न्यर्जुनसंघर्षः | ३७ | | ९ | रामविलापः | २८ |
| ५ | रणप्रयाणम् | २३ | | १० | क्षत्त्रसङ्क्षयः | ४८ |

सारणी २.१ : परशुरामचरितस्य स.सं., श्लो.सं.

[१] सा.द.(हरिदास.) पृष्ठे ४२४

[२] तत्रैव. तत्पृष्ठे

हैहयविजये नवसर्गेषु षष्टं तथा सप्तमञ्चेति सर्गद्वयम् अपहाय अवशिष्टेषु सप्तसर्गेषु पञ्चविंशत्यधिकास्तथा त्रिशतानधिकाः श्लोकाः विलसन्ति । परन्तु षष्टे च सप्तमे सर्गे यथाक्रमेण चतुर्विंशतिश्लोकाः एकविंशति श्लोका उपलभ्यन्ते । अतो नवसर्गात्मके महाकाव्येऽस्मिन् यथा नातिदीर्घत्वमुपलभ्यते सप्तसर्गेषु, तथैव नातिस्वल्पत्वं तु नोपलभ्यते अवशिष्टे सर्गद्वये । हैहयविजयस्य नवेषु सर्गेषु श्लोकसंख्या यथा –

| हैहयविजयम् | | | | | | |
|---|---|---|---|---|---|---|
| **स.सं.** | **सर्गनाम** | **श्लो.सं.** | | **स.सं.** | **सर्गनाम** | **श्लो.सं.** |
| १ | चरिताख्यानम् | २८ | | ६ | समराभिगमनम् | २४ |
| २ | रेवाविहारः | २९ | | ७ | रक्षःसैनपराभवः | २१ |
| ३ | रावणरेवाभिगमनम् | ३० | | ८ | दशग्रीवनिग्रहः | ३९ |
| ४ | रेवाप्रवाहरोधः | २५ | | ९ | रावणमोचनम् | ३३ |
| ५ | मन्त्रिवाक्यम् | २८ | | - | - | - |

सारणी २.२ : हैहयविजयस्य स.सं., श्लो.सं.

द्वादशसर्गात्मके पाण्डवविजये सर्वेषु सर्गेषु यथा पञ्चविंशत्यधिकाः श्लोका उपलभ्यन्ते तथैवोपलभ्यन्ते त्रिशतानधिकाः श्लोकाः, एतेन प्रतीयते यत् महाकाव्येऽस्मिन् यथैवास्ति नातिदीर्घत्वं तथैवास्ति नातिस्वल्पत्वमिति । पाण्डवविजयस्य द्वादशेषु सर्गेषु श्लोकसंख्या यथा –

| पाण्डवविजयम् | | | | | | |
|---|---|---|---|---|---|---|
| **स.सं.** | **सर्गनाम** | **श्लो.सं.** | | **स.सं.** | **सर्गनाम** | **श्लो.सं.** |
| १ | दूतविनियोगः | ४० | | ७ | दण्डोद्योगः | ४० |
| २ | द्रौपदीवाक्यम् | ३८ | | ८ | कुरुक्षेत्रयुद्धम् | १०४ |
| ३ | भक्तभगवत्समागमः | ३५ | | ९ | दुर्य्योधनोरुभङ्गः | ५३ |
| ४ | कुन्तीकृष्णसंवादः | ३३ | | १० | सौप्तिकम् | ३४ |
| ५ | सामप्रयोगः | ६९ | | ११ | दिव्यास्त्रप्रयोगः | ३३ |
| ६ | भेदप्रयोगः | ८३ | | १२ | द्रौणिनिग्रहः | ५२ |

सारणी २.३ : पाण्डवविजयस्य स.सं., श्लो.सं.

## नायकविचारणा

अथ नायकविधानं विधीयते विश्वनाथेन महाकाव्यस्य कृते । स तस्य साहित्यदर्पणे महाकाव्यस्य नायकः को भविष्यतीति विषये निर्दिशति विकल्पत्रयम्, यथा - एक एव धीरोदात्तगुणान्वितो देवस्वभावापन्नो जनो महाकाव्यस्य नायको भविष्यति, अथवा कश्चन धीरोदात्तगूणान्वितः सद्वंशजातः क्षत्रियो महाकाव्यस्य नायकपदं प्राप्स्यति, अथवा एकस्मिन्नेव वंशे जाताः कुलिना बहवोऽपि धीरोदात्तगूणान्विता भूपा नायका भवितुमर्हन्तीति तदुच्यते दर्पणे -

"........................तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियो वापि धीरोदात्तगूणान्वितः॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा।..॥६/३०२॥"[१]इति।

प्रसङ्गतः उल्लेख्यं यद्, महामहोपाध्यायो हरिदाससिद्धान्तवागीशः स्वस्य कुसुमप्रतिमाटीकायां "..क्षत्रियो वापि धीरोदात्तगूणान्वितः"- इति अंशे स्थितस्य 'अपि' इति शब्दस्य तात्पर्यव्याख्यानप्रसङ्गे कथयति यद - "अपिशब्देन क्षत्रियेतरजातिरपि तादृश एको नायको भवितुमर्हतीति सूचितम्"[२] इति।

क्षत्रियेतरनायकविशिष्टानां महाकाव्यानाम् उदाहरणमुपलभ्यते ऊनविंशशताब्द्याः संस्कृतसाहित्याङ्गने, यथा- नित्यानन्दस्मृतितीर्थस्य 'शङ्करानुभवम्' (२३ सर्गाः), 'श्रीजानकीनाथवन्दनम्' (२० सर्गाः); महेशचन्द्रतर्कचूडामणेः 'भूदेवचरितम्' (२४ सर्गाः); श्रीश्वरविद्यालंकास्य 'विजयिनीकाव्यम्' (१२ सर्गाः) प्रभृतीनि । अष्टादशे शतकेऽपि क्षत्रियेतरनायकविशिष्टानां महाकाव्यानाम् उदाहरणमुपलभ्यते, यथा – मेघविजयोपाध्यायप्रणीतं 'देवानन्दमहाकाव्यम्' (१७०३खीः), 'शान्तिनाथचरितश्चेति'; उडिष्याधिवासिनः कृष्णानन्दकवेः 'सहृदयानन्दमि'ति महाकाव्यमप्यस्मिन् विभागेऽन्तर्याति ।

अधुना कविहेमचन्द्रेण नायकविधानविषये साहित्यदर्पणस्य द्वितीयविकल्पमनुसृत्य ("सद्वंशः क्षत्रियो वापि धीरोदात्तगूणान्वितः") भृगुकुलोद्भूतो ब्राह्मणो जामदग्न्यः परशुपाणिः रामः, चन्द्रकुलोद्भूतः क्षत्रियो हैहयाधिपतिः कार्त्तवीर्यार्जुनश्च यथाक्रमेण 'परशुरामचरितम्', 'हैहयविजयम्' चेति महाकाव्यद्वयस्य नायकत्वेन स्वीकृताः । पुनः नायकविधाने तृतीयविकल्पमनुसृत्य ("एकवंशभवा भूपाः कुलजा बहवोऽपि वा।") कुरुवंशजाताः पञ्चपाण्डवा एव पाण्डविजयमिति महाकाव्यस्य नायकत्वेन स्वीकृताः ।

---

[१] सा.द.(हरिदास.) पृष्ठे ४२३

[२] तत्रैव. तत्पृष्ठे

विश्वनाथमतेन नायकस्तु स्याद् धीरोदात्तगुणान्वितः । अतो एते नायकाः धीरोदात्ता न वेति विचारणीयाः, परन्तु एतेषां नायकानां धीरोदात्तत्वविचारात् पूर्वं नायकत्वप्रतिपादनं कर्तव्यम् । तथा चोच्यते नायकलक्षणविषये साहित्यदर्पणे तृतीये परिच्छेदे –

"त्यागी कृती कुलीनः सुश्रीको रुपयौवनोत्साही ।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान् नेता ॥३/३५॥"[1] इति।

लक्षणमिदं नायकस्य सामान्यलक्षणम्, अतोऽत्र यानि वैशिष्ट्यानि सन्ति तानि साधारणवैशिष्ट्यानि, इमानि वैशिष्ट्याणि आधारीकृत्यैव यथाक्रमेण विधीयतेऽत्र नायकानामेषाम् अर्थात् परशुरामः, कार्त्तवीर्य्यार्ज्जुनः, पाण्डवाः चेत्यादीनां नायकत्वविचारणम् –

- **त्यागी**

नायकस्तु त्यागी अर्थात् दानशीलो, त्यागशीलो, अनासक्तो वा भवेत् ।

- ✓ परशुरामचरितम्

परशुरामस्य दानशीलता दृश्यते महाकाव्ये दशमे सर्गे, अत्र एकेनैव कुठारेण पृथ्वीजयात् परं सुपात्राय कश्यपाय धरित्रीदानमनुष्ठितं परशुरामेण । पुनः "दत्ता भूमिर्न भोग्या..॥१०/४१॥"[2] इति मत्वा स सरिन्नाथसकाशे अवकाशमयाचत, एतेन तस्य अनासक्ततापि प्रकाशिता ।

- ✓ हैहयविजयम्

अत्र प्रथमे सर्गे विप्रेषु हैहयस्य दानशीलतायाः वर्णमुपलभ्यते केवलम् एकमात्रे श्लोके, तद् यथा –

"दानोचितं करसहस्रमजन्यमुष्य विप्रेषु दातृषु परिग्रहकुण्ठितं यत् ।
अत्युच्छ्रितेन शिरसा तदानतेन स्वीकर्त्तुमीश्वरपदं चकमे स दत्तम्॥१/२७॥"[3] इति।

---

[1] सा.द.(हरिदास.) पृष्ठे ९०

[2] परशु.च.(प्र.सं.) पृष्ठे ७१

[3] हैहय.वि.(प्र.सं.) पृष्ठे १६

✓ पाण्डवविजयम्

पाण्डवा धार्त्तराष्ट्रैः निगृहीता अपि आत्माभिमानं विहाय कुलक्षयवारयितुं शान्तिमुशन्ति इत्यनेन अभिमानत्यागात्ते त्यागिन इति वक्तुं शक्यते । प्रसङ्गेऽस्मिन् कौरव्यां सभायां दौत्याय विनियुक्तं माधवं प्रति युधिष्ठिरोपदेशेषु उक्तिरियं तथा दौत्ये काले माधवस्य उक्तिरपि मानम्, यथाक्रमेण –

"शमप्रिया विस्मृतपूर्वनिग्रहाः समं त्वया सन्धिमुशन्ति पाण्डवाः।..॥१/१५॥
निग्रहं ज्ञातिविहितं विस्मृत्यामतविग्रहाः।
शममिच्छन्ति ते शूरा भरता मा नशन्निति ॥५/६॥"[1] इति।

➢ **कृती**

पुनः नायकः कृती, कर्मकुशलो, वीरो वा भवेत् ।

✓ परशुरामचरितम्

आसीत् स जामदग्न्यः अस्त्रशास्त्रेषु कुशलो निष्णातो वा । अस्योदाहरणं दृश्यते द्वितीये सर्गे जामदग्न्यस्य कैशोरवर्णने शिक्षाग्रहणवर्णनायां (२/१-५)। पुनः सर्गेऽस्मिन् उपान्तिमे श्लोके (२/३७) देवादिदेवसकाशाद् दिव्यास्त्रप्रापनादनन्तरं परशुरामस्य प्रत्यागमनवर्णनायां स "रणपण्डितः"[2] इत्याख्यया अभिधीयते महाकविना हेमचन्द्रेण, एतेन प्रतीयते भृगुवीरस्यास्य रणकुशलता ।

✓ हैहयविजयम्

आसीद् हैहयस्तु वीरः, प्रजाशासनकर्मणि, धर्म्मपालने च कुशलः। अतो नूनमेव कृती स, तस्योदाहरणं दृश्यते प्रथमे सर्गे चरिताख्यानवर्णनावसरे –

"निवर्त्तयन्नीहितमप्यघं कृती प्रवर्त्तयन् पुण्यपथे च वासनाः।
स रञ्जयन् भूततर्तिं विभूतिभी रराज धर्म्मो भुवि मूर्त्तिमानिव॥१/१६॥"[3] इति।

---

[1] पा.वि.(द्वि.सं.) पृष्ठे ८, ३७

[2] परशु.च.(प्र.सं.) पृष्ठे २१

[3] हैहय.वि.(प्र.सं.) पृष्ठे १४

✓ पाण्डवविजयम्

महाकाव्येऽस्मिन् फलभूतस्य विजयस्य कृते कुरुक्षेत्ररणमेव कर्मत्वेन स्वीकृतम् महाकविनामुना । अस्मिन् कर्मणि पाण्डवानां कुशलत्वं प्रतिपद्यते प्रथमे सर्गे माधवं प्रति युधिष्ठिरोक्तिषु, द्वितीये सर्गे द्रौपद्याः अवमानननामर्षप्रदीप्तेषु वचनेषु, चतुर्थे सर्गे कुन्त्याः वाक्षु, पुनः पञ्चमे सर्गे दौत्ये दूतभूतेषु शौरिवचनेषु भीमार्ज्जुनादीनां रणपटुत्ववर्णनेन पूर्व्वजितानां समराणामुल्लेखद्वारेण च। उदाहरणतया दूतभूतस्य माधवस्य उक्तय उद्धृताः –

"किमसौ दुग्रहं बध्नन् मत्स्यराजस्य गोग्रहे। मुक्तस्तेनैव निग्राह्योऽनुग्रहेणेति नाग्रहीत्॥५/१६॥
तुल्यो गदायां चापे च भीमः प्रहरतां वरः। अभिन्नौ च यमौ युद्धे प्रभिन्नाविव कुञ्जरौ॥५/१८॥"[१] इति।

➢ **कुलीनः**

कुलीनः अर्थात्, सद्वंशजातः पुरुष एव नायकत्वमेति नान्यः।

✓ परशुरामचरितम्

भृगुकुलोद्भूतत्वाद् भार्गवस्यास्य जामदग्न्यस्य कौलीन्यं स्थिरमेव । महाकाव्यस्यास्य अनेकेषु स्थानेषु द्योतितमस्य कौलीन्यम्, यथा – द्वितीये सर्गे (श्लोकः५), चतुर्थे सर्गे (श्लोकौ ३३, ३४ च), पञ्चमे सर्गे (श्लोकः १९), षष्ठे सर्गे (श्लोकः १८), सप्तमे सर्गे (श्लोकौ ५१, ६० च), अष्टमे (श्लोकः ७), नवमे (श्लोकौ १, २६ च), दशमे (श्लोकाः १, ८, २७ च) इत्यादयः। सर्व्वानेतान् व्यतिरिच्य जामदग्न्यस्य कौलीन्यप्रसङ्गे मङ्गलाचरणस्य अन्तिमे श्लोके प्रथमं पादमेव मानमादिभूतमिति – "नेता श्रीभृगुनन्दनो भगवतो नारायणस्यांशजः..॥८॥"[२] इति ।

✓ हैहयविजयम्

आसीत् कार्त्तवीर्यः क्षत्रियः तथा चन्द्रकुलोद्भूतः, अतस्तस्य कुलीनत्वं सिद्धमेव । विषयेऽस्मिन् मङ्गलाचरणस्य अन्तिमश्लोकस्य प्रथमपादमेव मानम् – "नेता चन्द्रकुलोद्भवो नरपतिः श्रीकार्त्तवीर्य्यार्ज्जुनः..।॥४॥"[३]इति।

---

[१] पा.वि.(द्वि.सं.) पृष्ठे ३८

[२] परशु.च.(प्र.सं.) पृष्ठे ६

[३] हैहय.वि.(प्र.सं.) पृष्ठे ९

✓ पाण्डवविजयम्

कौरवनृपतेः पाण्डोः पत्नीगर्भजाताः क्षेत्रजाः पाण्डवाः धर्म्मतः क्षत्रियाः । पुनः यतस्ते पाण्डुसुताः कौरवाः ततस्ते भरतवंशीयाः, भरतवंशीयत्वात्ते पौरवाः, पौरवत्वात्ते ऐलाः, ऐलत्वात्ते पाण्डवाः चन्द्रवंशीयाः यत इलायाः पतिरासीच्चन्द्रदेवसुतो बुधः । अत एव कुलीनाः खलु पाण्डवा नास्तीत्यत्र सन्देहस्य लेशः ।

➢ **सुश्रीकः**

सुश्रीक इति पदस्यार्थो बुद्धिमानिति । अत्रालोच्येषु मुख्यचरित्रेषु लक्षणमिदमस्ति नास्ति वेत्यालोच्यते ।

✓ परशुरामचरितम्

परशुरामस्य धीशक्तेः उदाहरणं केवलं द्वितीये सर्गे एव उपलभ्यते, तस्य कैशोरवर्णने श्लोकेनैकेन –

"अनन्यसाधारणधीगुणाढ्यं सदा सुपात्रं प्रति सुप्रसन्ना ।
अध्येतुकामं नियमेन विद्याः स्वयं सरस्वत्युपसंश्रितैनम्॥२/३॥"[१] इति।

✓ हैहयविजयम्

हैहयस्य सुबुद्धेः प्रमाणमुपलभ्यते नवमे सर्गे । यत्र पुलस्तमुनेः अनुरोधेन रावणेन सह मैत्रीं चकार कार्त्तवीर्य्यः, येन निवृत्ता जाता नरराक्षसयोः भावियुद्धाः। युद्धेन कस्यापि मङ्गलं न विधीयते, विधीयते तु केवलमनिष्टम् यथा – धनहानिः, मानहानिः, स्वजनहानिः, राज्यहानिरित्यादयः। महाकाव्येऽस्मिन् स्वगर्वतृप्त्यर्थं रावणेनाश्रियते युद्धः, हैहयेन तु आश्रियते मैत्री अतो बुद्धिमानयं नायकः।

✓ पाण्डवविजयम्

महाकाव्यस्यास्य पञ्चमे सर्गे श्रीकृष्णेनोक्तम् "अनिश्चितफलं युद्धं नीतिविद्भिः सुनिन्दितम्..॥५/४२॥"[२] इति । दृश्यते यत्, कुरुयुवराजो दुर्य्योधनो युद्धमेव केवलं काङ्क्षति

---

[१] परशु.च.(प्र.सं.) पृष्ठे १४

[२] पा.वि.(द्वि.सं.) पृष्ठे ४१

पाण्डवैः सह अभिमानान्धतया ; पाण्डवास्तु आदौ निन्दितमार्गं युद्धं विहाय शान्तिमुशन्ति दौत्येन, साम्ना स्वराज्यलाभेन च । सामे विफले बभुवुस्ते युद्धोद्योगिनः। अत इमे नायकाः सुबुद्धिसम्पन्ना इत्याशयो मे ।

- **रूप-यौवनवान्**

रूपयौवनवत्वं नायकस्य अपरं वैशिष्ट्यम्, यतः संस्कृतवाङ्मये दृश्येषु श्रव्येषु च काव्येषु नायकानां रूपयौवनवर्णना वर्णिता प्रायः सर्व्वैरेव कविभिः । अतो रूपयौवनान्वितो नायकः खलु ईप्सितः काव्यकृतिषु । उदाहरणानि यथा –

- ✓ परशुरामचरितम्

परशुरामस्य तेजोमयं रूपवर्णनमुपलभ्यते पञ्चमे सर्गे हैहयमुद्दिश्य रणप्रयाणे श्लोकचतुष्टये (५/१९-२२) । पुनः षष्ठे सर्गे आदिभूते श्लोकत्रितये हैहयेन परशुरामदर्शनवर्णने विहिता जामदग्न्यस्य रूपवर्णना (६/१-३), उदाहरणतया श्लोकोऽयमुद्ध्रियते –

"इतस्ततः क्षिप्तजटाकलापं धनुर्भुजङ्गप्रतिमं दधानम् ।
कृष्णत्वगावर्म्मितभीमरूपं मूर्त्यन्तरं वा नवमष्टमूर्त्तेः ॥६/३॥"[1] इति।

- ✓ हैहयविजयम्

हैहयस्य रूपवर्णना विधीयते प्रथमसर्गे षष्ठे श्लोके तदीये भुजानां वर्णनायाम्[2]। अथ द्वितीये सर्गे बधुसहस्रेण सह सहस्रबाहोः जलकेलिवर्णनायां तस्य यौवनस्वभावस्य वर्णना विहिता, अतस्तरुणः सः। पुनः कार्त्तवीर्य्यस्य यौवनस्वभावान्विता रूपवर्णना दृश्यते महाकाव्यस्यास्य चतुर्थे सर्गे अन्तिमे श्लोकत्रये, तेष्वेक उद्ध्रियते –

"भुजपरिघ-सहस्रसन्निरुद्धं सरिदुदकं प्रतिकूलमीरयन्तम् ।
गिरिवरणमिव स्थितं पुमांसं युवतिपरितमपश्यताममुन्तौ॥४/२३॥"[3] इति।

- ✓ पाण्डवविजयम्

---

[1] परशु.च.(प्र.सं.) पृष्ठे ४१

[2] हैहय.वि.(प्र.सं.) "अनन्तभोगा इव भूमिरक्षिणस्त्विषां सहस्रांशुकरा इवाश्रयाः।द्विषां विशेषेण रुजामजीजनन् भुजा भुजङ्गाकृतयोऽस्य भूभुजः॥१/६॥" इति, पृष्ठे १२

[3] तत्रैव. पृष्ठे ३२

महाकाव्येऽस्मिन् केवलं नायकभूतयोः नकुलसहदेवयोः रूपयौवनस्य वर्णना उपलभ्यते चतुर्थे सर्गे सह कृष्णेन पृथायाः कथोपकथने श्लोकेनैकेन –

"यौ जीवितादप्यधिकौ मतौ मे सुखोचितौ पुष्करगर्भकान्तौ ।
यमौ श्रितक्लेशपरम्परौ तौ किमर्भकौ सम्प्रति जीवतोऽपि ॥४/११॥"[१] इति।

- **उत्साही**

रूपयौवनान्वितत्वाद् नायकस्य कृते तारुण्यं तु सिद्धमेव । अतः तारुण्यत्वाद् उत्साहवत्वमपि नायकचरित्रे स्वाभाविकवैशिष्ट्यरूपेण प्रतीयते, वैशिष्ट्यस्यास्य उदाहरणानि यथा –

✓ परशुरामचरितम्

परशुरामस्य रणोत्साहः, ब्रह्मतेजोद्धारोत्साहश्च अत्र अनेकेषु सर्गेषु एव प्राप्यन्ते, यथा– द्वितीये सर्गे (श्लोकाः १६-१८,२७), तृतीये सर्गे (श्लोकः २२), पञ्चमे सर्गे (श्लोकाः १८-२३), नवमे सर्गे (श्लोकः २४) इत्यादिषु । एतेषु उदाहरणतया श्लोकोऽयमुद्ध्रियते –

"तत्त्वत्प्रसादैकगतिस्तवाद्य शिष्यत्वमाकाङ्क्षति दास एषः।
ब्राह्मं बलं तीव्रविषोपमेयात् क्षात्त्रौजसो रक्षितुमस्त्रवैरे ॥२/२७॥"[२] इति।

✓ हैहयविजयम्

अथ षष्ठे सर्गे स्वसैन्यक्षयं दृष्ट्वा सहस्रबाहोः सगर्ज्जितवचनेषु तस्य रणौत्सुक्यता वर्णिता सम्यग्रूपेण, अस्योदाहरणतया उद्ध्रियते श्लोकोऽयम् –

"तथापि रक्षस्तव मद्भुजाग्रादहेः सुपर्णादिव नास्ति मोक्षः।
नो यावदद्ध्यस्तटमुत्तरामि प्रत्यर्ज्जुनं सम्प्रति गर्ज्ज तावत् ॥६/१९॥"[३] इति।

अत उत्साहवानयं नायकः।

✓ पाण्डवविजयम्

महाकाव्यस्यास्य विभिन्नेषु स्थानेषु यथा केवलं कुलक्षयवारणाय शमस्थापने पाण्डवानां (युधिष्ठिरार्ज्जुनस्य) उत्साहो दृश्यते, तथैव युद्धोत्साहोऽपि दरीदृश्यते तेषां (भीमार्ज्जुनादीनां) चरित्रे ।

---

[१] पा.वि.(द्वि.सं.) पृष्ठे ३२

[२] परशु.च.(प्र.सं.) पृष्ठे १९

[३] हैहय.वि.(प्र.सं.) पृष्ठे १९, २० च

उभयविधस्यास्य उत्साहस्य उदाहरणानि अत्र अधस्तादुद्धृतानि ; यथा - दूतसभायां निग्रहामर्षप्रदीप्तोऽपि केवलं कुलक्षयवारणाय अर्जुनस्य शमस्थापनोत्साहो दृश्यते प्रथमे सर्गे –

"प्रसह्य तास्ता निकृतीर्विधाय किं न धार्त्तराष्ट्रो वधमस्मदर्हति।
ध्रुवं विरोधे तु कुलक्षयो महान् स जातु मा भूदिति सन्धिरिष्यते॥१/२५॥"[१] इति।

भीमस्य रणोत्साहो दृश्यते द्वितीये सर्गे, यथा –

"ननु विद्धि निगृह्यमूर्द्धजे कुलजां त्वां जनकात्मजामिव ।
स दशाननदुर्द्दशां गतो युधिदुःशासन इत्यलं शुचा॥२/३५॥
अभिनन्दितवासुदेववागथ भीमो मुमुदे यमौ तथा।..॥२/३७॥"[२] इति।

- **दक्षः**

अत्र दक्ष इति पदेन अनलस इत्यर्थ एव बुध्यते ।

- ✓ परशुरामचरितम्

अत्रत्ये द्वितीये, दशमे च सर्गे परशुरामस्य तपश्चरणवर्णनायां तथा षष्ठे, सप्तमे, अष्टमे, दशमे चेत्यादिषु सर्गेषु पुनः पुनः युद्धवर्णनायां द्योतिता तस्य अनलसता इति ।

- ✓ हैहयविजयम्

प्रथमे सर्गे हैहयशासने प्रजानामवस्था-वर्णनायां प्रकटिता धर्मशास्त्रानुगते सुशासनप्रणयने नृपतेरस्य अनलसता, निगदितश्च महाकविना –

"न चामयः क्वापि न वानपत्यता बधूषु वैधव्यमभून्न भूतले।
न जातु दारिद्र्यमवेदि केनचिन्न विप्रयोगश्चिरमन्वशोचि वा॥१/११॥
ववौ समीरः सुखमस्य शासने जहौ समुद्रोऽपि जनोपपीडनम्।..॥१/१२॥"[३] इति।

- ✓ पाण्डवविजयम्

---

[१] पा.वि.(द्वि.सं.) पृष्ठे १०

[२] तत्रैव. पृष्ठे २१

[३] हैहय.वि.(प्र.सं.) पृष्ठे १३

समग्रे महाकाव्ये यथा पाण्डवैः शमोद्योगो दृश्यते तथैव दरीदृश्यते युद्धोद्योगोऽपि, एतेन उभये उद्योगे तेषां निरलसप्रयत्न एव पुनः पुनः प्रतीयते, अतस्ते पाण्डवाः अनलसा इति वक्तुं शक्यते सम्यक्तया ।

- **अनुरक्तलोकः**

अनुरक्तलोक इति पदस्यास्य व्युत्पत्त्या एवास्य अर्थो ज्ञायते - "अनुरक्ताः लोकाः यस्मिन् सः" इत्यत्र 'लोकाः' इति पदेन के एव बुध्यन्ते ? अस्योत्तरे वक्तुं शक्यते यत्, काव्यकृतौ नायकं व्यतिरिच्य सर्वाण्येव चरित्राणि 'लोकाः' इति पदेन बुध्यन्ते । अतो नायिकाः, नायिकानायकयोः सहायकाः तथा नृपाश्रिते काव्ये प्रजाः अपि 'लोकाः' इत्यभिधया अभिहितुं शक्यते । एतेन प्रतीयते यत्, काव्यकृतौ यस्मिन्नेव पात्रे अन्यानि सर्वाणि पात्राणि जातानि अनुरक्तानि, तच्चरित्रमेव नायकत्वमेति नान्य इत्याशयो मे ।

- ✓ परशुरामचरितम्

परशुरामस्य अवतारत्वात् तं प्रति देवानां, समुद्राणां, ब्राह्मणानां चानुरक्तता चित्रिता महाकाव्यस्य विविधेषु सर्गेषु ।

- ✓ हैहयविजयम्

महाकाव्येऽस्मिन् षष्ठे सर्गे राज्ञो हैहयस्य रक्षणाय रावणसैन्यैः सह तस्यामात्यानां युद्धे, पुनः नवमे सर्गे हैहयपौलस्त्ययोः युद्धे पराजयादनन्तरं पुलस्त्यस्योपदेशेन विजयिना हैहयेन सह पराभूतस्य रावणस्य सन्धिस्थापने प्रकाशिता जाता नायकं प्रति तदनुचराणां तथा प्रतिनायकस्य अनुरक्तता वश्यता चेति ।

- ✓ पाण्डवविजयम्

अत्रत्येषु विविधेषु सर्गेषु नायकान् पाण्डवान् प्रति प्रतिनायकं तथा प्रतिनायकसहायभूतं अश्वत्थामानं व्यतिरिच्य अधिकांशानि श्रीकृष्ण-द्रौपदी-कुन्ती-विदुर-भीष्म-द्रोण-शल्य-कर्णादीनां चरित्राणामानुगत्येनैव प्रतिपादितं नायकस्य अनुरक्तलोकत्वमिति ।

- **तेजोवान्**

नायकस्तु भवेत् तेजस्वी ।

✓ परशुरामचरितम्

अत्र प्रथमं, तृतीयं, चतुर्थञ्च सर्गत्रितयं व्यतीत्य प्रायः सर्व्वेषु सर्गेषु एव परशुरामस्य तेजोविजृम्भिता वर्णना समुपलभ्यते । प्रसङ्गेऽस्मिन् दिङ्मात्रमुदाहरणं यथा –

"इत्थं तमत्रिजनिभं जमदग्निपुत्रमग्निं प्रसृप्तमथवा धगिति प्रदीप्तम् ।
ज्योतिः प्रकाण्डमिव वा प्रसृतं सशब्दं प्रत्यर्जुनं दिविषदो ददृशुः प्रतीताः॥५/२२॥"[१] इति।

✓ हैहयविजयम्

प्रथमे, षष्ठे, सप्तमे, अष्टमे, नवमे चेति सर्गपञ्चके हैहयस्य वर्णनावसरे तस्य तेजस्विताया वर्णनापि विहिता बहुसु स्थानेषु, तेष्वेक एव उद्ध्रियते –

"सुदुःसहो भानुरिवारिमण्डलैरुपप्लवो वह्निरिवापराधिनाम्।
स मातरिश्वेव बभूव सर्व्वगो नरोऽपि सर्व्वज्ञ इतीश्वरोपमः॥१/१२॥"[२] इति।

✓ पाण्डवविजयम्

अत्रत्ये प्रथमे सर्गे युधिष्ठिरोक्तिषु, अर्ज्जुनवचनेषु च; एकादशे सर्गे द्रौपदीविलापं श्रुत्वा अर्ज्जुनोक्तिना तयोः तेजस्विता प्रकटिता । पुनः द्वितीये सर्गे माधवोक्तेः प्रतिक्रियायां, सप्तमे सर्गे उलूकदौत्यस्य प्रत्युत्तरे भीमस्य तेजस्वितापि परिस्फुटिता ।

➢ **वैदग्ध्यम्**

नायकः स्याद् विदग्धो निपुणः पण्डितो निगूढाभिप्रायज्ञो वेति ।

✓ परशुरामचरितम्

परशुरामस्य चरित्रे अस्त्रशास्त्रेषु यथा वैदग्ध्यं दृश्यते तथैव धर्म्मशास्त्रेष्वपि । षष्ठे सर्गे हैहयभार्गवयोः कथोपकथनमेव मानमस्मिन् प्रसङ्गे (श्लोकाः ११-१७), उदाहरणतया उद्ध्रियते श्लोकोऽयम् –

"वीरस्य धर्म्मो न हि दस्युवृत्तिर्वीर्य्यं कुतस्ते मुनिधेनुहर्त्तुः।
युद्धाय धीरो भव वीरमानीन् न त्वा न हत्वाहमितो निवर्त्ते ॥६/१४॥"[३] इति।

---

[१] परशु.च.(प्र.सं.) पृष्ठे ४०

[२] हैहय.वि.(प्र.सं.) पृष्ठे १३

[३] परशु.च.(प्र.सं.) पृष्ठे ४३

✓ हैहयविजयम्

राज्यशासने हैहयस्य विदग्धता निपुणता पाण्डित्यं वा दृश्यते प्रथमे सर्गे तस्य चरितवर्णनावसरे। यतः स आसीत् नियोगकर्म्मसु पक्षपातरूपदोषरहितः, अपि च स सदैव पण्डितैः सह समालोच्य दण्डस्य प्रयोगं चकार[१]।

✓ पाण्डवविजयम्

अत्रत्ये प्रथमे सर्गे दूतविनियोगविधौ कृष्णसकाशे स्वकीयावस्था वर्णनावसरे तथा दौत्याय उपदेशदानावसरे ज्ञातिभूतानां शत्रूणां तथा सज्जनानां अभिप्रायाऽपि वर्णिताः ज्येष्टेन पाण्डुसुतेन युधिष्ठिरेण । एतेन तस्य धर्म्माधर्म्मविषयिनी, राजनीतिविषयिनी च विदग्धता यथा प्रतीयते तथैव निगुढाभिप्रायज्ञतापि प्रकटिता ।

➢ **शीलवान्**

नायकस्य कृते शीलता अर्थात् सद्वृत्तता सच्चरित्रता वा अत्यावश्यकीया । प्रसङ्गेऽस्मिन् विश्वनाथस्य उक्तिरेव मानम्[२]।

✓ परशुरामचरितम्

परशुरामस्य शीलतायाः उदाहरणानि दृश्यन्ते द्वितीये सर्गे तपश्चरणाय पितुरनुज्ञालाभे, तृतीये सर्गे पितुः मातृबधादेशपालने ; पञ्चमे सर्गे मात्रादेशेन होमधेनुप्रत्यानयनाय हैहयमुद्दिश्य तस्य रणप्रयाणे ; दशमे सर्गे दालभ्यमुनेः अनुरोधपालने, पुनरस्मिन्नेव सर्गे पितामहस्य ऋचीकस्य निर्देशेन क्षत्रीयान् प्रति क्षमादाने चेत्यादिषु स्थानेष्विति ।

✓ हैहयविजयम्

हैहयस्य शीलताया उदाहरणं दृश्यते नवमे सर्गे यत्र स सभागृहे सहसागतं पुलस्त्यं महामुनिं दृष्ट्वा तं रावणस्य पितामहरूपेण जानन्नपि अर्च्चितवान्, ततः परं तस्य मुनेरनुरोधानुसारेण प्रहर्षितः स मुमोच लङ्केश्वरम् । अतः शीलवानयं नायकः।

---

[१] हैहय.वि.(प्र.सं.) “अपक्षपातोऽपि जनेषु रक्षणे गुणं हि जग्राह नियोगकर्म्मसु । न चैष दण्डं प्रणिनाय नायको न दोषमालोच्य विचारपण्डितैः ॥१/१५॥” इति, पृष्ठे १४

[२] सा.द.(हरिदास.) “शीलं सद्वृत्तम् ।” इति, पृष्ठे ९०

✓ पाण्डवविजयम्

अत्रत्ये प्रथमे सर्गे दौत्याय कृष्णं प्रति अनुरोधे, कुरुवृद्धान् प्रति कृष्णेन सत्कारप्रदर्शनं कर्त्तव्यमित्युपदेशे ; सप्तमे सर्गे उलूकमुखेन दुर्य्योधनोक्तानि अवमाननात्मकानि वचनानि श्रुत्वापि दूतावमाननाकारिणं कुरुयुवराजमिव दौत्यस्य मर्यादां न विहाय उलूकस्य विसर्जने ; नवमे सर्गे कुरुयुवराजनिर्यातनाद् भीमस्य निवारणे च प्रकटिता युधिष्ठिरस्य धर्म्मशीलता । पुनः द्वादशे सर्गे मुनेः द्वैपायनस्य आदेशानुसारेण लोकहिताय ब्रह्मशिरास्त्रप्रत्याहरणेन अर्ज्जुनस्य शीलतापि चित्रिता ।

अत्र दृश्यते यत्, नायकलक्षणगतानि सर्वाणि साधारणवैशिष्ट्यानि सन्ति भार्गवे परशुरामे, हैहयैधिपतौ कार्त्तवीर्य्यार्ज्जुने, चन्द्रवंशीयेषु पाण्डवेषु । अतः अनेनैव प्रतिपादितम् एतेषां चरित्राणां नायकत्वमिति ।

## *नायकभेदः*

अधुना परशुरामहैहयपाण्डवादयो नायकाः नायकभेदेषु कस्मिन्नेव भेदे आपतन्ति इति विचारयितुं नायकस्य भेदविषये आलोच्यते । विश्वनाथेन नायकस्य चातुर्विध्यं स्वीकृतम्, तद् यथा – 'धीरोदात्तः', 'धीरोद्धतः', 'धीरललितः', 'धीरप्रशान्त'श्चेति । तदुक्तं साहित्यदर्पणे –

"धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च।
धीरप्रशान्त इत्ययमुकक्तः प्रथमश्चतुर्भेदः॥३/३६॥"[१] इति।

'महाकाव्यस्य नायकस्तु धीरोदात्तलक्षणान्वितः स्यादि'त्येव निर्देशोऽस्ति पूर्वोक्ते महाकाव्यलक्षणे, अतः अधुना आलोच्यमाने महाकाव्यत्रये नायकत्वेन स्वीकृताः परशुरामहैहयपाण्डवाः धीरोदात्ता न वेति विषयस्यास्य विचारणं कर्तव्यमिति । धीरोदात्तनायकस्य लक्षणं यथा साहित्यदर्पणे –

"अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।
स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः॥३/३७॥"[२] इति।

अर्थात्, यस्मिन् नायके आत्मश्लाघाहीनता, क्षमावानता, अतिगाम्भीर्यम्, महासत्त्वत्वम्, स्थैर्यम्, निगूढमानता, दृढव्रतत्वमित्यादीनि वैशिष्ट्यानि सन्ति स एव धीरोदात्तो नायकः। इमानि वैशिष्ट्यानि आधारीकृत्यैव यथाक्रमेण विधीयते परशुरामहैहयपाण्डवादीनां नायकानां धीरोदात्तत्वविचारणम् –

---

[१] सा.द.(हरिदास.) पृष्ठे ९१

[२] तत्रैव. तत्पृष्ठे

➢ **अविकत्थनः**

✓ परशुरामचरितम्

अत्रत्ये नवमे सर्गे अधार्म्मिकस्यापि हैहयेशस्य बधजनिताय पापक्षालनाय पित्रादेशात् प्रायश्चित्तभूतेन तीर्थगमनेन तथा दशमे सर्गे दालभ्यमुनेः अनुरोधपालनेन प्रकाशिता जाता नायकगता अविकत्थनता इति ।

✓ हैहयविजयम्

महाकाव्यस्यास्य नवमे सर्गे पुलस्तमुनिमालोक्य तं रावणस्य पितामहरूपेण ज्ञात्वापि विनयेन सह तस्य मुनेः सत्कारकरणेन प्रकटितो हैहयस्य आत्मश्लाघाया अभावः ।

✓ पाण्डवविजयम्

प्रथमे तथा पञ्चमे सर्गे धर्म्माचारिणोऽपि पाण्डवाः अधर्म्माचिणैः अत्रपैः धार्त्तराष्ट्रैः सह शमस्थापनाय चेष्टिताः दौत्यद्वारेण, एतेनैव प्रकाशिता पाण्डवानां अविकत्थनता ।

➢ **क्षमावान्**

✓ परशुरामचरितम्

महाकाव्येऽस्मिन् पितामहस्य महर्षेः ऋचीकस्य निर्देशाद् नायको जामदग्न्यः क्षत्त्रकुलध्वंसाद् विरराम इत्येव दृश्यते दशमे सर्गे (श्लोकाः ३०-३३)। अतः क्षमावानयं नायक इति।

✓ हैहयविजयम्

पुनः नवमे एव सर्गे पुलस्तमुनेः अनुरोधात्मकमुपदेशमनुसृत्य सोऽर्ज्जुनः क्षमया रावणं मुमोच मैत्रीं च चकार तेन सह, अतो नायकोऽयं क्षमावानित्याशयो मे ।

✓ पाण्डवविजयम्

प्रथमे सर्गे शौरिं प्रति युधिष्ठिरस्य वचनेषु विशेषतः “शमप्रिया विस्मृतपूर्व्वनिग्रहाः... पाण्डवाः..॥१/१५॥”[१] इत्यादिषु उक्तिषु न केवलं युधिष्ठिरस्य, अपि तु सर्व्वेषां पाण्डवानां

---

[१] पा.वि.(द्वि.सं.) पृष्ठे ८

क्षमावानता एव प्रकाशिता ; पुनः द्वादशे सर्गे अश्वत्थामानं प्रति तमहन्तुकामस्य अर्ज्जुनस्य उक्तिभिरेव प्रकटिता तदीया क्षमा । अतः एते नायकभूताः पाण्डवाः क्षमागुणान्विता इति वक्तुं शक्यते ।

- **अतिगम्भीरः**

  - ✓ परशुरामचरितम्

महाकाव्येऽस्मिन् नायकचरित्रे उक्तेराधिक्यं नोपलभ्यते, अपि तु परशुरामोक्तेषु उक्तिषु तस्य तेजविजृम्भितगाम्भीर्य्यमेव अस्माकं नयनपथमुपैति, अस्य दिङ्मात्रमुदाहरणं यथा –

"प्रविहाय पुरातनीं तनुं नवमासाद्य महःकलेवरम् ।
तपसा दिवि दीप्यतां पिता भुवि मत्क्रोधशिखी च जृम्भताम् ॥९/२१॥"[१] इति।

  - ✓ हैहयविजयम्

प्रथमे सर्गे चरितवर्णनायां, षष्ठे सर्गे रणक्षेत्राभिगमनवर्णनायां, पुनः नवमे सर्गे रक्षविजेतुः हैहयस्य वर्णने परोक्षतया द्योत्यते नायकस्यास्य गाम्भीर्यातिशय्यमिति।

  - ✓ पाण्डवविजयम्

प्रथमे सर्गे युधिष्ठिरवचनादनन्तरम् अर्ज्जुनेनोदीरितानामुक्तीनां प्रारम्भे महाकविना हेमचन्द्रेण श्लोकेनैकेन विहिता नायकभूतस्य मितभाष्यभाषिनः तृतीयपाण्डवस्य वर्णना, येन प्रतीयते चरित्रस्यास्य अतिगाम्भीर्य्यम् –

"अवश्यमेवं प्रयतिष्य इत्यसौ नमन्नृपालं मितभाष्यभाषत ।
अथामुमुद्वीक्ष्य सखायमर्ज्जुनः प्रसन्नगम्भीरमुदाहरद्वचः ॥१/२२॥"[२] इति।

एतद्व्यतीत्य सप्तमे सर्गे उलूकवचनानि श्रुत्वा अमर्षप्रदीपतस्य मध्यमपाण्डवस्या या वर्णना विहिता कविनामुना, तयापि प्रतिपद्यते अतिगाम्भीर्य्यमिति । अत इमे नायकाः अतिगम्भीरा इत्यत्र नास्ति सन्देहलेशः।

---

[१] परशु.च.(प्र.सं.) पृष्ठे ६५

[२] पा.वि.(द्वि.सं.) पृष्ठे ९

➢ **महासत्त्वः**

✓ परशुरामचरितम्

महाकाव्येऽस्मिन् जगज्जेतापि स नायको जामदग्न्यः नाभूत् सुखी, यतः स कुरुक्षेत्रे यज्ञसम्पादनादनन्तरं कश्यपादिऋत्विग्भ्यो ददौ पृथिवीमिति । ततः परं तृतीये सर्गे स पितुः सकाशाद् मातृहत्यादेशं प्राप्य सकृदेवाभूद् अशान्तः शोकवशात्, पुनः नवमे च सर्गे मृतं पितरं दृष्ट्वा शोकाहतः स विललाप न मुमोह । एतेनैव नायकस्यास्य सुखातिशय्याभावो दुःखातिशय्याभावश्च प्रतिपद्येते । अतो महासत्त्व एवायं नायकः।

✓ हैहयविजयम्

महाकाव्येऽस्मिन् दृश्यते यद्, नाभूत् स नायको दुःखे अतिदुःखी । परन्तु सुखे स बभुव अतिसुखी । यतो द्वितीये सर्गे अङ्गनाभिः सह सुखे रेवाविहारकाले आत्मरक्षणविषये, अनुजीविनो रक्षणविषये च बभुव स शिथिलः। एतेन अस्मिन् चरित्रे सत्त्वगुणस्य उपस्थितिर्दृश्यते, न दृश्यते सत्त्वस्य आतिशय्यमिति । अतो नायकोऽयं सत्त्वगुणान्वितो, न तु महासत्त्व इति वक्तुं शक्यते ।

✓ पाण्डवविजयम्

समग्रमिदं महाकाव्यं पठित्वा अवगम्यते यद् नायकेषु युधिष्ठिरार्ज्जुनयोः चरित्रे एव प्रकटितं महासत्त्वत्वम् । अस्मिन् विषये द्वितीयसर्गस्य श्लोकद्वयमेव मानम्, यतः तत्र माधववचनाद् युद्धस्य अनिवार्यतामनुभुय युधिष्ठिरो बभूव उन्मना, अर्ज्जुनस्तु नाभूद् विषन्नः न च आनन्दितः। एतेन नायकभूते चरित्रद्वये प्रतिपादितं महासत्त्वत्वम्[१]।

➢ **स्थैर्यवान्**

✓ परशुरामचरितम्

अत्रत्ये द्वितीये सर्गे दिव्यास्त्रलाभाय हिमाद्रौ तपश्चरणवर्णनायां (श्लोकाः १८-२१) प्रतिपादितमस्य नायकस्य स्थैर्य्यमिति । यतः स्थैर्य्यमन्तरेण तपश्चरणन्तु असम्भवमेवेति ।

---

[१] पा.वि.(द्वि.सं.) "..भवितव्यतया युधिष्ठिरः कुलनाशस्य बभूव चोन्मनाः ॥२/३६॥..नियतिर्ज्जयतीति शिश्रिये न विषादं न च मोदमर्ज्जुनः ॥२/३७॥" इति, पृष्ठे २१

✓ हैहयविजयम्

षष्ठे सर्गे रक्षसां सकाशे स्वसैन्यक्षयं ज्ञात्वापि नाभूत् स अधीरो, यतः स दशास्यनामश्रवणे भीतानां स्वाङ्गनानां समाश्वासनात् परं स्नानादिसमापनादनन्तरं समराभिमुखं गतवान्, अतः स्थैर्यवानयं नायकः ।

✓ पाण्डवविजयम्

महाकाव्येऽस्मिन् प्राप्तेषु युधिष्ठिरार्जुनयोः उक्तिषु तयोः स्थैर्यमेवाभिव्यज्यते । अस्योदाहरणं यथा एकादशे सर्गे श्मशानकल्पे शिविरे हतात्मजान् दृष्ट्वा दुःखार्द्दितोऽपि द्रौपदीमानयनाय आदिदेश युधिष्ठिरः, एतेनैव सूचितं तस्य स्थैर्यमिति ।

➢ **निगूढमानः**

✓ परशुरामचरितम्

द्वितीये सर्गे परशुरामचरित्रे निगूढमानतायाः परिचयोऽपि दीयते महाकविना हेमचन्द्रेण श्लोकयुग्मके, यतः तत्र क्षत्रीयानां वलगर्वं दृष्ट्वा परशुरामस्य मनसि क्रोधः, निगूढा ब्रह्मण्यतेजोद्धारेच्छा तथा तद्विषये निगूढा चेष्टापि चित्रिता –

"अथोर्ज्जितं क्षात्त्रमहोऽसहिष्णुरुत्प्रेक्षमाणोऽप्यचिरेण वैरम् ।
ब्रह्मण्यतेजस्तत उद्धरिष्यन् रामः प्रकर्षाय कृतप्रयत्नः ॥२/१६॥
बभार गूढां मनसि प्रतिज्ञां शमीतरुर्वह्निशिखामिवान्तः।..॥२/१७॥"[१] इति।

✓ हैहयविजयम्

रावणमोचनमित्याख्ये नवमे सर्गे पुलस्तमुनिना सह कथोपकथनावसरे प्रकाशिता तस्य हैहयस्य निगूढमानता विनयाच्छन्नोऽहंकारो वा –

"मघवापि यदङ्घ्रिसेवया चरितार्थं कुरुते शिरः स्वकम् ।
सुकृतेन यदृच्छयागतं तमिह त्वामहमर्च्चितुं क्षमः ॥९/१४॥"[२] इति।

---

[१] परशु.च.(प्र.सं.) पृष्ठे १७

[२] हैहय.वि.(प्र.सं.) पृष्ठे ५६

✓ पाण्डवविजयम्

महाकाव्यस्यास्य प्रथमे सर्गे माधवं प्रति युधिष्ठिरार्जुनयोः वाक्ष्वेव यथा विनयो दृश्यते तथैव दृश्यते क्षत्रियोचिताहंकारोऽपि ।यतः प्रथमे सर्गे श्रीकृष्णं प्रति कुरुसभायां दौत्यविषये कथनप्रसङ्गे चतुर्दशसंख्यके श्लोके कुरुवृद्धमण्डली माधवेन अभिवाद्या इति उपदिदेश युधिष्ठिरः, पुनः स धृतराष्ट्रं तथा दुर्य्योधनं प्रति मृदुवाक्यप्रयोगविषये माधवमनुरुरोध – एतेन तस्य विनय एवाभिव्यज्यते । परन्तु पञ्चदशसंख्यके श्लोके प्रकटितस्तस्य क्षत्रियोचिताहंकारश्च –

"यथा न भीष्मो न गुरुर्न चापरे धनञ्जयञ्जेतुमलं धनुर्धरम् ।
तथा विराटस्य तदैव गोग्रहे त्वयापि किन्न प्रतिपन्नमद्भुतम् ॥१/१५॥"[१] इति।

अथ सिताश्वेन उदीरितेषु वचनेषु चतुस्त्रिंशत्संख्यके श्लोके विनयाच्छनाहंकारस्य चित्रणं तु स्फुटमेव । यतः तत्र अर्ज्जुनस्य मतानुसारेण सन्धौ एव पाण्डवानां धार्त्तराष्ट्राणाञ्च मङ्गलम्, परन्तु युद्धे केवलं धार्त्तराष्ट्राणां क्षतिरेव अनुभूयते अर्ज्जुनेन[२]।

➢ **दृढव्रतः**

✓ परशुरामचरितम्

द्वितीये सर्गे शिष्यत्वग्रहणस्य कारणवर्णने तस्य ब्रह्मतेजोद्धारसंकल्प एव दृश्यते । पुनः नवमे सर्गे धरित्रीं निःक्षत्त्रियकरणप्रतिज्ञायामपि द्योतितं नायकभूतस्यास्य जामदग्न्यस्य दृढव्रतत्वम् ।

✓ हैहयविजयम्

अत्रत्ये षष्ठे सर्गे स्वाङ्गनानां सकाशे दशग्रीवनिग्रहस्य संकल्पग्रहणेन तथा अष्टमे सर्गे तत्संकल्पपूरणद्वारेण सूचितं नायकस्यास्य हैहयस्य दृढव्रतत्वमिति ।

✓ पाण्डवविजयम्

अत्रत्ये प्रथमे सर्गे धनञ्जयोक्तिषु अर्ज्जुनस्य कर्णवधप्रतिज्ञा, भीमकृता दुर्य्योधनोरुभङ्गप्रतिज्ञा ; पुनः सप्तमे सर्गे उलूकदौत्ये भीमकृता दुःशासनरक्तपानप्रतिज्ञापि वर्णिता । अथ अष्टमे नवमे च सर्गे दृश्यते प्रागुक्तानां प्रतिज्ञानां पालनमित्यनेनैव सूचितमस्य चरित्रद्वयस्य दृढव्रतत्वमिति ।

---

[१] पा.वि.(द्वि.सं.) पृष्ठे ८

[२] तत्रैव. "यथा च सन्धौ सममस्य तस्य च द्वयोः शिवं, किन्तु रणे व्यवस्थिते ।क्षतिस्तदीयैव परा,.॥१/३४॥" इति, पृष्ठे १२

एतेनैव सम्यगेव प्रतिपद्यते यद्, आलोचिते महाकाव्यत्रये नायकभुताः परशुराम-हैहयेश-पाण्डवाः सामान्येन धीरोदात्तगुणान्विता नायका इति ।

## रसविधानम्

केवलं कतिपयैः सर्गबन्धश्लोकैरेव कापि रचना न काव्यत्वमेति, यतो वाक्यस्य काव्यत्वं रसमेवावलम्ब्यते, इत्यस्मिन् प्रसङ्गे साहित्यदर्पणस्य काव्यलक्षणमेव मानम्[१]। अतस्तत्र महाकाव्यस्य कृते रसविधानमपि विधीयते, तन्मतानुसारेण शृङ्गारवीरशान्तानां मध्ये एक एव कस्यचन महाकाव्यस्य अङ्गिरसरूपेण उपस्थापनीयः[२]।

हेमचन्द्रप्रणीतेषु प्रायः सर्वेषु महाकाव्येषु नियमस्यास्य पालनं प्रायः एव दृश्यते । उदाहरणतया 'परशुरामचरितम्', 'हैहयविजयम्', 'पाण्डवविजयम्' चेति महाकाव्यत्रयस्य रसविषये आलोच्यते यथाक्रमेण –

**परशुरामचरितम्**

साहित्यदर्पणस्य विधानं सम्पूर्णतया अनुसृत्य वीररस एवाङ्गित्वेन स्वीकृतः कविभूषणेनामुना, मानमस्मिन् विषये महाकाव्यस्यास्य मङ्गलाचरणमिति अंशे सन्निवेशिता कवेरुक्तिः[३] । महाकाव्येऽस्मिन् अङ्गिरसोऽयं न केवलं नायकं प्रतिनायकमपि आश्रयति, यतो वीरस्य स्थायिभावभूत उत्साहः उभयत्रैव दृश्यते ।

**हैहयविजयम्**

अत्रापि दृश्यते विश्वनाथकृतस्य विधानस्य पूर्णानुसरणम्, यतः केवलं वीर एवाङ्गित्वेन प्रतिष्ठितो महाकाव्येऽस्मिन् । अत्रापि मङ्गलाचरणे महाकवेरुक्तिरेव प्रमाणत्वेन ग्रहीतुं शक्यते "वीरो मुख्यरसः... ॥४॥"[४] इति। अस्मिन्नपि महाकाव्ये अङ्गिरसोऽयं नायकं प्रतिनायकञ्च आश्रयति, स्थायिभूतस्य उत्साहस्य उभयत्रैव व्यञ्जनत्वादिति ।

**पाण्डवविजये**

विश्वनाथकविराजप्रणीते रसविधानविषये आलोचनाप्रसङ्गे उल्लेख्यं यद्, 'कुसुमप्रतिमा' इति टीकायां हरिदाससिद्धान्तवागीशेन करुणरसोऽपि महाकाव्यस्य कृते अङ्गीत्वेन स्वीकृतः –

---

[१] सा.द.(हरिदास.) "वाक्यं रसात्मकं काव्यम् ॥१/३॥" इति, पृष्ठे १९

[२] तत्रैव. "शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ॥६/३०२॥" इति, पृष्ठे ४२३

[३] परशु.च.(प्र.सं.) "वीरो मुख्यरसः कथा परिचिता ...॥८॥" इति, पृष्ठे ६

[४] हैहय.वि.(प्र.सं.) पृष्ठे ९

"शान्तानामिति बहुवचनात् करुणोऽपि गृह्यते । तेन करुणप्रधानस्य रामायणस्य महाकाव्यत्वसिद्धिः ।"[१] इति ।

हरिदासमहोदयस्य युक्तिरियं पाण्डवविजयस्य कृतेऽपि प्रयुज्यते यतो हेमचवन्द्रो महाकाव्यस्यास्य पाण्डवविजयस्य आख्यापत्रे रसविषये एवम् उद्घोषयति – "वीरकरुणरसप्रधानं महाकाव्यम्"[२] इति । यद्यपि महाकविनामुना महाकाव्यस्यास्य कृते वीरः करुणश्चेति रसद्वितयमेव युगपत् समप्राध्यान्येनैव स्वीकृतम्, तथापि महाकाव्यस्य प्रथमे संस्करणे समालोचने दृश्यते यत्, पण्डितवर्येण भवविभूतिविद्याभूषणेन केवलं वीररस एवास्य काव्यस्य कृते अङ्गित्वेन स्वीकृतः। तस्य मतमनुसृत्य एतत्तु वक्तुं शक्यते यदत्र वीररसस्य स्थायिभावभूत उत्साहो यथा विद्यते तथैव सञ्चारिभावा अप्युपलभ्यन्ते । भरतमुनिना वीरस्य अष्ट सञ्चारिभावाः स्वीकृताः, यथा – धृतिः, मतिः, गर्वः, वेगः, उग्रता, क्रोधः, स्मृतिः, रोमाञ्चादयः – "सञ्चारिभावाश्चास्य धृतिमतिगर्ववेगौग्रतामर्षस्मृतिरोमाञ्चादयः"[३] इति ।

धृतेः, मतेश्च निदर्शनमस्ति १म'सर्गे युधिष्ठिरोक्तिषु (श्लोकाः), ५म'सर्गे माधवोक्तिषु (श्लोकाः), ६ठे सर्गे दुर्य्योधनं प्रति धृतराष्ट्रोपदेशे (श्लोकाः) च । क्रोध उपलभ्यते १म'सर्गे अर्ज्जुनोक्तिषु (श्लोकाः), २ये सर्गे द्रौपद्याः उक्तिषु (श्लोकाः) च। पुनः ७मसर्गे भीमोक्तिषु (११-१८ श्लोकाः) गर्वामर्षवेगोग्रतायाः सम्मेलनं दृश्यते । १मे,७मे च सर्गे भीमार्ज्जुनाभ्यां द्रौपदीनिकारस्मरणेन स्मृतिरेव अभिव्यज्यते । ५मे सर्गे दुर्य्योधनोक्तिषु (३१-४९ श्लोकाः) गर्व एव विराजते ।

परन्तु, महाकाव्यस्यास्य प्रायः सर्वेषु सर्गेषु दरीदृश्यते करुणरसः, स्थायिभूतस्य शोकस्य तथा सञ्चारिभावानामवस्थितित्वादेव । करुणस्य कृतेऽपि तेनैव मुनिना भरतेन द्वाविंशति सञ्चारिभावाः स्वीकृताः, यथा – निर्वेदः, ग्लानिः, चिन्ता, औत्सुक्यम्, आवेगः, मोहः, श्रमः, भयः, विषादः, दैन्यः, व्याधिः, जडता, उन्मादः, अपस्मारः, त्रासः, आलस्यम्, मरणम्, स्तम्भः, वेपथुः, वैवर्ण्यम्, अश्रु, स्वरभेदश्चेत्यादयः –

"व्यभिचारिणश्चास्य निर्वेद - ग्लानि - चिन्त्यौत्सुक्यावेग - मोह - श्रम - भय - विषाद - दैन्य - व्याधि - जडतो - न्मादापस्मार - त्रासालस्य - मरण - स्तम्भ - वेपथु - वैवर्ण्याश्रु - स्वरभेदादयः ।"[४] इति ।

१मे सर्गे, १२शे सर्गे च युधिष्ठिरोक्तिषु (१/१-७ श्लोकाः, १२/ ४१-४४ श्लोकाः) विषादः, दैन्यः, चिन्ता, आत्मग्लानिरपि अभिव्यज्यते । मोहस्तु उपलभ्यते अष्टम-नवम-एकादशसर्गेषु । अश्रु अर्थाद् रोदनमस्ति प्रथम-द्वितीय-तृतीय-चतुर्थ-एकादश-द्वादशसर्गेषु । मरणमस्ति अष्टम-नवम-दशमसर्गेषु । श्रमो दृश्यते ८मे सर्गे कुरुक्षेत्रयुद्धवर्णने । भयस्त्रासश्च दृश्येते १०मे सर्गे कृपकृतवर्म्माश्वत्थामानां पाण्डवत्रासे (३०-३४ श्लोकाः) । वेपथुर्वैवर्ण्यञ्चोपलभ्येते ३ये सर्गे हस्तिनापुरवर्णनायाम् । आलस्यमस्ति १०मे सर्गे (१२-१४ श्लोकाः) । व्याधेरुल्लेखोऽस्ति १२शे सर्गे (श्लोकः १४) ।

---

[१] सा.द.(हरिदास.) पृष्ठे ४२३

[२] पा.वि.(द्वि.सं.) पृष्ठे १

[३] ना.शा.(वन्द्यो.) पृष्ठे १४८

[४] तत्रैव. पृष्ठे १४५, १४६

आवेगोऽस्ति २ये सर्गे (१-२५ श्लोकाः) तथा ११शे सर्गे (८-१४ श्लोकाः) द्रौपदीविलापे, १२सर्गे उत्तराविलापे (श्लोकः ४०) च । वस्तुतस्तु महाकाव्येऽस्मिन् प्रायो यत्र यत्र वीर एवाङ्गिरसस्तत्र तत्रैव करुणोऽङ्गरसः, पुनः यत्र यत्र करुणोऽङ्गी तत्र तत्र वीर एवाङ्गरसः । परन्तु महाकाव्यमिदं युधिष्ठिरस्य राज्याभिषेकवर्णनेन समाप्यते अतोऽत्र वीररसस्यैव पूर्तिर्दृश्यते मया । परन्तु तत्र समप्राध्यान्येनैव करुणस्य पूर्तिरपि दृश्यते तस्मात् पूर्वभूतेषु श्लोकेषु । प्रसङ्गत उल्लेख्यं यद्, रौद्राद्भुतभयानकादयो रसा महाकाव्यास्यास्य पाण्डवविजयस्य अङ्गरसत्वेन प्रतीयन्ते ।

## अङ्गिरसभेदालोचनम्

उपर्युक्तेषु हेमचन्द्रप्रणीतेषु महाकाव्यत्रयेषु वीर एव विद्यते सामान्यतया; केवलं पाण्डवविजये वीरेण सह करुणरसोऽपि अङ्गित्वेन स्वीकृतः कविनामुना । अतः अधुना आदौ वीररसस्य प्रकारभेदमालोच्य तेषु कति भेदाः नायके प्रतिनायके च उपलभ्यन्ते तदेव विचार्यते, ततः परमेव करुणस्य भेदानामालोचनं विधीयते ।

वीररसस्य प्रकारभेदविषये वैमत्यं दृश्यते भरतविश्वनाथयोः मध्ये, यतः रसप्रस्थानस्य प्रबक्रा भरतमुनिना वीरस्य त्रैविध्यमुक्तम् –

> "दानवीरं धर्मवीरं युद्धवीरं तथैव च।
> रसं वीरमपि प्राहुस्तज्-ज्ञास्त्रिविधमेव हि॥ ६/७९॥"[1] इति।

विश्वनाथेन निगदितन्तु चातुर्विध्यम्[2]। यतो वीररसस्य प्रकारभेदविषये मुनिद्वयस्य वैमत्यं न त्वधिकम् अतो विश्वनाथस्य मतमनुसृत्य विचार्यते, अत एव वीरस्तु चतुर्विधो यथा क) 'दानवीरः', ख) 'धर्म्मवीरः', ग) 'युद्धवीरः', घ) 'दयावीर'श्चेति । एतेषु भेदेषु कति भेदाः नायकेषु प्रतिनायकेषु च सन्ति इति अधस्थादुपस्थाप्यते –

### *नायके प्रकटिता वीररसभेदाः*

#### परशुरामचरितम्

क) दानवीरः

परशुरामचरित्रे दानवीरत्वस्य कृते हेतुभूतः त्यागोत्साह एव दृश्यते दशमे सर्गे जगज्जयादनन्तरं यज्ञमाचरयित्वा ऋत्विग्भ्यः पृथिवीदाने तथा दत्ता भूमिः तेन न भोग्या इति विचिन्त्य सागरदेवसकाशे तपश्चरणाय भूमियाचनायाञ्च, एतेन नायकस्यास्य दानवीरत्वं सिद्धमेव –

---

[1] ना.शा.(वन्द्यो.) पृष्ठे १५२

[2] सा.द.(हरिदास.) "स च दान-धर्म्म-युद्धैदयया च समन्वितश्चतुर्धा स्यात्॥ ३/२२४॥" इति, पृष्ठे २०१

"जगज्जेता ततो रामो महान्तं यज्ञमाचरत् । तर्पयित्वा तथैवेन्द्रमृत्विग्भ्यः पृथिवीन्ददौ ॥१०/३६॥
दत्ता भूमिर्न भोग्येति मत्वा स नरसत्तमः। सन्निकृष्टं सरिन्नाथमवकाशमयाचत ॥१०/४१॥"[१] इति।

ख) धर्म्मवीरः

परशुरामस्य चरित्रे धर्म्मवीरत्वस्य उदाहरणानि दृश्यन्ते परशुरामचरिते द्वितीये, तृतीये, पञ्चमे, नवमे, दशमे च । मुनीनां कृते तप एव धर्म्मः, धर्म्मस्यास्य पालनोत्साह एवाभिव्यज्यते द्वितीये (श्लोकाः १८-२१), दशमे (श्लोकौ ४६, ४७ च) च सर्गे तपोवर्णने । पुनः पुत्रस्य तथा शिष्यस्य कृते गुरोरादेशपालनमेव धर्म्मः, अस्यापि पालनोत्साहो दृश्यते तृतीये सर्गे गुरुभूतस्य पितुरादेशात् परशुरामेण मातृहत्यायां (श्लोकाः ११-१५), पञ्चमे सर्गे गुरुभूतायाः मातुरादेशाद् होमधेनुं प्रत्यानयनाय हैहयमुद्दिश्य रणप्रयाणोद्योगे (श्लोकौ १७, १८ च), नवमे सर्गे पित्रादेशात् पापक्षयाय तीर्थप्रयाणे (श्लोकौ ७, ८ च) इति । अतो नायकोऽयं धर्म्मवीरो नास्तीत्यत्र सन्देहावसरः।

ग) युद्धवीरः

महाकाव्येऽस्मिन् युद्धवीरस्य स्थायिनो युद्धोत्साहस्य निदर्शनमुपलभ्यते पञ्चमे सर्गे मुनिधेनोः प्रत्यानयनाय हैहयमुद्दिश्य परशुरामस्य रणप्रयाणे (श्लोकाः १८-२२) । एतद्व्यतीत्य प्रायः समग्रे षष्ठे, सप्तमे, अष्टमे, दशमे चेत्यादिषु सर्गेष्वपि युद्धवृत्तान्तवर्णनावसरे युद्धोत्साहस्तु सम्यगेवाभिव्यज्यते । अतो युद्धवीरोऽयं नायकः, प्रसङ्गेऽस्मिन् दिङ्मात्रमुदाहरणमधस्तादुपस्थाप्यते –

"एकेनैव कुठारेण दिशो जित्वा भृगूत्तमः। स वारैरेकविंशत्या निःक्षत्रामकरोन्महीम् ॥१०/२०॥
ददाहाग्निसमः शूरो जामदग्न्यः परन्तपः। क्षत्त्रगोत्रवनान्येवं प्रतिहिंसापरायणः ॥१०/२१॥
समन्तपञ्चके क्षेत्रे समवेतान् स एककः। मृगान् व्याघ्र इवारण्ये नरव्याघ्रो नृपानहन् ॥१०/२२॥"[२] इति।

घ) दयावीरः

दानवीरत्वमिव परशुरामस्य दयावीरत्वमपि केवलं दशमे सर्गे एव दृश्यते । सर्गेऽस्मिन् स नायकः युधि क्षत्रियनाशादनन्तरं भूपतेः चन्द्रसेनस्य भार्यायाः गर्भनाशाय दाल्भ्यमुनेः आश्रममुपाससाद । तत्र स मुनिः आश्रमाश्रितायाः तस्याः कृते परशुरामस्य अनुकम्पा अयाचत, तदा स जामदग्न्यः मुनेस्तथा स्वस्य

---

[१] परशु.च.(प्र.सं.) पृष्ठे ७०, ७१

[२] तत्रैव. पृष्ठे ६९

प्रतिज्ञारक्षणाय आदिशद् यत् तस्याः "क्षत्त्रधर्म्मपरित्यागी लेखकोऽयं भवेदिति ।॥१०/२८॥"[1] इति। अनेनैव स दयया तस्याः कायस्थं सुतमत्यजत् ।

**हैहयविजयम्**

क) दानवीरः

हैहयविजयस्य नवमे सर्गे पुलस्त्यमुनेः प्रार्थनापूरणाय हैहयेन तद्धस्ते रावणस्य अर्पणं तथा रावणेन सह सन्धिस्थापनम् इत्यनेन परोक्षतया सूचिता राज्ञस्तस्य दानशीलता, प्रतिपादितमतो दानवीरत्वम् कार्त्तवीर्यस्य, तदुदाहरणतया उद्ध्रियते –

"इतीरितो मनुजपतिर्महर्षणा प्रहर्षितः सपदि मुमोच रावणम् ।
गदाहतिक्लिशितममुं भुजान्तरे निपीडयन् पुनरुरसालिलिङ्ग च॥९/२९॥"[2]इति।

पुनः प्रथमे सर्गे चरिताख्यानवर्णनावसरे कतिपयेषु श्लोकेषु सूचिता तस्य दानशीलता, तद् यथा –

"अनारतं हव्यभुजो मुखे हविर्मखेष्वसौ यद् विससर्ज्ज भूरिशः।
तदेव गत्वा तपनं ययौ प्रजाहिताय भूयोऽप्यमृतायमानताम्॥१/९॥
तपोधनानां कुलमृत्विजां ततो विचार्य्य धुर्य्यं नृपवर्य्यमेव तम्।
गुरुं समग्रां पृथिवीं तथार्ज्जितां पुनः प्रतिग्राहयति स्म शासितुम्॥१/२६॥
दानोचितं करसहस्त्रमजन्यमुष्य विप्रेषु दातृषु परिग्रहकुन्ठितं यत्।
अत्युच्छ्रितेन शिरसा तदानतेन स्वीकर्त्तुमीश्वरपदं चकमे स दत्तम्॥१/२७॥"[3] चेति।

अतो दानवीरोऽयं हैहय इति।

ख) धर्म्मवीरः

नवमे सर्गे सभातलावतीर्णं पुलस्तमुनिं आलोक्य तस्य अभ्यर्थनाय ससचिवैः आसनादुत्थानेन तथा नृपसत्कारं प्राप्य मुने प्रशंसावचनेन सूचिता नृपतेर्हैहयस्य धार्मिकता पौरुषेयता च । पुनः प्रथमे सर्गे चरिताख्यानवर्णनावसरे कतिपयेषु श्लोकेषु सूचिता तस्य धर्मशीलता, तद् यथा –

---

[1] परशु.च.(प्र.सं.) पृष्ठे ६९, ७०

[2] हैहय.वि.(प्र.सं.) पृष्ठे ५९

[3] तत्रैव. पृष्ठे १२, १६ च

"अपक्षपातोऽपि जनेषु रक्षणे गुणं हि जग्राह नियोगकर्म्मसु ।
न चैष दण्डं प्रणिनाय नायको न दोषमालोच्य विचारपण्डितैः ॥ १/१५॥
निवर्त्तयन्नीहितमप्यघं कृती प्रवर्त्तयन् पुण्यपथे च वासनाः।
स रञ्जयन् भूततर्तिं विभूतिभी रराज धर्म्मो भुवि मूर्त्तिमानिव ॥ १/१६॥ "[१] चेति।

अतो नायकोऽयं धर्म्मवीर इति ।

ग) युद्धवीरः

षष्ठे सर्गे अनवधानतया स्वसैन्यक्षयं दृष्ट्वा हैहयस्य आत्मसमालोचनायां रणप्रतिज्ञायां तथा स्वाङ्गनानं समाश्वासने युद्धोद्योगिनस्तस्य उद्यमो दृश्यन्ते कतिपयेषु श्लोकेषु –

"उपेक्षितो यच्छ्रुतबाहुवीर्य्यः शत्रुः क्षितीशान्वयधूमकेतुः।
हतानरण्योपि मया दशास्यस्तस्यैष नूनं विरसो विपाकः॥ ६/१८॥
तथापि रक्षस्तव मद्भुजाग्रादहेः सुपर्णादिव नास्ति मोक्षः।
नो यावदद्यस्तटमुत्तरामि प्रत्यर्ज्जुनं सम्प्रति गर्ज्ज तावत् ॥ ६/१९॥ "[२] इति।

पुनः समग्रे सप्तमे अष्टमे च सर्गे रक्षैस्तथा रक्षःपतिना सह हैहयस्य युद्धवर्णनायां तस्य युद्धवीरत्वं प्रतिपादितमिति।

घ) दयावीरः

षष्ठे सर्गे रक्षसां सकाशे स्वसैन्यस्य पराजयं ज्ञात्वा हैहयस्य उक्तिषु अनुजीविनः प्रति तस्यानुकम्पा यथा दृश्यते, तथैव युद्धगमनात् प्राक् स्वाङ्गनानां समाश्वासनेन प्रजाः प्रति तस्यानुकम्पापि परिस्फुटिता । एतेन सूचितं तस्य दयावत्वम्, प्रतिपादितञ्च दयावीरत्वमिति । अस्योदाहरणं यथा –

"अहो प्रमादेन ममैव राज्ञो निपातिता यद्यनुजीविनस्ते।..॥ ६/१७॥
मा भैष्ठ रामाः परिभूय दुष्टं निशाटमत्रोपसरामि यावत्। ॥ ६/२१॥ "[३] इति।

---

[१] हैहय.वि.(प्र.सं.) पृष्ठे १४

[२] तत्रैव. पृष्ठे ४२

[३] तत्रैव. पृष्ठे ४२, ४३ च

**पाण्डवविजयम्**

(क) दानवीरः

महाकाव्यस्यास्य केवलं द्वादशे सर्गे एव दृश्यते दानवीरस्य उदाहरणं । अत्र कृष्णाभिशप्तेन द्रौणिना पराजितोऽस्मि इत्यनेन प्रकारेण पराजयस्वीकारादनन्तरं गुरुसुतं न निहन्तुकामः स गाण्डीवधन्वा अर्ज्जुनः अश्वत्थामानं जीवनदानं चकार परन्तु न मुमोच । तस्य मोचनं भवेद् न वेति याज्ञसेन्या विचारणीयम् एवमुक्त्वा तं पुत्रहन्तारं बद्ध्वा रथं समारोप्य शिविराभिमुखमगात्, तदुक्तं हेमचन्द्रगिरा श्लोकद्वयेन –

"प्रतिश्रुतं पुत्रवधार्दितायै मया शिरस्ते द्रुपदात्मजायै ।
दैन्यं गतस्यापि स ते निहन्यां तपस्विनी विदन्तु शर्म्म सेति ॥१२/२०॥
इच्छामि नाहन्तु निहन्तुमेवं तत्त्वां जितं पश्यतु याज्ञसेनी ।
जीवेद्ध्रुवं, शोकभराकुलापि दयावती सा यदि मोचयेत्त्वाम् ॥१२/२१॥"[1] इति ।

(ख) धर्म्मवीरः

महाकाव्यस्यास्य प्रथमे सर्गे ज्येष्ठपाण्डुसुतेन परराष्ट्रनीतिनिष्णातेन दौत्यायोजने, युद्धमनिवार्यमिति जानन्नपि शमाय दूत्ये सुहृदुत्तमस्य श्रीहरेः वरणमिति कार्येषु । पुनः श्रीहरेः सकाशे स्वावस्थावर्णने, माधवं प्रति केवलं स्वकर्त्तव्यपालनाय एव दौत्यविषये उपदेशदानावसरे च तस्य वाक्ष्वेव प्रतीयते तस्य धर्म्मज्ञता –

"श्रिया वियुक्तस्य जनस्य जीवितान्मृतिर्वरं, तेन विधीयतां नु किम् ।
न धर्म्मकामावपि तस्य गोचरे त्रिवर्गमूलं धनमेव साधनम् ॥१/५॥
अहापितार्थं क्रियतां शमोऽरिभिर्यथा न शोचामि यशस्तथास्तु ते ।
न चोपदेष्टव्यमिहास्ति ते मया स्वतो हि कल्याणकरः सुहृज्जनः ॥१/१३॥"[2] इति ।

अपि त्वत्रादौ शमाय तस्योत्साहः, शमे विफले युद्धाय तस्योत्साहश्च प्रकटितः –

"स्वधर्म्मनिष्ठः समयावधिं गतः शमेन लब्धुं चक्रमे युधिष्ठिरः ॥१/१॥
कुलक्षयो मैवमिति क्षमं मया यदुक्तमेतद् यदि ते न रोचते ।
प्रवर्ततां युद्धमिति स्फुटाक्षरं निगद्य सद्योऽहितसंसदं त्यजेः ॥१/१९॥"[3] इति ।

---

[1] पा.वि.(द्वि.सं.) पृष्ठे १०४

[2] तत्रैव. पृष्ठे ६, ८ च

[3] तत्रैव. पृष्ठे ५, ९ च

पुनः एकादशे सर्गे अश्वत्थाम्ना मोचिते ब्रह्मशिरास्त्रे मधुसूदनोपदेशं हृदि परिगृह्य गुरोः शासनमनुसृत्य केवलं परास्त्रवारणाय द्रोणादधीतं ब्रह्मशिरास्त्रं मोचितं तेन सिताश्वेन, एतेन व्यज्यते धर्म्मरक्षणोत्साहः। एतद्व्यतीत्य प्रथमे तथा सप्तमे सर्गे यथाक्रमेण उल्लिखितम् अर्ज्जुनोलूकवचनेषु दुर्य्योधनोरुभङ्गः, दुःशासनरक्तपानमिति प्रतिज्ञाद्वयम्; द्वयस्यास्य पालनं दृश्यते अष्टमे नवमे च सर्गे, अतः एतेनापि व्यज्यते धर्म्मरक्षणोत्साह इत्यनेनैव प्रकारेण युधिष्ठिरभीमार्ज्जुनेषु प्रतिपद्यते धर्म्मवीरत्वमिति ।

(ग) युद्धवीरः

अत्रत्येषु प्रायः सर्व्वेषु सर्गेषु युद्धवीरस्य नैकानि उदाहरणानि अस्माकं दृष्टिपथमुपयन्ति । प्रथमे सर्गे युधिष्ठिरवचनगते श्लोकद्वये (श्लोकौ १७, १८ च) तथा अर्ज्जुनवचनगतेषु श्लोकपञ्चकेषु (श्लोकाः २४-२८ ), द्वितीये सर्गे माधववाणीमाकर्ण्य भीमस्य प्रतिक्रियायां (श्लोकः ३७), सप्तमे सर्गे उलूकदौत्ये प्रत्युत्तरकाले भीमस्य वाक्षु (श्लोकाः ११-१८), नवमे सर्गे दुर्य्योधनं प्रति युधिष्ठिरप्रयुक्तेषु वाक्शल्येषु (श्लोकाः ६-१०), ततः परं एकादशे सर्गे द्रौपद्या विलापद्वारेण क्रोधितस्य अर्ज्जुनस्य प्रतिज्ञायाम् (श्लोकः१६) तथा समग्रे अष्टमे सर्गे कुरुक्षेत्रयुद्धवर्णने प्रकाशितं नायकगतं युद्धवीरत्वम् । उदाहरणतया भीमोक्तं श्लोकमेकमुद्धारयामि –

"यावन्न रम्भातरुसम्मितौ तौ सुयोधनोरू युधि शुण्डयेव ।
गजेन्द्रवृत्तिर्गदया रुजामि का निर्वृतिर्मे हृदयस्य तावत् ॥७/१४॥"[१] इति।

(घ) दयावीरः

महाकाव्यस्यास्य प्रथमे सर्गे युधिष्ठिरवचने श्लोकचतुष्टये (श्लोकाः ८-१०, १५ च) तथा अर्ज्जुनवचनेषु कतिपयेषु श्लोकेषु प्रकटितं उभयस्य दयाशीलत्वान्वितं वीरत्वम्, द्वादशे सर्गे श्लोकत्रितये (श्लोकाः १९-२१) पराजितं तथाभिशप्तं द्रौणिं प्रति प्रकाशिते सिताश्वस्य मनोभावे दानवीरत्वेन सह दयावीरत्वमपि सूचितं कविनामुना हेमचन्द्रेण । उदाहरणत्वेन उद्ध्रियते अर्ज्जुनमुखनिसृतः श्लोकोऽयम् –

"परो यथा वेत्ति सुधीयुधिष्ठिरो जगद्धितायैव न युद्धमिच्छति ।
भुजायितौ भीमधनञ्जयावुभौ बिभर्त्त्ययं नैव बिभेति वैरिणः॥१/३३॥"[२] इति।

---

[१] पा.वि.(द्वि.सं.) पृष्ठे ५६

[२] तत्रैव. पृष्ठे १२

प्रसङ्गतः उल्लेख्यं यद् नायकान् व्यतिरिच्य नायिकाया द्रौपद्याः चरित्रे तथा नायकानां कृते सहायकभूते कृष्णचरित्रेऽपि यथाक्रमेण युद्धवीरत्वं, दानवीरत्वञ्च उपलभ्येते ।

## *प्रतिनायके प्रकटिता वीररसभेदाः*

### परशुरामचरितम्

अत्रत्ये प्रतिनायके हैहयेशे कार्त्तवीर्य्यार्जुने केवलं युद्धवीरत्वमेव प्रकाशितमस्ति महाकाव्येऽस्मिन् । यतः समग्रे महाकाव्ये बलपराक्रमशक्तिप्रतापप्रभावेभ्यो विभावितः, गर्व-वेग(प्रहारजवेग)-क्रोधैः परिपुष्टः, शौर्यवीर्येण अभिनीतो युद्धोत्साह एवाभिव्यज्यते सहस्रभुजस्य चरित्रे । युद्धोत्साहस्य दिङ्मात्रमुदाहरणं यथा –

"मौर्व्वीबन्धनचिह्नानि मणिबन्धेषु धारयन् । बन्धुतां यस्य दुर्धर्षो भजते दशकन्धरः ॥७/४॥
त्वयैवाद्यापनीतस्य तस्य मे समराङ्गनात् । निरस्ता कार्त्तवीर्य्यस्य तावती कीर्त्तिविस्तृतिः ॥७/५॥
त्वयैवं सकृदन्याय्ये कृते मन्ये विजय्यसौ । स्पर्द्धते राजशक्तिं मे दर्पेण च विवर्द्धते ॥७/६॥
जाने नाथविहीनान्तां रमे सेनान्तुदत्यरिः । कर्णधारोज्झितां नावं प्रभञ्जन इवार्णवे ॥७/७॥
निदानमपि दुष्कीर्तेः क्षम्यते यत् कृतन्त्वया । द्रुतं तावद्रिपोरग्रे नीयतां मद्रथः पुनः ॥७/८॥"[1] इति।

### हैहयविजयम्

प्रतिनायकस्य लङ्केशस्य चरित्रे केवलं द्विविधो वीर एव युज्यते, यथा – युद्धवीरः, धर्म्मवीरश्चेति । यतः अस्य युद्धोद्यमः तथा ब्राह्मणसूनुं भुत्वापि पितृधर्मं विहाय सातिशय-मातृधर्मानुरक्तिः अर्थाद् रक्षधर्मानुरक्तिरेव परिदृश्यते समग्रे महाकाव्ये । अतो विषयद्वयस्यास्य उदाहरणतया उद्धृतं श्लोकद्वयं यथाक्रमेण, युद्धवीरस्योदाहरणम् –

"भृकुटीमभृत क्षणं रुषा नृपतेरभ्युदयं स चिन्तयन् ।
मुमुदे चिरकाङ्क्षितस्य तु प्रतियोधस्य दिदृक्षया ततः ॥३/१३॥"[2] इति।

धर्म्मवीरस्योदाहरणम् –

"रन्ध्रप्रहारकुशलः क्षणदाचरेन्द्रो मत्वा रिपुरसौ सुजयः प्रमत्तः।
क्रीडालसं नरपतिं बलदर्पितोऽपि प्राप्तुं पपात, ननु दुस्त्यज एव धर्म्मः॥३/१६॥
ब्रह्मसूनुरपि जिह्मवृत्तितां मातृधर्म्म इति वा श्रयेत सः। ॥५/२७॥"[3] चेति।

---

[1] परशु.च.(प्र.सं.) पृष्ठे ४८

[2] हैहय.वि.(प्र.सं.) पृष्ठे २५

[3] तत्रैव. पृष्ठे २६, ३८ च

**पाण्डवविजयम्**

प्रतिनायकभूते दुर्य्योधने चित्रितं केवलं युद्धवीरत्वं महाकविना हेमचन्द्रेण । यतः पञ्चमे सर्गे माधवस्य दौत्यस्योत्तरे परबलेन तथा दूतकैतवजितधनेन अभिमानधनस्य कुरुयुवराजस्यास्य तेजविजृम्भितवाक्षु (श्लोकाः ३१-४०) शमनीतौ अप्रियता, युद्धप्रियता च प्रकाशिता ; ततः परं नवमे सर्गे ह्रदोत्थानादनन्तरं युधिष्ठिरमुद्दिश्य प्रत्युत्तरे (श्लोकौ १६, १७ च), पुनः कृपकृतवर्म्माश्वत्थामान् प्रति समाश्वासनभूतेषु उक्तिषु (श्लोकौ ४४, ४५ च) युद्धप्रियता एव प्रकटिता । एतेषु दुर्य्योधनकृतेषु उक्तिषु कति उक्तय उद्ध्रियन्ते उदाहरणतया –

"न राज्यं भिक्षया लभ्यं न भिक्षां क्षत्रियोऽर्हति ।
भिक्षमाणः कथं लक्ष्मीं न जिह्वेति युधिष्ठिरः ॥५/३३॥
संग्रामं प्रथमं कल्पं कथं शक्तो न मन्यते ।
अशक्तस्य कुतस्तस्य राज्यलिप्साविडम्बना ॥५/३४॥
लिप्से न राज्यं न जिजीविषामि परन्तु वैरप्रतियातनाय ।
दुःशासनस्य द्विषतायमादौ योत्स्ये यथाशक्तिः वृकोदरेण ॥९/१६॥"[१] इति ।

प्रसङ्गतः उल्लेख्यं यद्, अत्रत्ये प्रतिनायकसहायकभूते उलूके, अश्वत्थामनि च युद्धवीरत्वमेव चित्रितमस्तीति ।

## *पाण्डवविजये प्रकटिताः करुणरसभेदाः*

करुणस्य त्रैविध्यमेव स्वीकृतं भरतेन, परन्तु करुणस्य भेदप्रसङ्गे किमपि आलोचनं न विधीयते विश्वनाथेन, अतो भरतमतमाश्रित्यैव अस्मिन् महाकाव्ये करुणस्य कति भेदाः सन्तीति निरूप्यते अधुना । भरतमुनिना स्वीकृताः करुणभेदा यथा – धर्मोपघातजकरुणः, अपचयोद्भवकरुणः, शोकजकरुणश्चेति । निगदितं यथा नाट्यशास्त्रे –

"धर्मोपघातजश्चैव तथा त्वपचयोद्भवः।
तथा शोककृतश्चैव करुणस्त्रिविधः स्मृतः॥६/७८॥"[२] इति ।

महाकाव्यस्यास्य बहुष्वेव सर्गेषु करुणस्य भेदत्रितयमेव उपलभ्यते, यथा –

अत्रत्ये 'द्रौपदीवाक्यमि'ति द्वितीये सर्गे कौरवीं सभां दौत्याय गम्यमानस्य शौरेः सकाशे द्रौपद्या विलापे दूतसभायां कुलवधोः अवमाननावर्णने धर्म्मस्य हानिरेव दृश्यते, अतोऽत्र धर्मोपघातजकरुण एवाभिव्यज्यते । तदुदाहरणतया उद्ध्रियते द्रौपद्या उक्तिरियम् –

---

[१] पा.वि.(द्वि.सं.) पृष्ठे ४०, ७८ च

[२] ना.शा.(वन्द्यो.) पृष्ठे १५२

"ननु कृष्ण किमस्मि न स्नुषा धृतराष्ट्रस्य सुतेव धर्म्मतः।
निकृतीर्मम यत् स सोढवान् न स यावद्विदुरस्तमन्वशात् ॥२/९॥"[१] इति।

अथ 'दूतविनियोगः' इति प्रथमे सर्गे माधवसकाशे युधिष्ठिरेण श्रियो वियोजिता स्वकीयावस्था वर्णनप्रसङ्गे, तथा 'कुन्तीकृष्णसंवादः' इत्याख्ये चतुर्थे सर्गे कृष्णसकाशे कपटदूते धनराज्यनाशाद् वनवासिभ्यः स्वपुत्रेभ्यो वियोजितायाः विलापातुरायाः कुन्त्याः विलापेषु अभिव्यज्यते अपचयोद्भवकरुणः ।

सर्गानेतान् व्यतिरिच्य नवमे सर्गे भग्नसक्थं दुर्य्योधनं दृष्ट्वा कृपकृतवर्म्माश्वत्थामादीनां विलापेषु ; दशमे सर्गे दुर्य्योधने मृते कृपादिभिः प्राप्ते दुःखे ; एकादशे सर्गे पाञ्चालद्रौपदेयानां मरणं ज्ञात्वा पाण्डवैः प्राप्ते दुःखे, द्रौपदीविलापे च; पुनः द्वादशे सर्गे अभिमन्युभार्याया उत्तराया विलापे तथा विलापातुरां उत्तरामालोक्य दुःखार्दितस्य युधिष्ठिरस्य वचनेषु करुणभूतो यो रसोऽभिव्यज्यते स शोककृतकरुणरस इति ।

## सन्धिविधानम्

नाटकमिव पञ्चसन्धिसमन्वितत्वमपि महाकाव्यस्य वैशिष्ट्यमपरं, तदर्थं निगदितं कविराजविश्वनाथेन - "सर्वे नाटकसन्धयः। ॥६/३०२॥"[२] इति । हेमचन्द्रस्य महाकाव्यत्रितये प्रायः सर्व्वे सन्धयो दृश्यन्ते, तद् यथा –

### परशुरामचरितम्

महाकाव्यस्यास्य रामाविर्भाव इति प्रथमे सर्गे विद्यते मुखसन्धिः भूभारमोक्षरूपस्य फलस्य वीजत्वेन प्रकाशत्वादिति । प्रतिमुखसन्धेः अवस्थानं दृश्यते द्वितीये तृतीये च सर्गे । ततः परं महाकाव्यस्य 'जमदग्न्यर्जुनयोः संघर्षः' इति चतुर्थसर्गाद् 'रामविलापः' इति नवमसर्गे परशुरामेण पित्रादेशाद् नरहत्यायाः पापप्रक्षालनाय तीर्थगमनं यावदस्ति गर्भः। अथ 'रामविलापः' इति नवमे सर्गे पितृवियोगात् परं पितृशोकार्द्दितस्य रामस्य विलापे तथा क्षत्रियनाशप्रतिज्ञायां (श्लोकाः १२-२८ ) सन्निवेशिता विमर्षसन्धिरेव । उपसंहृतिरेव दृश्यते 'क्षत्त्रसंक्षयः' इति अन्तिमे सर्गे, यतः परशुरामविहितात् क्षत्त्रसंक्षयाद् महाकाव्यस्यास्य फलभूतस्य भूभारमोक्षस्य प्राप्तिद्वारेणैव सर्गोऽयं समाप्यते इति ।

### हैहयविजयम्

महाकाव्येऽस्मिन् 'चरिताख्यानमि'ति प्रथमसर्गादारभ्य 'रावणरेवाभिगमनमि'ति तृतीयसर्गस्य षोडशश्लोकं यावद् विराजते मुखसन्धिः। अथ 'रावणरेवाभिगमनमि'ति तृतीयसर्गस्य सप्तदशश्लोकतः 'मन्त्रिवाक्यमि'ति पञ्चमसर्गस्य

---

[१] पा.वि.(द्वि.सं.) पृष्ठे १५

[२] सा.द.(हरिदास.) पृष्ठे ४२३

चतुर्थश्लोकं यावद् दृश्यते प्रतिमुखसन्धेरवस्थानम् । ततः परं 'मन्त्रिवाक्यमि'ति पञ्चमसर्गस्य पञ्चमश्लोकतः सर्गान्तं यावद् दृश्यते गर्भः। तदनन्तरं 'समराभिगमनमि'ति षष्ठसर्गतः 'दशग्रीवनिग्रहः' इति अष्टमसर्गस्य पञ्चत्रिंशत्तमश्लोकं यावदस्ति विमर्षसन्धिः । तस्यैव अष्टमसर्गस्य सप्तत्रिंशत्तमात् श्लोकादारभ्य 'रावणमोचनमि'ति नवमसर्गं यावद् हैहयानां विजयलाभरूपस्य फलस्य प्राप्तिवशाद् उपसंहृतिः।

**पाण्डवविजयम्**

अस्मिन् काव्यकृतौ 'दूतविनियोगः' इति प्रथमसर्गाद् 'भक्तभगवत्समागमः' इति तृतीयसर्गं यावदस्ति मुखम् । अथ 'कृष्णकुन्तीसंवादः' इति चतुर्थे सर्गे विद्यते प्रतिमुखसन्धिः। ततः परं 'सामप्रयोगः' इति पञ्चमसर्गाद् दुर्य्योधनोरुभङ्गं नवमसर्गं यावत् परिलक्ष्यते गर्भः। विमर्षसन्धेरुपस्थितिः परिलक्ष्यते 'सौप्तिकमि'ति दशमसर्गाद् 'दिव्यास्त्रप्रयोगः' इति एकादशसर्गस्य चतुर्दशश्लोकं यावदिति । उपसंहृतिरस्ति 'द्रौणिनिग्रहः' इत्याख्ये द्वादशे सर्गे, यतः पाण्डवानां विजयस्वरूपं फलमेवात्रैव सहृदयानां नयनपथमुपैतीति ।

## काव्यवृत्तान्तविचारणा

इतिहासोद्भवं वृत्तमथवा साधुजनचरितविषयकं वृत्तमेव कस्यचन महाकाव्यस्य वस्तुरूपेण परिगृह्यते विश्वनाथाद्यालंकारिकैः । विषयेऽस्मिन् विश्वनाथादीनाम् उक्तय एव प्रमाणत्वेन गृह्यन्ते, अतः साधु खलु भणितं साहित्यदर्पणे "इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ॥६/३०२॥" [1] इति । पुनः विश्वनाथाचार्य्यात् प्राग् दण्ड्याचार्य्येणाप्युक्तम् तदीये काव्यादर्शे "इतिहासकथोद्भूतमितरद्वा सदाश्रयम्। ॥१/१५॥"[2] इति।

### *इतिहासोद्भवत्वप्रतिपादनम्*

अत्र हेमचन्द्रस्य परशुरामचरिते महाभारतीयवनपर्वान्तर्गतात् तीर्थयात्रापर्वाध्यायाद् गृहीतं परशुरामावतारवृत्तमेव कथावस्तु ; हैहयविजयमिति द्वितीये काव्यकृतौ रामायणोपनिबद्धम् उत्तरकाण्डगतं रावणहैहययोर्युद्धम्, हैहयेन रावणनिग्रहः, पुलस्त्यानुरोधेन रावणस्य मुक्तिः इत्यादीनि समुपवर्णितानि कथावस्तुरूपेण ; पुनः कवेरस्य भूषणभूते पाण्डवविजये पाण्डवैः कुरूणां सविधे सामप्रस्तावं द्वारीकृत्य दूतरूपेण श्रीकृष्णस्य प्रेरणादारभ्य द्रौणिनिग्रहावधि उद्योगपर्वणः सौप्तिकपर्व यावन्निखिलभारतवृत्तान्ताः समासतः समुपवर्णिताः । अतो महाकाव्यानां काव्यवस्तुनः "इतिहासोद्भवत्वम्" स्थिरमेव ।

---

[1] सा.द.(हरिदास.) पृष्ठे ४२३

[2] काव्याद.(चट्टो.) पृष्ठे ५३

## *सज्जनाश्रयत्वप्रतिपादनम्*

हेमचन्द्रस्य महाकाव्येषु कथावस्तुसु यथा इतिहासोद्भूतत्वमिति वैशिष्ट्यं विद्यते तथैव दृश्यते सज्जनाश्रयत्वमिति वैशिष्ट्यमपि । तत्र परशुरामजीवीताश्रिते परशुरामचरिते स एव जामदग्न्यः सज्जनरूपेणैवोपस्थापितः श्रीविष्णोरवतारभूतत्वात् । अपि च तेनैव विहितः अधर्माचारिणो ब्राह्मणकुलावमाननाकारिणो हैहयोऽर्ज्जुनस्योच्छेदः तथा तत्पुत्राणामनुरागीनाञ्च । अनेनैव प्रकारेण सोऽवतारः क्षत्रियैः आचरितम् अधर्ममुच्छिद्य धर्मस्थापनं चकार ।

हैहयविजये महाकाव्ये हैहयोऽर्ज्जुनः सज्जनरूपेण चित्रितो लङ्केश्वरस्तु चित्रितो दुर्जनरूपेणैव, विषयेऽस्मिन् कार्त्तवीर्यस्य सज्जनत्वप्रतिपादकः श्लोक उद्ध्रियते –

"अनारतं हव्यभुजो मुखे हविर्मुखेष्वसौ यद् विससर्ज्ज भूरिशः।
तदेव गत्वा तपनं ययौ प्रजाहिताय भूयोऽप्यमृतायमानताम्॥ १/९॥ "[1] इति।

पुनः रावणस्य दुर्जनत्वप्रतिपादकमेकं पद्यमुद्ध्रियते च -

"श्रूयते जगति विश्रवः सुतः कश्चिदुच्छ्वसिति रावणाभिधः।
विप्रसूनुरपि रक्षसां पतिः पातकीति न स मानमर्हति ॥५/२०॥ "[2] इति।

अपि तु हैहयरावणयोर्युद्धे राक्षसपतिं पराजित्य कार्त्तवीर्यः क्षत्रीयानां पराक्रममेव प्रतिष्ठापयति, क्षत्रप्रतिष्ठया क्षत्रधर्मस्यैव प्रतिष्ठा जायते । महाकाव्यादेव प्रतीयते यत्, क्षत्रियाणां सकाशे राक्षसधर्मस्तु पातकिनां धर्मः अतः स त्वधर्मः, अत एव राक्षसपतिं पराजीत्य क्षत्रप्रतिष्ठया अधर्मस्योपरि धर्मस्य प्रतिष्ठा एव बुध्यते । पुनः सज्जना एव धर्मं प्रतिष्ठापयति न तु दूर्जनाः ।

पाण्डवविजयमिति महाकाव्ये उपलभ्यते महाभारतवर्णितस्य कुरुक्षेत्रयुद्धस्य वर्णनम् । प्रसङ्गेऽस्मिन् सर्व्वे एव जानन्ति यद्, आसीत् कुरुक्षेत्रयुद्धो धर्म्मयुद्ध इति । धर्मः केवलं सज्जनान् आश्रयति, कुरुक्षेत्रयुद्धे तु धर्मस्वरूपश्रीकृष्णोऽपि आसीत् पाण्डवपक्षे । अतः सज्जनाः खलु पाण्डवाः, तेषामेव सज्जनानां विजयवृत्तम् अर्थाद् अधर्म्मस्योपरि धर्म्मस्य विजयवृत्तमेव आश्रित्य प्रणीतमिदं महाकाव्यम् ।

अत एव उपर्युक्तेषु हेमचन्द्रप्रणीतेषु महाकाव्येषु अधर्म्मस्योपरि धर्म्मस्य विजयमेव दरीदृश्यते । अनेनैव प्रकारेण एतेषु महाकाव्येषु काव्यवस्तुनः सज्जनाश्रयत्वमपि सिद्धमेव ।

---

[1] हैहय.वि.(प्र.सं.) पृष्ठे १२

[2] तत्रैव. पृष्ठे ३७

## प्रयोजनविचारणा

महाकाव्यस्य सम्बन्धिनश्चत्वार एव वर्गा धर्मार्थकाममोक्षरूपा वर्णनीयाः, परन्तु तेषु यत्किञ्चिदेकं भवेद् मुख्यप्रयोजनम्, निगदितञ्च साहित्यदर्पणे "चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत् ।..॥६/३०२॥"[१] इति।

**परशुरामचरिते**

महाकाव्येऽस्मिन् बहुषु स्थानेषु धर्मस्य वर्णनं दरीदृश्यते, यथा – द्वितीये सर्गे पितृगृहे कैशोरे काले परशुरामस्य शिक्षाग्रहणवर्णनायां, अथ देवादिदेवाद् अस्त्रशिक्षाग्रहणवर्णनायां तथा तृतीये सर्गे गुरुभूतस्य जमदग्नेरादेशात् परशुरामेण मातृबधाख्याने शिष्यधर्मस्य वर्णनमुपलभ्यते, अस्योदाहरणं यथा –

"आज्ञा गुरूणां ह्यविचारणीया" पुरेति नीतेरिह वर्त्तसे त्वम् ।
देदीप्यमानं प्रकटं प्रमाणं बालार्कवत्तर्कतमो निरस्यन् ॥३/१८॥"[२] इति।

पुनः नवमे सर्गे परशुरामेण हैहयबधवृत्तान्तं श्रुत्वा तं पापकृतमिति मत्वा तस्य सकाशे स्वधर्मवर्णनावसरे द्विजधर्मस्य वर्णनं चकार पिता जमदग्निः –

"यमिनां हि परं तपः क्षमा क्षमयैव द्विज एष शोभते ।
क्षमणीयममुं क्षमाभृतं न हि साध्वाचरितं त्वया घ्नता ॥९/४॥"[३] इति।

अथ पित्रादेशेन नरहत्यायाः पापक्षालनाय तीर्थगमनवर्णनायां पुत्रधर्मोऽपि द्योत्यते अत्र । ततः परं दशमे सर्गे वारैरेकविंशत्या धरां क्षत्रियेभ्यः विमुक्तकरणेन यथा अधर्मस्योपरि धर्मस्य स्थापनं द्योत्यते तथा काश्यपाय समग्रधरित्रीप्रदानेन विधीयते दानधर्मस्य वर्णनमिति ।

अर्थस्य वर्णनमुपलभ्यते प्रथमे द्वितीये च सर्गे । प्रथमे सर्गे विष्णोः सकाशे देवैः कृतवीर्यसुतस्य प्रतापववर्णनावसरे तस्य समृद्धेः वर्णनमपि नयनपथमुपैति । अनुरूपेणैव द्वितीये सर्गे माहिष्मतीनगर्याः समृद्धिरपि द्योतिता हैहयस्य वर्णनायाम्[४]।

कामस्य वर्णनं दृश्यते तृतीये सर्गे गङ्गायां सुराङ्गनाभिः सह गन्धर्व्वराजस्य चित्ररथस्य विहारवर्णनायां तथा चतुर्थे सर्गे जमदग्निसकाशाद् लोभातिशयवशाद् हैहयेन होमधेनुप्रार्थनायाञ्च ।

---

[१] सा.द.(हरिदास.) पृष्ठे ४२३

[२] परशु.च.(प्र.सं.) पृष्ठे २५

[३] तत्रैव. पृष्ठे ६१

[४] तत्रैव."या नर्म्मदारोधसि निर्म्मिताभून्महिष्मता नाम महीमघोना ।स तत्र सौन्दर्य्यनिधौ नगर्य्यां रेजेऽलकायामिव राजराजः॥२/९॥" इति, पृष्ठे १५

दशमे सर्गे दृश्यते विष्णोरवतारभूतेन परशुरामेण धरा वारैरेकविंशत्या निःक्षत्त्रीकृता, एतेन अधर्म्मपीडितायाः धरित्र्याः भूभारमोक्ष एव सूचितः। पुनः महाकाव्यस्यास्य प्रथमे सर्गे देवानामनुरोधवशाद् भूभारहरणाय एव श्रीहरिणा अवतारपरिगृह्य सानुगतैः नृपकुलैः सह सहस्रभुजस्य बधप्रतिज्ञापि वर्णिता । अतो मोक्ष एव महाकाव्यस्यास्य मुख्यप्रयोजनरूपेण अस्माकं नयनपथमुपैति, विषयेऽस्मिन् मङ्गलाचरणमित्यंशे प्राप्ता कवेरुक्तिरेव प्रमाणत्वेन गृह्यते [१]।

**हैहयविजये**

अत्र धर्मस्य वर्णना दृश्यते प्रथमे सर्गे तस्य हैहयस्य राजधर्मपालनस्य वर्णनायां, तदुदाहरणं यथा –

"अपक्षपातोऽपि जनेषु रक्षणे गुणं हि जग्राह नियोगकर्म्मसु।
न चैष दण्डं प्रणिनाय नायको न दोषमालोच्य विचारपण्डितैः॥१/१५॥
निवर्त्तयन्नीहितमप्यघं कृती प्रवर्त्तयन् पुण्यपथे च वासनाः।
स रञ्जयन् भूततति विभूतिभी रराज धर्म्मो भुवि मूर्त्तिमानिव॥१/१६॥"[२] इति।

पुनः प्रथमसर्गस्य चतुर्थे श्लोके महाकविः हैहयं कुवेरेण सह तुलयति, एतेन हैहयानां समृद्धिरेव द्योत्यते ; अतो विहिता अत्र अर्थस्य वर्णना - "समृद्धिमत्यामलकाधिपोऽपरः स राजराजः सुतरामराजत।॥१/४॥"[३] इति । ततः परं द्वितीये सर्गे जलकेलिवर्णनायामस्ति कामस्य वर्णना, तदुदाहरणं यथा –

"बधूसहस्रेण सहस्रबाहुः स नर्म्मदाम्भः शिशिरं जगाहे ।
वृन्द्रेन साक्षात् सुरसुन्दरीणां मन्दाकिनीतोयमिवामरेन्द्रः॥२/५॥"[४] इति।

महाकाव्यस्यास्य वृत्तान्ते हैहय एव मुर्त्तो धर्मो रावणस्तु मुर्त्तोऽधर्मः, अतो हैहयसकाशे रावणस्य पराजये अधर्मात् सामयिको मोक्ष एव सूच्यते, अत एव परोक्षतया विहिता मोक्षस्य वर्णना । अनेन प्रकारेण हैहयविजयस्य वृत्तान्तं तथा चतुर्वर्गवर्णनं समीक्ष्य धर्म एवात्र मुख्यप्रयोजनरूपेण प्रतिभाति, विषयेऽस्मिन् काव्यस्यास्य मङ्गलाचरणे कविभूषणस्यास्य हेमचमद्रस्य उक्तिरेव मानम् [५]। अनया क्षत्रप्रतिष्ठया क्षत्रधर्मस्यापि प्रतिष्ठा जाता । अतो धर्म एवात्र मुख्यत्वमेति ।

---

[१] परशु.च.(प्र.सं.) "...भूभारमोक्षः फलम्॥८॥" इति, पृष्ठे ६

[२] हैहय.वि.(प्र.सं.) पृष्ठे १४

[३] तत्रैव. पृष्ठे ११

[४] तत्रैव. पृष्ठे १८

[५] तत्रैव."काव्येस्मिन्नवहीनशक्तिजनिते...क्षत्रप्रतिष्ठा फलम् ॥४॥" इति, पृष्ठे ९

**पाण्डवविजये**

महाकाव्यस्यास्य प्रथमे सर्गे प्रथमे श्लोके अस्ति कामधर्मयोर्वर्णना –

"श्रियं निजां ज्ञातिजनेन मायिना जितामुपप्लव्यमधिष्ठितश्चिरात् ।
स्वधर्मनिष्ठः समयावधिं गतः शमेन लब्धुं चक्रमे युधिष्ठिरः॥१/१॥"[१] इति।

अतः परं सर्गस्यास्य पञ्चमे श्लोके अस्ति अर्थस्य वर्णना –

"श्रिया वियुक्तस्य जनस्य जीवितान्मृतिर्वरं, तेन विधीयतां नु किम्।
न धर्मकामावपि तस्य गोचरे त्रिवर्गमूलं धनमेव साधनम्॥१/५॥"[२] इति।

काव्येस्मिन्नष्टमे सर्गे अष्टमे श्लोके "कर्मयोगोपदेशेन कृष्णेन छिन्नसंशयः..॥८/८॥"[३] इत्यंशेन निष्कामकर्माभ्यासमेव मोक्षसाधनमिति वक्तव्यमेव द्योत्यते, अनेनैव विहिता मोक्षरूपस्य चतुर्थवर्गस्य वर्णना महाकविनामुना । पुनः सर्वेषु सर्गेषु प्रवहति धर्मस्य फल्गुधारा, महाकाव्यस्यान्ते च दृश्यते अधर्मभूतानां कौरवानाम् अभिबवादनन्तरं धर्मस्य संस्थापनम्, अतो अत्रापि धर्म एव मुख्यप्रयोजनरूपेण नयनपथमुपैति ।

## सतां गुणकीर्तनम् खलनिन्दा च

अलंकारशास्त्रगतेन विधानानुसारेण महाकाव्ये यथा सतां गुणकीर्तनं कर्त्तव्यं तथा खलानां निन्दापि विधेया कविना । तदुक्तं साहित्यदर्पणे "क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्तनम्।॥६/३०२॥"[४] इति । विधानस्यास्य अनुसरणं दृश्यते हेमचन्द्रेण प्रणीतेषु आलोच्यमानेषु महाकाव्येषु वृत्तान्तेषु, यथा –

**परशुरामचरिते**

महाकाव्येऽस्मिन् युगपत् प्रतिनायकभूतस्य खलस्य हैहयेशस्य कार्त्तवीर्य्यस्य अर्जुनस्य निन्दया सह नायकस्य तथा विष्णोरवतारभूतस्य सज्जनस्य परशुपाणेः रणपण्डितस्य परशुरामस्य गुणकीर्तनमपि वर्णितमस्ति महाकविना हेमचन्द्रेण ।

अत्रत्ये महाकाव्ये द्वितीये सर्गे आदिभूते श्लोकपञ्चके (श्लोकाः१-५) पितृगृहे परशुरामस्य कैशोरवर्णनायां शिक्षाग्रहणविषये पुनः सर्गस्यास्य शेषार्धे देवादिदेवसकाशाद् अस्त्रशिक्षाग्रहणवर्णनायां तथा परशुराम इति नाम्ना

---

[१] पा.वि.(द्वि.सं.) पृष्ठे ५

[२] तत्रैव. पृष्ठे ६

[३] तत्रैव. पृष्ठे ६३

[४] सा.द.(हरिदास.) पृष्ठे ४२३

प्रसिद्धिलाभेन विहितं तस्य गुणकीर्त्तनमिति । एतद्व्यतीत्य अपरेषु सर्गेषु विविधेषु प्रसङ्गेषु नायकस्यास्य गुणकीर्त्तनस्य द्योतनं सम्यगनुभूयते । गुणकीर्त्तनस्य उदाहरणतया उद्ध्रियते श्लोकोऽयम् –

"अनन्यसाधारणधीगुणाढ्यं सदा सुपात्रं प्रति सुप्रसन्ना ।
अध्येतुकामं नियमेन विद्याः स्वयं सरस्वत्युपसंश्रितैनम् ॥२/३॥"[1] इति ।

अथ प्रथमे सर्गे श्रीहरेः सकाशे देवैः विहितायां हैहयवर्णनायां श्लोकद्वये (२६,२७ च) तथा पञ्चमे सर्गे सुतस्य परशुरामस्य सविधे वने कृतं हैहयराजपीडनं वर्णनावसरे मातुः रेणुकायाः वाक्ष्वेव (श्लोकाः १२-१७) चित्रिता हैहयेशस्य अर्जुनस्य निन्दा । निन्दाया उदाहरणमेकं यथा –

"गुरोर्महर्षेर्मम चावमाननं त्वमेव पुत्र प्रतिकर्त्तुमर्हसि ।
गृहाण शस्त्रं निगृहाण हैहयं गृहीतधेनुं जनकस्य दस्युवत् ॥५/१७॥"[2] इति ।

**हैहयविजये**

अत्रापि युगपत् प्रतिनायकभूतस्य खलस्य लङ्केश्वरस्य निन्दया सह नायकस्य तथा सज्जनभूतस्य हैहयस्य गुणकीर्तनमप्युपलभ्यते । महाकाव्यस्यास्य प्रथमे सर्गे हैहयचरितकथनावसरे आद्यन्तौ कृतं तस्य गुणकीर्तनम्, तदुदाहरणतया उद्ध्रियते श्लोकोऽयम् –

"ववौ समीरः सुखमस्य शासने जहौ समुदोऽपि जनोपपीडनम्।
प्रभुत्वमेवं जगति प्रवर्त्तयन्ननूपराजोऽनुपमो गुणैरभूत्॥१/१२॥"[3] इति।

अथ मन्त्रिवाक्यमिति पञ्चमे सर्गे लङ्केश्वरामात्यस्य सारणस्य वचनानि श्रुत्वा हैहयस्य मन्त्रिमुख्यः प्रत्युत्तरावसरे निनिन्द लङ्केश्वरम् अन्तिमस्थे श्लोकनवके, तेषु श्लोकद्वयमेव यथा –

"दुर्ज्जयो यदि रणे स पण्डितः कूटनीतिमवलम्बते कथम्।
तं प्रमत्तमवनीपतिं खलो यज्जिगीषुरधुना न लज्जते॥५/२२॥
नूनमेकरथनिर्ज्जितक्षितेरर्ज्जुनादभिभवं वितर्कयन्।
अप्रमत्तमतिदुर्ज्जयं न तं प्राप्तुमुत्सहत एष मत्सरी॥५/२३॥"[4] इति।

---

[1] परशु.च.(प्र.सं.) पृष्ठे १४

[2] तत्रैव. पृष्ठे ६९

[3] हैहय.वि.(प्र.सं.) पृष्ठे १३

[4] तत्रैव. पृष्ठे ३७

### पाण्डवविजये

अत्रापि युगपत् प्रतिनायकभूतानां तथा खलानां धृतराष्ट्रदुर्य्योधनाश्वत्थामादीनां निन्दया सह कृष्णयुधिष्ठिरादीनां सतां गुणकीर्तनमप्युपलभ्यते । पाण्डवानां प्रशंसा तु बहुषु काव्येषु चिरश्रुतमेव; अत इह केवलं पाण्डवप्रतिपक्षं प्रति कविविहिता निन्दा एव उपस्थापिता । महाकाव्यस्यास्य प्रथमे सर्गे अत्रपस्य धृतराष्ट्रस्य निन्दा दृश्यते युधिष्ठिरोक्तिषु[१]। दुर्य्योधनस्य निन्दा विहिता आदौ पञ्चमे सर्गे, यत्र कविभूषणः तं भोगिना सह तुलयतीति[२]।

अस्मिन्नेव सर्गे पुनः विदुरवदननिःसृतैः चतुर्भिः श्लोकैः विहिता कविनामुना दुर्य्योधनकर्णयोः निन्दा । अथ पुरुषकारकलङ्कभूतस्य अश्वत्थाम्नो निन्दा दृश्यते दशमे, द्वादशे च सर्गे । दशमे सर्गे तस्य निन्दा परिलक्ष्यते पादमात्रेण[३]। द्वादशे सर्गे द्वैपायनेन निगदिता द्रौणिनिन्दा विलसति एकस्मिन्नेव श्लोके[४]। पुनरस्मिन् सर्गे कृष्णेनापि प्रयुक्ता तस्य कृते निन्दाभिशम्पातवाणी श्लोकद्वये –

> "रे सुप्तबालोऽघ्न महापराधिन् नैतावती सिद्धिरुपैष्यति त्वाम् ।..॥१२/१३॥
> नानाविधव्याधिनिपीडितस्त्वं निराश्रयो भ्राम्यसि यावदस्मिन् ।
> राजाभिमन्योस्तनयः परिक्षित् क्षितिं प्रशासिष्यति ते समक्षम् ॥१२/१४॥"[५] चेति ।

## वृत्तविधानम्

अस्मादनन्तरं विश्वनाथेन विधीयते छन्दोविधानम्, महाकाव्यस्य सर्गाः साधारणतया एकप्रकारच्छन्दोभिर्बद्धा भवन्ति, सर्गान्ते तु सन्ति वृत्तान्तराणीति[६]। अस्योदाहरणं दृश्यते हेमचन्द्रीयेषु महाकाव्येषु यथा –

### परशुरामचरिते

महाकाव्येऽस्मिन् सर्गपञ्चके विधानस्यास्य यथायथमनुसरणमुपलभ्यते, यथा - चतुर्थे सर्गे प्रायः सर्वत्र सुन्दरीति अर्धसमवृत्तस्य प्रयोगो दृश्यते (४/१-३३)। सर्गान्ते औपच्छन्दसिकम् (४/३४-३६), शार्दुलविक्रीडितम् (४/३७) चेति वृत्तद्वयमुपलभ्यते । पञ्चमसर्गस्य अधिकांशाः श्लोकाः वंशस्थविलमिति वृत्तेन लिखिताः (५/१-२०), परन्तु अन्तिमे श्लोकत्रितये यथाक्रमेण रथोद्धता (५/२१), वसन्ततिलकम् (५/२२,२३) चेति वृत्तद्वयमेव दृश्यते । अथ

---

[१] पा.वि.(द्वि.सं.)"अवैमि तातं धृतराष्ट्रमत्रपं श्रियोऽप्रदानेन शमं य इच्छति।..॥१/७॥" इति, पृष्ठे ६

[२] तत्रैव."अभिमानोष्णनिश्वासग्लपिताधरपल्लवः।द्विजिह्व इव जिह्मोऽसौ विससर्ज वचोविषम् ॥५/३०॥" इति, पृष्ठे ४०

[३] तत्रैव."द्रौणायनेः पुरुषकारकलङ्कभूते ...॥१०/२॥" इति, पृष्ठे ८६

[४] तत्रैव."क्षत्रः प्रशान्तो विजितेन्द्रियोऽयं न त्वं तथा विप्रसुतोऽपि धिक् त्वाम्। अयं त्वदस्त्रप्रशमैकलक्ष्यो जिघांसुरेनं न तु लज्जसे त्वम्॥१२/७॥" इति, पृष्ठे १०१

[५] तत्रैव. पृष्ठे १०२

[६] सा.द.(हरिदास.)"एकवृत्तमयैः पद्यैरवासनेऽन्यवृत्तकैः॥६/३०२॥" इति, पृष्ठे ४२३

सप्तमे सर्गे यथाक्रमेण अनुष्टुप् (७/१-५९), मालिनी (७/६०) चेति समवृत्तछन्दोद्वयस्योपस्थितिर्दृश्यते । अष्टविंशतिश्लोकान्विते नवमे सर्गे सुन्दरीति अर्धसमवृत्तस्य भूयः प्रयोगो दृश्यते (९/१-२४)। परन्तु सर्गान्ते यथाक्रमेण हरिणी (९/२५), वंशस्थविलम् (९/२६), पृथ्वी (९/२७), वसन्ततिलकम् (९/२८) चेति समवृत्तानामुपस्थितिर्दृश्यते । दशमे सर्गे अस्ति अनुष्टुप् (१०/१-४७), स्रग्धरा (१०/४८) चेति वृत्तद्वयम् ।

**हैहयविजये**

महाकाव्यस्यास्य षष्ठेषु सर्गेषु वृत्तविधानस्य अनुसरणमुपलभ्यते, यथा - प्रथमे सर्गे षड्विंशतिसंख्यकेषु श्लोकेषु दृश्यते वंशस्थविलमिति वृत्तम् (१/१-२६)। सर्गस्यास्य अन्तिमश्लोकद्वये विद्यते यथाक्रमेण वसन्ततिलकम् (१/२७), मालिनी (१/२८) चेति वृत्तद्वयम् । द्वितीये सर्गे यथाक्रमेण उपजातिः (२/१-२८), वसन्ततिलकम् (२/२९) चेति वृत्तद्वयमेव विलसति । ततः परं चतुर्थसर्गे अनुष्टुबिति वृत्तस्य प्रयोगाधिक्यं नयनपथमुपैति (४/१-२२) ; सर्गस्यान्ते तु दृश्यते यथाक्रमेण पुष्पिताग्रा (४/२३), मालिनी (४/२४), शालिनी (४/२५) चेति वृत्तत्रयम् । पञ्चमे सर्गे तु केवलं रथोद्धता, वसन्ततिलकम् चेति समवृत्तद्वयमेवोपलभ्यते, तत्र सप्तविंशति श्लोकाः रथोद्धता इति वृत्तेन उपनिबद्धाः (५/१-२७) ; सर्गस्य अन्तिमश्लोके अस्ति वसन्ततिलकमिति वृत्तम् (५/२८)। चतुर्थसर्गे इव अष्टमसर्गेऽपि अनुष्टुबिति वृत्तस्य प्रयोगाधिक्यमुपलभ्यते (८/१-३६) ; सर्गस्य अन्तिमश्लोकत्रये तु विद्यते मालिनी (८/३७), शिखरिणी (८/३८), पुष्पिताग्रा (८/३९) चेति वृत्तत्रयम् । नवमे सर्गे प्रधानतया दृश्यते सुन्दरीति वृत्तम् (९/१-२८) ; अन्तिमश्लोकपञ्चके तु यथाक्रमेण रुचिरा (९/२९), वंशस्थविलम् (९/३०), शार्दूलविक्रीडितम् (९/३१,३२), मालिनी (९/३३) चेति वृत्तचतुष्टमेव विलसति ।

**पाण्डवविजये**

द्वादशसर्गान्विते महाकाव्येऽस्मिन् केवलं सर्गचतुष्टये एव वृत्तविधानस्य सम्यगनुसरणं दृश्यते, यथा - प्रथमे सर्गे वंशस्थविलम् प्रयुज्यते प्राधान्येन (१/१-३६) ; परन्तु सर्गस्यास्य अन्ते श्लोकचतुष्टये यथाक्रमेण वसन्ततिलकम् (१/३७), तोटकम् (१/३८), पुष्पिताग्रा (१/३९), मालिनी (१/४०) चेति वृत्तचतुष्टयमेवोपलभ्यते । ततः परं द्वितीये सर्गे केवलं अर्धसमवृत्तानां प्रयोग एव दृश्यते यतः अन्तिमश्लोकं व्यतीत्य सर्व्वेषु श्लोकेषु दृश्यते सुन्दरीति अर्धसमं वृत्तम् (२/१-३७) ; अन्तिमश्लोकेऽपि पुष्पिताग्रा इति अर्धसमं वृत्तमेव अस्ति (२/३८)। तृतीये सर्गे यथाक्रमेण रथोद्धता (३/१-३४), वसन्ततिलकम् (३/३५) चेति वृत्तद्वयस्य अवस्थानं दृश्यते । अथ षष्ठे सर्गे अन्तिमश्लोकं विहाय सर्व्वेषु श्लोकेषु अनुष्टुबिति वृत्तमेवोपलभ्यते (६/१-८२) ; अन्तिमश्लोके तु विद्यते शिखरिणीति वृत्तम् (६/८३)।

## सर्गान्तविधानम्

महाकाव्यस्य सर्गाणामन्ते भाविसर्गस्य कथायाः सूचनं अवश्यमेव कर्त्तव्यम्, अत्र साहित्यदर्पणोक्तं विधानमेव मानम् "सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्॥६/३०२॥"[1] इति । वैशिष्ट्यमिदमनुसृत्य कविभूषणो हेमचन्द्रः सर्गेषु अन्तिमे उपान्तिमे वा श्लोके श्लोकसमुहे वा उत्तरवर्तिसर्गाणां वृत्तान्तान् सूचयति । वैशिष्ट्यमिदं हेमचन्द्रस्य महाकाव्येषु अस्ति नास्ति वेत्येव अधस्तादालोचितं महाकाव्यत्रयमाधारीकृत्यैव, तद् यथा –

### परशुरामचरिते सर्गाणामन्ते भाविसर्गस्य कथायाः सूचनम्

**रामाविर्भावः >** अत्र अन्तिमे भागे आर्त्तत्राणाय अनुगतैः नृपकुलैः सह युधि हैहयस्य बधं भविष्यतीति श्रीहरेः आश्वासनेन, रामाविर्भाववर्णनेन च परवर्तिनि सर्गे हैहयेन आपवाद् बधाभिशापप्राप्तिः, देवादिदेवात् परशुरामेण दिव्यास्त्रलाभादयो वृत्तान्ताः सूचिताः।

**दिव्यास्त्रलाभः >** सर्गस्यास्य उपान्तिमे श्लोकद्वये देवादिदेवात् परशुं, विजयञ्चचापं प्राप्य स्वगृहाश्रमप्रत्यागमनवर्णनेन तृतीयसर्गगतानि वृत्तानि जमदग्नेराश्रमे भविष्यन्तीत्येव सूचितानि ।

**वरप्राप्तिः >** सर्गस्यास्य प्रायः अन्तिमे भागे मातृबधादनन्तरं पितुः सकाशे वरप्रार्थनावसरे द्वितीयत्वेन प्रार्थितेन वरेणैव परवर्तिनः सर्गस्य संघर्षाश्रितत्वमेव प्रतिपादितमिति "युधि प्रतिद्वन्द्विनमत्र लोके यथा न जानीय तव प्रसादात् । पराहतः स्यान्न परश्वधो मे.. ॥३/२२॥"[2] इति।

**जमदग्न्यर्जुनसंघर्षः >** सर्गेऽस्मिन् जमदग्निभार्यायाः वचनं श्रुत्वा बलगर्वितस्य हैहयस्य प्रत्युत्तरेणैव द्योतिता हैहयमुद्दिश्य परशुरामस्य रणप्रयाणवर्णना पञ्चमसर्गस्थिता ।

**रणप्रयाणम् >** सर्गास्यास्य अन्तिमे श्लोकपञ्चके रणोद्यतस्य भृगुवीरस्य रामस्य या वर्णना सन्निवेशिता तयैव षष्ठे सर्गे भार्गवहैहययोः रणे हैहयाधिपतेः अवश्यम्भाविपराजयस्तु द्योतितो नात्र सन्देहावसरः।

**युद्धम् >** अत्र सर्गान्ते श्लोकद्वये भार्गवस्य अस्त्राघाते मोहगतस्य हैहयस्य पुराभिगमनेन परवर्तिनि सर्गे पुनः हैहयेन युद्धोपक्रमो भविष्यतीत्येव प्रतीयते ।

---

[1] सा.द.(हरिदास.) पृष्ठे ४२४

[2] परशु.च.(प्र.सं.) पृष्ठे २६

**पुनर्युद्धोपक्रमः >** सर्गेऽस्मिन् महिष्या सह कार्त्तवीर्यस्य कथोपकथनादनन्तरं समरे पत्युर्निपातमनुभूय तया पत्युः देहात्ययात् प्राक् अग्निप्रवेशप्रयत्नेन अष्टमे सर्गे हैहयस्य बधमेव द्योतितमिति ।

**कार्त्तवीर्यार्जुनबधः >** अत्रत्ये अन्तिमे श्लोके जमदग्नेः आश्रमे होमधेनोः प्रत्यानयनेन सूचितो यदुत्तरवर्तिनि सर्गे काव्यवृत्तान्तास्तु जमदग्नेः आश्रमे एव भविष्यतीति ।

**रामविलापः >** अष्टविंशतिश्लोकात्मके सर्गेऽस्मिन् चतुर्विंशतितमे श्लोके दृश्यते पितृशोकार्दितस्य पितृबधामर्षप्रदीप्तस्य परशुरामस्य निखिलक्षत्रियबधप्रतिज्ञा । अनया प्रतिज्ञयैव क्षत्त्रसङ्क्षयो नाम अन्तिमसर्गस्य वृत्तान्ताः द्योतिता इति ।

## हैहयविजये सर्गाणामन्ते भाविसर्गस्य कथायाः सूचनम्

**चरिताख्यानम् >** अत्रान्तिमे श्लोकषट्कान्तर्गते त्रयविंशतितमे श्लोके नृपाङ्गनाभिः हैहयसेवावर्णने परवर्तिसर्गे रेवाविहाराख्ये अङ्गनाभिः सह कार्त्तवीर्यस्य जलकेलिरेव सूचिता परोक्षत्वेन इति ।

**रेवाविहारः >** अत्रान्तिमे श्लोके उत्तरार्धे "..रन्ध्रप्रहारकुशलस्य निशाचरस्य ॥२/२९॥"[१] इत्यंशेन उत्तरवर्तिनि सर्गे रेवातटे दशाननस्यागमनमेव सूचितमस्ति ।

**रावणरेवाभिगमनम् >** अत्रापि अन्तिमे श्लोकपञ्चके रावणोक्तेन रेवाप्रवाहवर्णनेन तथा तस्यादेशानुसारेण तदनुचराणां जलक्रीडाद्वारेणोत्तरवर्तिनः सर्गस्य रेवाप्रवाहसम्बन्धिता वृत्तान्ताः सूचिताः।

**रेवाप्रवाहरोधः >** सर्गस्यास्यान्तिमे श्लोकचतुर्थके प्रमत्तस्य हैहयाधिपतेर्वर्णनया पञ्चमे सर्गे रन्ध्रपहारकुशलस्य निशाचरेश्वरस्य युद्धोद्योगः तथा प्रमत्तेन सह युद्धो न विधेय इत्यदिषु विषयेषु पौलस्त्यहैहययोरमात्यानां मध्ये भाविवितण्डापि सूचिता जाता ।

**मन्त्रिवाक्यम् >** सर्गेऽस्मिन् अन्तिमे श्लोके हैहयामात्यानां संकल्पेन षष्ठे सर्गे नरराक्षसयोः सैन्ययोर्मध्ये युद्ध एव द्योत्यते ।

**समराभिगमनम् >** अस्य सर्गस्यान्ते पद्यकुसुमे रामाः परित्यज्य प्रभाविनः सहस्रबाहोः समराभिगमनवर्णने कार्त्तवीर्यस्य संकल्पेन लङ्केश्वरस्य तथा राक्षससैन्यानां पराजयोऽपि सूच्यते परवर्तिनि सर्गद्वये "तथापि रक्षस्तव मद्भुजाग्रादहेः सुपर्णादिव नास्ति मोक्षः।॥६/१९॥"[२] इति।

---

[१] हैहय.वि.(प्र.सं.) पृष्ठे २२

[२] तत्रैव. पृष्ठे ४२

**रक्षःसैन्यपराभवः >** अत्रत्येऽन्तिमे श्लोके दशास्याभिमुखे गदाधारिणो हैहयस्य समुत्पतनेन परवर्तिनि सर्गे हैहय-पौलस्त्ययोरवसम्भावियुद्धवर्णनमेव सूच्यते । अपि च षष्ठे सर्गे लङ्केश्वरस्य पराभवोऽपि सूचितः अतः तदनुसारेण पराजयादनन्तरं रावणस्य निग्रहोऽपि सूच्यते अत्र।

**दशग्रीवनिग्रहः >** अस्मिन् अष्टमे सर्गे दशाननस्य पराजयो दृश्यते हैहयसकाशे परन्तु अत्र नवमसर्गस्य कथायाः प्रत्यक्षतया सूचना नास्ति, अस्ति तु केवलं परोक्षतया । सर्गेऽस्मिन् पौलस्त्य इति अभिधया अभिधीयते रावणो वारत्रयम् । रामायणस्य उत्तरकाण्डान्तर्गतेन आख्यानानुसारेण पुलस्तमुनेः अनुरोधेनैव रावणस्य मुक्तिः तथा हैहयरावणयोर्मध्ये मैत्री अपि अभूत्, अतः पौलस्त्य इति पदस्य व्यवहारेणैव सूच्यते यद्, रावणमोचनम् इत्याख्ये नवमे सर्गे पुलस्तानुग्रहेण रावणस्य मुक्तिर्भविष्यतीति।

**पाण्डवविजये सर्गाणामन्ते भाविसर्गस्य कथायाः सूचनम्**

**दूतविनियोगः >** अत्र अन्ते द्रौपद्याः अवस्थावर्णनात्मके श्लोकद्वये श्रीकृष्णेन सह द्रौपद्याः कथोपकथनात्मकस्य उत्तरवर्तिनः सर्गस्य विषय एव सूच्यते ।

**द्रौपदीवाक्यम् >** सर्गेऽस्मिन् अन्तिमे श्लोके द्रौपदीं समाश्वास्य शौरेः रथारोहणवर्णनेन उत्तरवर्त्तिनि सर्गे द्यौत्याय हस्तिनापुरगमनमेव द्योत्यते । पुनः प्रथमसर्गे युधिष्ठिरेण विदुरस्य व्यर्था शान्तिप्रचेष्टापि वर्णिता, अतस्तत्रत्ये हस्तिनापुरे स एवैको धर्माश्रयः। एतेन तृतीयसर्गे तदीये धर्माश्रये श्रीहरेः आतिथ्यग्रहणमपि सूच्यते परोक्षत्वेन ।

**भक्तभगवत्समागमः >** अत्रत्ये उपान्तिमे श्लोके विदुरातिथिं माधवमवाप्य पृथा द्रौपदीगतमथात्मजाश्रयं कुशलं यथाक्रममन्वयुङ्क्त । अनेन चतुर्थे सर्गे कृष्णकुन्तीसंवादस्य प्रारम्भ एव सूच्यते ।

**कुन्तीकृष्णसंवादः >** सर्गान्ते विलापातुरां कुन्तीं समाश्वासनावसरे माधवेन पाण्डवैः सह धार्त्तराष्ट्रानां सन्धेः असम्भवत्वं यथा वर्णितम्, तथैव युधिष्ठिरस्य समरद्योगोऽपि वर्णितः। एतेन पञ्चमे सर्गे श्रीकृष्णेन साम्ना शमप्रस्तावोत्थापनं यथा सूचितमस्ति तथैव सूचितमस्य व्यर्थत्वमपीति ।

**सामप्रयोगः >** अत्र कुरुसभायां माधवदुर्य्योधनयोर्वादानुवादे, दुर्य्योधनस्य माधवनिग्रहेच्छायां

चित्रिता सामनीतेः विफलता । सामे विफले भेदस्तु प्रयोक्तव्यः, अतः सामस्य वैफल्येन परवर्त्तिनि सर्गे भेदप्रयोग एव सूचितो ।

**भेदप्रयोगः >** अत्र अङ्गराजकर्णमुपजप्य तस्माद् अर्ज्जुनं व्यतिरिच्य "नान्ये मे पाण्डवा वध्याः"[१] इति प्रतिश्रुतिप्रपणेन तथा प्रत्यावर्तनपथि मद्राधिपं मातुलं शल्यं पूर्वप्रतिश्रुतं कर्णतेजवधमिति प्रतिश्रुतेः स्मारणेन युद्धरूपस्य दण्डोद्योगस्य सूचना एव विहिता।

**दण्डोद्योगः >** अत्रत्ये सर्गे पाण्डवानां समरोद्योगवर्णनमेव विहितम्, वर्णनेनानेन अष्टमे सर्गे वर्णितस्य कुरुक्षेत्रयुद्धस्य प्रारम्भ एव सूच्यते ।

**कुरुक्षेत्रयुद्धम् >** अन्तिमे श्लोके कुरुक्षेत्रे धर्मयुद्धे पराजितो हतबन्धुवर्गो दुर्य्योधनो द्वैपायनह्रदं प्रविवेश । महाभारतकथां आधारीभूते अस्मिन् महाकाव्ये अनेन ह्रदप्रवेशवर्णनेन परस्थितेनवमे सर्गे चित्रिते भीमदुर्य्योधनयोर्गदायुद्धे भीमेन दुर्य्योधनोरुभङ्ग एव द्योत्यते ।

**दुर्य्योधनोरुभङ्गः >** सर्गेऽस्मिन् दृश्यते भग्नसक्थं दुर्य्योधनमवलोक्य विलापातुराणां कृप-कृतवर्माश्वत्थामानां सान्त्वनादानावसरे कुरुयुवराजस्य वचनानि श्रुत्वा द्रौणिना विहिता रजनिमध्ये पाण्डवविनाशप्रतिज्ञा । एतेन सौप्तिकमिति दशमसर्गस्य सम्पूर्णा कथा एव सूचिता ।

**सौप्तिकम् >** अत्र पाञ्चालद्रौपदेयान् हत्वा कपिकेतोः पराक्रमं स्मृत्वा अस्थिरमतिना द्रौणिना व्यासपदाभिमुखं गमनेन परवर्त्तिनि सर्गद्वये वर्णिताः वृत्तान्ताः (अर्थात् पाण्डवाश्वत्थाम्नोः युद्धो पराजयात् परं द्रौणेः निग्रहः प्रभृतयः) व्यासाश्रमे एव भविष्यतीत्येव सूचिताः।

**दिव्यास्त्रप्रयोगः >** अत्रत्ये अन्ते भागे द्रौणिना पाण्डवनाशाय ब्रह्मशिरास्त्रप्रयोगो दृश्यते । ततो माधवोपदेशेन धनञ्जयः केवलमेव परास्त्रवारणाय ब्रह्मशिरास्त्रं विससर्ज । एतेनैव महाभारतकथात्मके अस्मिन् महाकाव्ये 'द्रौणिनिग्रहः' इति अन्तिमसर्गस्य वृत्तान्ताः सूचिता जाता परोक्षतया ।

---

[१] पा.वि.(द्वि.सं.) ६/७८ पृष्ठे ५३

## सर्गनामविधानम्

महाकाव्यगतानां सर्गाणां पृथक् पृथग् नामकरणमपि कर्त्तव्यम्, निगदितञ्च साहित्यदर्पणे "नामास्य सर्गोपादेयकथया सर्गनाम तु ॥६/३०२॥"[१] इति । अर्थात्, सर्गान्तर्गतवर्णनीयविषयेषु योऽतीव रमणीयः, तदनुसारेणैव भवेत् सर्गस्य नामकरणम् । हेमचन्द्रस्य महाकाव्येषु वैशिष्ट्यमिदमनुस्रियते सम्यक्तया, तद् यथा –

### परशुरामचरितस्य सर्गनामानां याथार्थ्यकथनम्

**रामाविर्भावः >** हैहयप्रपीडितानां प्रतिकारप्रार्थीनां देवानां भगवतो श्रीविष्णोः सकाशे गमनम्, तेषामार्त्तिं श्रुत्वा श्रीहरिणा जमदग्निपत्न्याः रेणुकायाः पञ्चमगर्भजातेन रामरूपेण धरायाम् अवतरणमित्यादीनि मूलानि वृत्तानि एव रमणीयानि । अतः सुयुक्तमिदं सर्गनाम ।

**दिव्यास्त्रलाभः >** अष्टत्रिंशत्श्लोकात्मकेऽस्मिन् सर्गे जामदग्न्यस्य कैशोरवर्णनेन अस्त्रविद्यायां तस्य दाक्ष्यं प्रतिपादितम् आदिभूते श्लोकपञ्चके (श्लोकाः १-५), अथ पित्रोरनुज्ञामधिगत्य दिव्यास्त्रलाभाय शिवाराधनं तपश्चरणं ततः परं देवादिदेवाद् अस्त्रशिक्षालाभान्ते दिव्यास्त्राणां (परश्वादीनाम्) प्रापणम् इत्यदीनि रमणीयान्येव वृत्तानि आधिक्येनैव वर्णितानि (श्लोकाः १८-३८), एतेनैवाभिव्यज्यते नाम्नो याथार्थ्यमिति ।

**वरप्राप्तिः >** अत्र जलविहाररतं चित्ररथं दृष्ट्वा रेणुकया समयातिपातः, समयातिपाताद् जमदग्नेः क्रोधः, क्रोधाद् जमदग्निना रामाग्रजान् प्रति मातृहननादेशप्रदानम्, आदेशपालने असमर्थत्वाद् जातास्ते अभिशप्ताः, अथ गुरोरादेशरक्षाय रामेण मातृहननं वरप्राप्तिश्चेत्यादीनि वृत्तान्यत्र सन्निवेशितानि ; तर्हि कथं वरप्राप्तेः वृत्तान्तमाधारीकृत्य विहितं सर्गस्यास्य नाम ? पितरौ एव सन्तानस्य कृते गुरुभूतौ ; अत्र दृश्यते यद्, गुरुभूतेन पितृना दीयते गुरुभूतस्याः मातुः हननादेशः विषमावस्थायामस्यां मातृहत्या यथा महापापः तथैव गुरोरादेशलङ्घनमपि महापापत्वेन स्वीकृतः । अतः आदौ गुरोरादेशं परिपाल्य प्रसन्नभूताद् गुरोः सकाशात् वरप्रार्थनाकाले प्रथमवररूपेण प्रार्थितं मातुरग्रजानाञ्च जीवनम् येन स मातृहत्यापापाद् मुक्तो जातः। परशुरामस्य धर्माधर्मविवेकस्य चित्रमिदमतीव रमणीयमिति । पुनः द्वितीयेन वरेण परवर्तीनां सर्गाणां कथाविन्यासोऽपि सूच्यते अतो वरप्राप्तिरिति नाम तु सुयुक्तमेव ।

---

[१] सा.द.(हरिदास.) पृष्ठे ४२४

**जमदग्न्यर्जुनसंघर्षः >** जमदग्निं निकषा आतिथ्यलाभादनन्तरं तस्य मुनेः सकाशात् स नृपः कामदुहां होमधेनुम् अयाचत । परन्तु जमदग्नेः सकाशे नासीद् हैहये दानपात्रता । एतेन कुपितः स नृपो बलमाश्रित्य होमधेनुमहरत् प्रसङ्गेऽस्मिन् भार्गवहैहययोः वादानुवादोऽपि परिवेशितो जातो रमणीयतया, अतो नामकरणमिदं यथार्थमिति ।

**रणप्रयाणम् >** हैहयस्य प्रस्थानादनन्तरं जननीसकाशे हैहयविहितायाः पितुरवमाननायाः वर्णनं श्रुत्वा गृहागतेन अमर्षप्रदीप्तेन रामेण रणाय हैहयमुद्दिश्य प्रयाणमेव वर्णितं तेजविजृम्भितैः रमणीयैः श्लोकैः (श्लोकाः ११-२३), अतो 'रणप्रयाणमि'ति नाम्नैव सम्यगनुमीयते सर्गस्यास्य कथावस्तु, नान्येन ।

**युद्धम् >** हैहयैः सह एकाकिनो जामदग्न्यस्य युद्धवर्णनमेव मुख्यविषयत्वाद् युद्धमिति नाम सुयुक्तम्।

**पुनर्युद्धोपक्रमः >** पूर्वस्मिन् सर्गे युद्धस्य प्रथमार्धे परशुरामाघाते मुर्छितेन हैहयेन युद्धाय पुनरुपक्रम एव वर्णितो जातः सर्गेऽस्मिन् ।

**कार्त्तवीर्यार्जुनवधः >** सर्गेऽस्मिन् परशुरामेण कार्त्तवीर्य्यस्य बध एव केन्द्रीयविषयः।

**रामविलापः >** हैहयवंशपांशुलैः जमदग्नेः बधादनन्तरं निलयागत्य मृतं पितरं प्राप्य शोकार्दितस्य रामस्य विलाप एव मुख्यत्वेन चित्रितो जातः, अतो युक्तमिदं नामेति ।

**क्षत्त्रसङ्क्षयः >** धरायाः निःक्षत्त्रिकरणमेव वर्णितं मुख्येन प्रकारेण समग्रे सर्गे ।

## हैहयविजयस्य सर्गनामानां याथार्थ्यकथनम्

**चरिताख्यानम् >** हैहयस्य कार्त्तवीर्यस्य चरितवर्णनत्वात् तथा तस्य शासने माहिष्मत्याः समृद्धिवर्णनत्वाच्च यथार्थमिदं नामकरणम् ।

**रेवाविहारः >** नर्मदायां बधूसहस्रेण सह सहस्रबाहोः रमणीया जलकेलिरेव सर्गस्यास्य मूलविषयः।

**रावणरेवाभिगमनम् >** अत्र वर्णितेषु विषयेषु माहिष्मत्यां हैहयमप्राप्य पुररक्षिभिः वचनानुसारेण रावणस्य रेवागमनमेव मुख्यं, रमणीयञ्च। यतस्तद्विहाय काव्यवस्तुनः प्रसारणं न भवति, अतो युक्तमिदं नाम ।

**रेवाप्रवाहरोधः >** कार्त्तवीर्यस्य भुजास्फालनपूर्वकाद् जलविहारत्वाद् रुद्धोऽभूद् रेवाया जलप्रवाहः, एतेन प्रतिकूलां रेवां दृष्ट्वा प्रतिकूलतायाः कारणानुसन्धानादेव रावणचरेण प्राप्तः जलक्रीडारतः कार्त्तवीर्यार्ज्जुनः। अतः सुयुक्तमिदं नाम ।

**मन्त्रिवाक्यम् >** अत्र वर्णिता हैहयलङ्केशयोः अमात्येषु वितण्डा एव रमणीया।

**समराभिगमनम् >** अत्र उभयस्य नायकस्य प्रतिनायकस्य च समराभिगमनमेव रामणीयकं धत्ते । यतः सर्गारम्भे रावणादेशेन हैहयसैन्यैः सह राक्षसानां समरारम्भं यथा दृश्यते तथैव सर्गान्ते दृश्यते राक्षसान् प्रति कार्त्तवीर्यस्य समराभिगमनम् ।

**रक्षःसैन्यपराभवः >** सर्गेऽस्मिन् सहस्रबाहोः सकाशे राक्षससैन्यानां पराभव एवातीव रमणीयः।

**दशग्रीवनिग्रहः >** सर्गस्यास्य 'दशग्रीवपराभवः' इति नाम अपि भवितुमर्हति, यतः अत्र युद्धे कार्त्तवीर्यसकाशे रावणः पराभूतोऽभूत् । परन्तु सर्गान्ते कण्ठपाशावरुद्धं पशुमिव दशाननस्याकर्षणकारिणा हैहयेन सूचितो दशकन्धरस्य निग्रहः, अतो युक्तमिदं सर्गनाम 'दशग्रीवनिग्रहः' इति।

**रावणमोचनम् >** पुलस्तमुनेरनुरोधेन क्षमाशीलाद् हैहयाद् रावणस्य मुक्तिरेव सर्गस्यास्य रमणीयतां विदधाति।

## पाण्डवविजयस्य सर्गनामानां याथार्थ्यकथनम्

**दूतविनियोगः >** कौरव्यां सभायां द्यौत्याय श्रीकृष्णं प्रति युधिष्ठिरस्यानुरोधः, दौत्यनीतिविषये युधिष्ठिरार्जुनयोः उपदेशः वैमत्यं च, एवमेव तेषां वाचः परिगृह्य माधवेन हस्तिनापुरं गमनोद्योग इत्यादयो दृश्याः समग्रेऽस्मिन् सर्गे अतीव रम्यतया चित्रिताः, अतो युक्तमिदं सर्गनाम ।

**द्रौपदीवाक्यम् >** अत्र कृष्णाकृष्णयोः संवादे दुःखितायाः पाञ्चाल्या वाचः (श्लोकाः१-२४) एव रमणीयाः। अतो द्रौपदीकृष्णसंवाद इति नाम्नः प्रसङ्गं विहाय द्रौपदीवाक्यमित्येव युक्तम् ।

**भक्तभगवत्समागमः >** अत्र सन्ति माधवेन हस्तिनागमनम्, पुरवर्णनम्, सात्यकिं प्रति कृष्णोपदेशः,

कृष्णदुर्य्योधनसंवादः, विदुरकृष्णमिलनादीनि वृत्तानि । अतः सामान्येन 'हस्तिपुरागमनम्' इति नाम युज्यते, अत्र तु विदुरकृष्णमिलनमाश्रित्य विहितं 'भक्तभगवत्समागमः' इति नाम । सर्गान्तं श्लोकनवकात्मकं (२७-३५ श्लोकाः) गौणवृत्तमिदं यदि प्राधान्येन गृह्यते तर्हि कथं 'विदुरमाधवसमागमः' इति विहाय 'भक्तभगवत्समागमः' इत्येव पदं नामत्वेन स्वीकृतम् ? अस्योत्तरमस्ति विदुरमाधवयोः मिलनवृत्ते । अत्र शौरिणा सह विदुरस्य मिलने उभयोर्मध्ये भक्तभगवत्सम्बन्ध एव दृश्यते, न तु राजनैतिकः पारिवारिकसम्बन्धो वा । यतः स विदुरः तं कृष्णं सर्वभूतान्तरात्मा इति मत्वा तस्याभ्यर्थनाय किं निवेदनीयमिति विषये आदौ अस्थिरो भुत्वा, तदनन्तरमुवाच –

"अर्च्चनाय जगदर्च्चनीय किं पादयोरुपहरामि ते हरे ।

भक्तिचन्दनरसेन वासयंस्त्वं हि चित्तकुसुमं गृहाण मे ॥३/३०॥"[१]

- अतस्तयोर्मध्ये लौकिकात्मीयता न व्यज्यते, प्रतीयते तु भगवन्तं दृष्ट्वा भक्तस्य विह्वलता। पुनः कृष्णस्य त्वरितप्रत्यावर्तनं विचिन्त्य स कुरुवृद्धमन्त्री यथा विललाप, तेन भगवत्सङ्गवियोगनिपीडितं तं माधवपदे निवेदितप्राणभक्तमिवावमन्यते । ईदृश-भावसौकर्यत्वादयमंशः अतीव रम्यतया प्रतीयते, अतो 'भक्तभगवत्समागमः' इत्येव नाम सार्थकतामेति ।

**कुन्तीकृष्णसंवादः >** अत्र समग्रे सर्गे उपस्थापिते पृथामाधवयोः कथोपकथने सहृदयाह्लादजनकतान्विता रम्यता प्रकटिता ।

**सामप्रयोगः >** सर्गेऽस्मिन् सामनीतेः अङ्गरूपेण शान्तिदौत्यम्; पाण्डवाधिकारदानेन शान्तिस्थापने धृतराष्ट्रस्य औदासीन्यम्; दुर्य्योधनं प्रति सन्धिस्थापनाय कुरुबृद्धानाम् अनुरोधः; दुर्य्योधनेन युधिष्ठिराश्रितसामनीतेः निन्दा, माधवनिग्रहप्रचेष्टा इत्यादिषु वृत्तेषु सामप्रयोगादारभ्य तस्य व्यर्थतापि वर्णिता, अतो युक्तमिदं सर्गनाम।

**भेदप्रयोगः >** अत्रत्ये सर्गे आदितः अन्तं यावत् परोक्षतया प्रत्यक्षतया च शौरिणा विहितो भेदः सर्व्वत्रैव दरीदृश्यते रमणीयतया ।

---

[१] पा.वि.(द्वि.सं.) पृष्ठे २८

**दण्डोद्योगः >** पूर्वस्मिन् सर्गद्वये सामे विफले, भेदे समाप्ते युद्धरूपो दण्ड एव प्रयोक्तव्यः। अस्मिन् सर्गे तस्यैव युद्धस्य उद्योग एव दृश्यते उलूकदौत्यात् परं प्राधान्येन । अतो महाकाव्यस्यास्य प्रथमे संस्करणे प्राप्ते 'युद्धोद्योगः' इति नामापेक्षया 'दण्डोद्योगः' इति नाम एव युक्तमिति मन्ये ।

**कुरुक्षेत्रयुद्धम् >** समासेन सारल्येन च निखिले सर्गे कुरुक्षेत्रयुद्धस्य वर्णनत्वात् सर्गस्यास्य कथा नितरामेव उपादेया इत्यत्र नास्ति सन्देहलेशः।

**दुर्य्योधनोरुभङ्गः >** भीमदुर्य्योधनयोः गदायुद्धे ऊरुभङ्गाद् दुर्य्योधनस्य पराजयात् परं गतेषु जेतृषु भग्नसक्थं कुरुयुवराजं प्राप्य कृपाश्वत्थामादीनां विलापः, दुर्य्योधनेन तेषामाश्वासनम्, तस्य समाश्वासनेन प्रदीप्तामर्षेण अश्वत्थाम्ना रजन्यामेव पाण्डवविनाशप्रतिज्ञा, प्रतिज्ञामिमामाकर्ण्य दुर्य्योधनेन उषां यावत् प्राणधारणस्य आश्वासनम् इत्यादिषु वर्णितेषु विषयेषु दुर्य्योधनोरुभङ्ग एव केन्द्रियो विषयो, यत एनं विहाय उत्तरवर्तिविषया नैव प्रवर्तितुं शक्नुवन्ति । अतो नामकरणं सुयुक्तमिति।

**सौप्तिकम् >** सर्गेऽस्मिन् भूतपतेः अनुकम्पया अश्वत्थाम्ना सुखे प्रसुप्तानां पाञ्चालद्रौपदेयानां निधनम् इति सौप्तिकपर्वगतं महाभारतीयं वृत्तमेव सातिशयरमणीयतां विदधाति, अतः सौप्तिकमिति नाम यथायथमेव ।

**दिव्यास्त्रप्रयोगः >** सर्गेऽस्मिन् हतपुत्रबान्धवानवलोक्य द्रौपदीविलापः, व्यासपदे भीमाश्वत्थाम्नोः रणम्, सिताश्वाश्वत्थामाभ्यां ब्रह्मशिरप्रयोग इत्यादिषु विषयेषु दिव्यास्त्रप्रयोगस्य वृत्तमेव गुरुत्वपूर्णम्। यतः अनेन पाण्डवाश्वत्थाम्नोः रणं यथा प्रतिपद्यते तथैव भाविसर्गे अश्वत्थाम्नः पराजयोऽपि सूच्यते ।

**द्रौणिनिग्रहः >** सर्गेऽस्मिन् द्रौणिनिग्रह एव मुख्यविषयो यतः तेनैव पाण्डवानां विजयः समाप्यते सम्यक्तया। अतो युक्तमिदं नाम ।

## गौणलक्षणानि

पूर्वालोचितानि लक्षणानि व्यतिरिच्य महाकाव्यस्य कृते कानिचन गौणलक्षणान्यपि[१] सन्ति, तान्येव लक्षणानि अधिकृत्य सन्ध्यारजनीप्रातरादीनां यथायोगं वर्णनं विधेयम् । प्रसङ्गत उल्लेख्यं यत्, साहित्यदर्पणानुसारेण पुत्रोदयादीनां[२] वर्णना विधेया, अत्र 'आदि' इति शब्देन राजामात्यसेनापतीनां वर्णनापि कार्या इत्यपि बुध्यते, मानमस्मिन् विषये कुसुमप्रतिमाटीका[३]। अत आलोचितेषु महाकाव्यत्रयेषु (परशुरामचरितम्, हैहयविजयम्, पाण्डवविजयश्चेति) सन्निवेशितानि गौणानि लक्षणानि यथा –

| **परशुरामचरितम्** | | |
|---|---|---|
| **गौणलक्षणानि** | **गौणलक्षणान्वितानि स्थानानि** | |
| **क. प्रदोषवर्णनम्** | **सर्गः५** | सूर्यास्तेन सह चन्द्रोदयवर्णनेन विधीयते प्रदोषवर्णनम् (श्लोकाः ८-१०)। |
| **ख. मृगयावर्णनम्** | **सर्गः४** | हैहयस्य मृगयाशीलतायाः वर्णनं विधीयते एके एव श्लोके (श्लोकः१९)। |
| **ग. शैलवर्णनम्** | **सर्गः२** | अत्र शिवाराधनास्थलभूतस्य हिमाद्रेर्वर्णनमुपलभ्यते (श्लोकः१९)। |
| | **सर्गः१०** | सर्गस्यास्य चत्वारिंशत्तमे श्लोके महेन्द्राद्रेरुल्लेखो विद्यते । |
| **घ. सागरादीनां वर्णनम्** | **सर्गः३** | अत्रत्ये प्रथमे श्लोके गङ्गानद्या उल्लेखः प्राप्यते । |
| | **सर्गः४** | दशमे श्लोके रेवानद्याः वर्णना सन्निवेशिता । |
| | **सर्गः१०** | अत्र श्लोकपञ्चके (श्लोकाः ४१-४५) परोक्षतया उपलभ्यते सागरवर्णना । |
| **ङ. सम्भोगवर्णनम्** | **सर्गः३** | अत्रास्ति अङ्गनाभिः सह गन्धर्व्वराजस्य जलविहारवर्णनम् (श्लोकाः १-४)। |
| **च. विप्रलम्भवर्णनम्** | **सर्गः८** | हैहयमुद्दिश्य पौराङ्गनानां विलापेषु विप्रलम्भोऽपि प्रतीयते (श्लोकाः२५-२८)। |
| **छ. मुनेः वर्णनम्** | **सर्गः१** | देवानामुक्तिषु दत्तात्रेयमुनेः (श्लोकः१२), विष्णोरुक्तिषु च जमदग्निमुनेः (श्लोकः३१) उल्लेखो दृश्येते । |
| | **सर्गः२** | इहास्ति आश्रमदहनात् क्रुद्धस्य मुनेरापवस्य वर्णनम् (श्लोकाः१२-१४)। |
| | **सर्गः३** | पुत्रान् प्रति मातृहत्यादेशेन विहितं क्रोधितस्य जमदग्नेर्वर्णनम् (श्लोकाः५-११)। |
| | **सर्गः४** | जमदग्निहैहययोः साक्षात्कारे मुनेर्जमदग्नेः वर्णमुपलभ्यते (श्लोकाः२२-३७)। |
| | **सर्गः९** | परशुरामं प्रायोश्चित्तोपदेशेन विहितं जमदग्निमुनेश्चरित्रवर्णनम् (श्लोकाः१-८)। |

[१] सा.द.(हरिदास.) "सन्ध्या-सूर्य्येन्दु-रजनी-प्रदोष-ध्वान्त-वासराः॥ प्रातर्मध्याह्न-मृगया-शैलर्त्तु-वन-सागराः।
सम्भोग-विप्रलम्भौ च मुनि-स्वर्ग-पुराध्वराः॥ रणप्रयाणोपयम-मन्त्र-पुत्रोदयादयः।॥६/३०२॥" इति, पृष्ठे ४२४

[२] तत्रैव. "पुत्रोदयादयः।..वर्णनीया..॥६/३०२॥" इति, तत्पृष्ठे

[३] तत्रैव. "पुत्रस्य उदय उत्पत्तिः। पुत्रपदमपत्यमात्रोपलक्षणम्। आदिशब्दाद् राजामात्यसेनापतिप्रभृतयश्च ।" इति, पृष्ठे ४२४

| | | | |
|---|---|---|---|
| **ज. पुरवर्णनम्** | | **सर्गः२** | हैहयानां माहिष्मतीति नगर्य्याः वर्णनं वर्णितं जातं केवलं नवमे श्लोके । |
| | | **सर्गः८** | कार्त्तवीर्य्यस्य बधाद् माहिष्मत्याः मलिनरूपवर्णनमुपलभ्यते (श्लोकः२४)। |
| **झ. अध्वरवर्णनम्** | | **सर्गः१०** | इह पृथ्वीजयात्परं परशुरामानुष्ठितस्य यज्ञस्य वर्णनमस्ति (श्लोकः३६)। |
| **ञ. रणवर्णनम्** | | **सर्गः६** | समग्रे सर्गे एव हैहयैः सह परशुरामस्य रणमेव वर्णितम् । |
| | | **सर्गः८** | अत्र भार्गवकार्त्तवीर्य्ययोः युद्धमेव चित्रितम् (श्लोकाः१-२४)। |
| | | **सर्गः१०** | धरायाः निःक्षत्रिकरणवर्णनायां सन्निवेशिता रणस्य वर्णना (श्लोकाः१-२२)। |
| **ट. प्रयाणवर्णनम्** | | **सर्गः२** | अत्रास्ति तपश्चरणाय परशुरामेण हिमालयाभिगमनम्(श्लोकौ१८,१९)। |
| | | **सर्गः४** | मृगयाकाले हैहयेन आश्रमगमनस्य उल्लेखः प्राप्यते अत्रत्ये सर्गे । |
| | | **सर्गः५** | हृतधेनोर्हैहयस्य प्रस्थानम् (श्लोकाः३-६), रामेण रणप्रयाणम् (श्लोकाः१८-२३)। |
| | | **सर्गः७** | कार्त्तवीर्य्येण पुनः रणाभिगमनमेव वर्णितमस्ति (श्लोकाः १-४७)। |
| | | **सर्गः९** | पितुरादेशेन परशुरामेण तीर्थयात्रा एव वर्णिता श्लोकत्रितये (श्लोकाः ६-८)। |
| | | **सर्गः१०** | परशुरामेण महेन्द्रपर्वतगमनम् (श्लोकः४०), समुद्रगमनम् (श्लोकः४१)च । |
| **ठ.पुत्रोद यादीनां वर्णनम्** | **पुत्रोदयः** | **सर्गः१** | अत्रास्ति विष्णोरवतारस्य जमदग्निसुतस्य जन्मवृत्तान्तः (श्लोकौ ३१,३२)। |
| | **नृपवर्णनम्** | **सर्गः१** | सर्गेऽस्मिन् देवैः कार्त्तवीर्य्यस्य प्रतापमेव वर्णितमस्ति (श्लोकाः १२-२७)। |
| | | **सर्गः२** | अत्र श्लोकचतुष्टये (श्लोकाः ६-९) विधीयते हैहयाधिपतेः वर्णना । |
| | | **सर्गः४** | अत्र वर्णितमस्ति हैहयेशस्य चरितं, गुणकीर्त्तनञ्च (श्लोकाः १-१८)। |
| | **आश्रम वर्णनम्** | **सर्गः४** | श्लोकद्वये (श्लोकौ २०, २१ च) जमदग्नेः आश्रमस्य वर्णनं विधीयते । |
| | | **सर्गः२** | मुनेरापवस्य आश्रमदहनेन विहितम् आश्रमवर्णनम् (श्लोकाः १०-१२)। |
| | **तपोवर्णनम्** | **सर्गः२** | अत्रास्ति दिव्यास्त्रलाभाय परशुरामस्य तपोवर्णनम् (श्लोकाः १८-२१)। |
| | | **सर्गः१०** | अत्र सागराद् भूमिं प्राप्य तत्रैव स परशुरामः तपश्चरोऽभूत् (श्लोकौ ४६,४७)। |
| | **वरप्राप्तिः** | **सर्गः१** | अत्रोपलभ्यते दत्तात्रेयात् कार्त्तवीर्य्यस्य सहस्रभुजरूपवरप्राप्तिः (श्लोकः१२) । |
| | | **सर्गः२** | अत्रोपलभ्यते परशुरामेण देवादिदेवाद् वरप्राप्तिः (श्लोकौ २७,२८)। |
| | | **सर्गः३** | मातृबधात् परं पितुः सकाशात् परशुरामेण वरप्राप्तिः (श्लोकाः १९-२४)। |
| | **अभिशापप्राप्तिः** | **सर्गः२** | इह क्रुद्धान्मुनेरापवाद् हैहयेन मृत्योरभिशापप्राप्तिरेव वर्णिता (श्लोकौ१४,१५)। |
| | **मृत्युवर्णनम्** | **सर्गः८** | कार्त्तवीर्य्यार्जुनस्य मृत्योर्वर्णना दृश्यते सर्गस्यास्य (श्लोकौ २२,२३)। |
| | | **सर्गः९** | परशुरामपितुः मुनेर्जमदग्नेः बधो दृश्यते (श्लोकौ १०,११)। |
| | **विलापः** | **सर्गः९** | अत्रास्ति पितृवियोगशोकार्दितस्य परशुरामस्य विलापः (श्लोकाः १२-२४)। |

सारणी २.४ : गौणलक्षणान्वितानि स्थानानि (परशु.च.)

| हैहयविजयम् | | | |
|---|---|---|---|
| **गौणलक्षणानि** | | **गौणलक्षणान्वितानि स्थानानि** | |
| **क. सन्ध्यावर्णनम्** | | **सर्गः८** | अत्रत्ये अन्तिमे श्लोकद्वये विलसति सन्ध्यायाः अतिसंक्षिप्ता वर्णना । |
| **ख. शैलवर्णनम्** | | **सर्गः३** | अत्रास्ति विन्ध्यपर्वतस्य रमणीयं वर्णनम् (१७-२४ श्लोकाः)। |
| **ग. ऋतुवर्णनम्** | | **सर्गः२** | सर्गस्य प्रथमे, द्वितीये च श्लोके दृश्यते ग्रीष्मऋतोः वर्णना। |
| **घ. नदीवर्णनम्** | | **सर्गः२** | सर्गे रेवाविहारवर्णनावसरे नदीवर्णनापि विहिता आंशिकतया । |
| | | **सर्गः३** | अत्रास्ति रावणकृतं रेवायाः सौन्दर्यवर्णनम् (२५ - ३० श्लोकाः)। |
| | | **सर्गः४** | इह विलसति प्रतिकूलाया रेवाया वर्णना (५ - ११ श्लोकाः)। |
| **ङ. सम्भोगवर्णनम्** | | **सर्गः२** | समग्रसर्गे वनिताभिः सह अर्जुनस्य सम्भोगान्विता जलकेलिरेव वर्णिता। |
| | | **सर्गः६** | अत्र केवलमेके श्लोकेऽस्ति हैहयस्य जलविहारवर्णना (श्लोकः१२)। |
| **च. विप्रलम्भवर्णनम्** | | **सर्गः६** | इह हैहयस्य समरगमनदृश्ये अङ्गनानां विरह एव वर्णितः(श्लोकाः२२-२४)। |
| **छ. मुनेः वर्णनम्** | | **सर्गः९** | अत्र हैहयपुलस्त्ययोः संवादे विहितं मुनिवर्णनम् (श्लोकाः१०-३०)। |
| **ज. पुरवर्णनम्** | | **सर्गः९** | अत्र तृतीयश्लोकतः नवमश्लोकं यावद् दृश्यते माहिष्मतीति पुर्या वर्णना । |
| **झ. अध्वरवर्णनम्** | | **सर्गः१** | अत्र केवलमेके श्लोके विहितम् अध्वरवर्णनं यज्ञवर्णनं वेति (श्लोकः९)। |
| **ञ. रणवर्णनम्** | | **सर्गः६** | सर्गादौ एकादशेषु श्लोकेषु (श्लोकाः१-११) दृश्यते नर-रक्षसैन्ययोर्युद्धम् । |
| | | **सर्गः७** | अत्र दृश्यते राक्षससैन्यैः सह हैहयस्य समरवर्णनम् (श्लोकाः५-२१)। |
| | | **सर्गः८** | अत्रास्ति सानुचरेण लङ्केशेन सह सहस्रबाहोर्युद्धम् (श्लोकाः१-२६, २९-३६)। |
| **ट. प्रयाणवर्णनम्** | | **सर्गः३** | इह हैहयमुद्दिश्य लङ्केशस्य रणप्रयाणं दृश्यते (श्लोकाः१४-२५)। |
| | | **सर्गः५** | इह रेवायां हैहयं प्राप्य तमुद्दिश्य रावणस्य रणप्रयाणं दृश्यते (श्लोकौ ७,८)। |
| | | **सर्गौ ६, ७** | अत्रत्ये सर्गद्वये विद्यते राक्षसान् प्रति हैहयस्य रणप्रयाणम् (६/२४-७/४)। |
| **ठ.पुत्रादीनां वर्णनम्** | **नृपवर्णनम्** | **सर्गः१** | समग्रे सर्गे चरिताख्यानवर्णनेन विहिता हैहयाधिपतेः कार्त्तवीर्यस्य वर्णना । |
| | | **सर्गः३** | अत्रादौ विद्यते लङ्काधिपतेः रावणस्य चरितवर्णनम् (श्लोकाः१-१६)। |
| | | **सर्गः४** | अत्रत्ये अन्तिमे श्लोकचतुष्टये हैहयाधिपतेः रूपवर्णनमुपलभ्यते। |
| | **सेनापतिः** | **सर्गः७** | इह हैहयप्रहस्तयोः समरे विहितं सेनापतेः वर्णनम् (श्लोकाः११-१६)। |
| | **मन्त्रीवर्णनम्** | **सर्गौ ४,५** | सर्गद्वये विद्यते रावणामात्यैः शुकसारणैः सह हैहयामात्यानां वर्णनम् । |
| | **स्नानादयः** | **सर्गः४** | अत्रास्ति लङ्केशस्य स्नान-शिवपूजनादीनां वर्णनम् (श्लोकाः१-४)। |

सारणी २.५ : गौणलक्षणान्वितानि स्थानानि (हैहय.वि.)

| पाण्डवविजयम् | | | |
|---|---|---|---|
| **गौणलक्षणानि** | | **गौणलक्षणान्वितानि स्थानानि** | |
| **क. सन्ध्यावर्णनम्** | | **सर्गः५** | सर्गेऽस्मिन्नस्ति श्लोकषट्कात्मकं सन्ध्यावर्णनम् (श्लोकाः ६३-६८)। |
| **ख. रजनीवर्णनम्** | | **सर्गः१०** | सौप्तिकमित्याख्ये सर्गे प्रथमे श्लोकद्वये (१, २ च) एवास्ति रजन्या वर्णना । |
| **ग. प्रभातवर्णनम्** | | **सर्गः११** | सर्गेऽस्मिन् श्लोकचतुष्टये दृश्यते प्रातःकालस्य वर्णना (श्लोकाः १-४)। |
| **घ. ह्रदवर्णनम्** | | **सर्गः८,९** | दुर्योधनेन ह्रदप्रवेशवर्णने विद्यते द्वैपायनह्रदस्य वर्णनम् (श्लोकाः४-११)। |
| **ङ. मुनेः वर्णनम्** | | **सर्गः१२** | अत्रास्ति द्विव्यास्त्रप्रशमनायागतस्य मुनेः कृष्णद्वैपायनस्य वर्णना (श्लोकाः १-८)। |
| **च. पुरवर्णनम्** | | **सर्गः३** | युद्धभिया भीतस्य हस्तिनापुरस्य वर्णना (श्लोकाः ४-१२)। |
| **छ. रणवर्णनम्** | | **सर्गः८** | कुरुक्षेत्रयुद्धमिति नाम्नैव बुध्यते यदत्र महाभारतीयं महारणमेव चित्रितम्। |
| | | **सर्गः९** | समग्रेऽस्मिन् सर्गे भीम-दुर्योधनयोर्गदायुद्धमेव वर्णितमस्ति । |
| | | **सर्गः११** | अत्र तपोवने भीमार्जुनेन सह द्रौणेः रणमेव वर्णितमस्ति (श्लोकाः२०-३३)। |
| **ज. प्रयाणवर्णनम्** | | **सर्गः२** | अत्रान्तिमे श्लोके हस्तिनापुरप्रयाणवर्णनस्य सूचनमेव जातमिति । |
| | | **सर्गः३** | अत्रादौ श्रीहरेः हस्तिनापुराभिगमनमेव वर्णितमस्ति (१-४ श्लोकाः)। |
| | | **सर्गः६** | सर्गान्ते विद्यते हस्तिनापुरतः शौरेः प्रत्यावर्तनवर्णनम् (७९-८३ श्लोकाः)। |
| **झ. मन्त्रवर्णनम्** | | **सर्गः१** | अत्र युधिष्ठिरोक्तिषु दौत्यस्य मन्त्रणे सामदण्डयोर्मन्त्रणमप्यस्ति (१४-१९ श्लोकाः)। |
| | | **सर्गः६** | कर्णमुपजापाय कुन्त्या सह कृष्णस्य भेदमन्त्रणमेव दृश्यते (श्लोकौ ४४, ४५)। |
| **ञ.पुत्रोदयादीनां वर्णनम्** | **पुत्रोदयः** | **सर्गः१२** | अत्रास्ति अभिमन्युसुतस्य भाविजन्मवृत्तान्तकथनम् (श्लोकाः ११-१५)। |
| | **सेनापतेः वर्णना** | **सर्गः७** | इह श्लोकेन विहिता पाण्डवसेनापतेः सहजकवचस्य धृष्टद्युम्नस्य वर्णना । |
| | | **सर्गः८** | इह तु कुरुक्षेत्रसमरवर्णने वर्णिता कुरुसेनापतीनां भीष्मद्रोणकर्णशल्यानां वर्णना । |
| | **मृत्यु-वर्णनम्** | **सर्गः८** | कुरुक्षेत्ररणवर्णनेन भीष्माभिमन्युद्रोणकर्णशल्यादीनां कौरववीराणां मृत्युवर्णनम् । |
| | | **सर्गः१०** | अत्र विहिता पाञ्चाल-द्रौपदेयानां तथा दुर्योधनस्य मृत्युवरणवर्णना । |
| | **विलाप-वर्णनम्** | **सर्गः४** | कुन्तीविलाप एव वर्णितो विंशत्यधिकेषु श्लोकेषु (श्लोकाः १-२६)। |
| | | **सर्गः९** | भग्नसक्थं दुर्योधनमवाप्य कृपकृतवर्माश्वत्थामादीनां विलापः (श्लोकाः ३५-४२)। |
| | | **सर्गः११** | दिवं गतान् स्वपुत्रबान्धवानवलोक्य द्रौपद्याः विलापः (श्लोकाः १०-१४)। |
| | **दौत्य-वर्णनम्** | **सर्गः१,५** | आदावस्ति युधिष्ठिरेण दूतविनियोगः, अथास्ति दूतभूतस्य माधवस्य दौत्यमिति । |
| | | **सर्गः७** | शकुनिसुतस्य उलूकस्य दौत्यं दृश्यते अत्रत्ये सर्गे (श्लोकाः १-९)। |

सारणी २.६ : गौणलक्षणान्वितानि स्थानानि (पा.वि.)

# महाकाव्य-त्रितयेषु अपराणि वैशिष्ट्यानि

## स्त्रीचरित्राणि

हेमचन्द्ररायकविभूषणेन प्रणीतेषु आलोच्येषु महाकाव्यत्रितयेषु नायिका इति चरित्रम् अस्ति केवलं पाण्डवविजये महाकाव्ये ; यतः तत्र पाण्डवाः एव नायकाः अतः स्वाभाविकतया पाण्डवजाया द्रौपदी एव नायिकारूपेण विभाति तत्र, पुनः द्रौपदीं विहाय अप्रधाननारीचरित्ररूपेण दृश्येते पाण्डवमाता कुन्ती, अभिमन्युभार्या उत्तरा च । पाण्डवविजयं विहाय अवशिष्टे महाकाव्यद्वये केवलं परशुरामचरिते एव नारीचरित्रस्य अवस्थानं दृश्यते गौणरूपेण ; अत्र परशुरामस्य मातुः रेणुकायाः तथा प्रतिनायकस्य कार्त्तवीर्य्यार्ज्जुनस्य महिष्याः उपस्थितिर्दृश्यते नारीचरित्ररूपेण । प्रसङ्गतः उल्लेख्यं यद्, हेमचन्द्रेण प्रणीतेषु महाकाव्येषु केवलं हैहयविजयमेव स्त्रीचरित्रविवर्जितं महाकाव्यमिति वक्तुं शक्यते यतः अत्रत्ये द्वितीये, चतुर्थे, षष्ठे, अष्टमे च सर्गे कार्त्तवीर्य्यस्य अङ्गनानामुल्लेखे नारीचरित्रस्य अस्तित्वं गौणत्वेन प्रतिपद्यते । अतो हैहयविजयं व्यतिरिच्य शेषस्य महाकाव्यद्वितयस्य नारीचरित्राणां विषये अधस्तादालोच्यते -

### *परशुरामचरितम्*

अत्र रेणुका इति चरित्रस्य नाममात्रेण उल्लेखो दृश्यते महाकाव्यस्यास्य प्रथमे सर्गे अन्ते भागे परसुरामस्य आविर्भाववर्णने (श्लोकः३१)। अथ तृतीये सर्गे सुराङ्गनाभिः सह गङ्गायां गन्धर्व्वराजस्य जलविहारवर्णनप्रसङ्गे अनन्यधिया रेणुकया जलविहारदर्शनं वर्णितमस्ति, अनेन प्रकाशिताः तस्याः मुनिपत्नेः कुतूहलप्रियता, अन्यमनस्कता च । पुनः अस्मिन्नेव सर्गे दृश्यते यद्, जलानयने भार्यायाः विलम्बं दृष्ट्वा मुनिः जमदग्निः क्रुद्धोऽभूत् । क्रुद्धः स स्वसुतान् रामाग्रजान् आकार्य्य मातुः मुर्द्धानं छेत्तुम् आदिदेश । परन्तु पापमिति निर्णीय तेषु कोऽपि न चकार मातृहत्याम् । एतेन ते जमदग्निना अभिशप्ताः जाताः। अथ परशुराम एव पितुरादेशमनुसृत्य चकार मातृहत्याम् - इत्यस्मिन् वृत्तान्ते रेणुकाया स्वपक्षसमर्थनं यथा नास्ति तथैव नास्ति तस्याः कापि उक्तिः, एतेन परोक्षत्वेन तस्याः सहनशीलता पतिभक्तिश्च उपेति नयनपथमस्माकमिति । रेणुकायाः पतिभक्तेः पुनर्निदर्शनं दृश्यते नवमे सर्गे पतिना सह सहमरणे (श्लोकः २६)। अथ परशुरामस्य मातुः रेणुकायाः चरित्रे क्रोध-कातरता-दृढतादीनां गुणानां परिस्फुरणं दृश्यते पञ्चमे सर्गे, अत्र स्वसुतस्य परशुरामस्य सकाशे वने कृतस्य हैहयपीडनस्य वर्णनावसरे आश्रमस्य दुर्द्दशावर्णने प्रकाशिता मातुः कातरता -

> “किमुच्यते वत्स तपोधनोऽप्यसौ कृतावमानः कृतवीर्य्यसूनुना ।
> विमर्द्दचिह्नैरनपह्नुताक्षरां वनस्पतिश्रेणीरनक्ति दुर्द्दशाम् ॥५/१२॥
> असावहार्षीदबलां बलान्वितो मदेन धेनुं मुनिहोमसाधनीम् ।
> नखक्षतेनापि नखण्डितास्त्वया पदावधीदाश्रमपादपश्रियः ॥५/१३॥”[१] इति।

---

[१] परशु.च.(प्र.सं.) पृष्ठे ३८

ततः परं हैहयेन जमदग्नेः उपहासवर्णने, आपवाश्रमदहनस्य स्मारणे, परशुरामं प्रति हैहयनिग्रस्य आदेशदाने तस्याः दृढतामर्षयोः प्रतिफलनमेव दृश्यते । अधुना रेणुकायाः उक्तिषु केवलं द्वयमेव उद्ध्रियते उदाहरणतया -

"न तं निरोद्धुं तव विद्यते बलं जटाधरस्त्वन्त्वटवीषु पर्य्यटः।
इतीव जानन्नुपहस्य ते गुरुं गतोऽधुनापि प्रधनं न गच्छति ॥५/१४॥
गुरोर्महर्षेमम चावमाननं त्वमेव पुत्र प्रतिकर्तुमर्हसि।
गृहाण शस्त्रं निगृहाण हैहयं गृहीतधेनुं जनकस्य दस्युवत् ॥५/१७॥"[१] इति।

महकाव्येऽस्मिन् द्वितीयं नारीचरित्रमेव प्रतिनायकस्य हैहयस्य महिषी । तस्याः उपस्थितिर्दृश्यते केवलं पुनर्युद्धोपक्रमः इत्याख्ये सप्तमे सर्गे । सर्गेऽस्मिन् दृश्यते यत्, परशुरामेण पुनर्युद्धाय त्वरमाणस्य हैहयस्य रथस्याग्रे तस्य महिषी सहसैव उपस्थिता जाता, एतेन तस्याः साहसिकता, दृढता च दृश्येते । पुनः सर्गेऽस्मिन् श्लोकद्वये दृश्यते तस्याः महिष्याः रूपवर्णनम्, तस्मिन् वर्णने हैहयस्य पुनर्युद्धोपक्रमे तस्याः चिन्ता, अस्थिरता च यथा चित्रिता तथैव चित्रितमस्ति तस्याः रूपसौन्दर्य्यमपि -

"अव्याहतगता भर्त्तृव्यसनव्यग्रमानसा ।
अन्तःपुरवहिर्भूता राजलक्ष्मीरिवास्थिरा ॥७/१०॥
सम्भ्रमेणोपसर्पन्ती विपर्य्यासकुलकुन्तला ।
कान्तालोकनलोलाक्षी जातवक्षोजकम्पना ॥७/११॥"[२] इति।

अथ दृश्यते राजानं हैहयं प्रति तस्याः उपदेशदानं सप्तदशेषु श्लोकेषु (श्लोकाः१३-२९)। अस्योपदेशस्य प्रारम्भे एव दृश्यते यदासीत् सा महिषी अवगता हैहयकृतापराधविषये । परन्तु तया न विहिता पत्युरवमानना सारथेः सम्मुखे, तस्याः उक्तिषु पतिं प्रति यथानुरागो दृश्यते तथैव विनयोऽपि दृश्यते -

"स भवान् मूर्च्छितो युद्धादानीतश्च पुरान्तिकम् ।
इति श्रुत्वैव राजेन्द्र त्वामुपेतास्मि सत्वरम् ॥७/१४॥
नैव जन्यात् क्षमं भर्त्तुः क्षत्रियाण्या निवर्त्तनम् ।
जाने समुचितं सत्या न पत्युर्दोषदर्शनम् ॥७/१५॥
तथापि क्षम्यतां नाथ दुर्द्दिने समुपस्थिते ।
यद्यहं दृष्टदोषाद्य प्रार्थये ते निवर्त्तनम् ॥७/१६॥"[३] इति।

---

[१] परशु.च.(प्र.सं.) पृष्ठे ३८, ३९ च

[२] तत्रैव. पृष्ठे ४९

[३] तत्रैव. पृष्ठे ४९

ततः परं पतिं प्रति उपायचतुष्टयस्य स्वरूपकथने तथा तेषु सामदानभेदानाम् उपायत्रयाणां प्रशस्ततताकथने, तथा "दत्तात्रेयवरादस्मि न जेय.. ॥७/२७॥"[१] इति मत्ततां विहाय परशुरामेण सह सन्धिस्थापनस्योपदेशे, मुनेरापवस्य अभिशापस्मारणे च तस्याः नीतिज्ञानस्य परिचयो यथा प्राप्यते तथैव बुध्यते यदासीत् सा प्रत्युत्पन्नमतिसम्पन्ना । एतान् विहाय सर्गेऽस्मिन् दृश्यते यत् स्वामिनं वारयितुमसमर्था दुःखिता सा पत्युरासन्ननिपातमनुभूय पत्युः पूर्वमेव दिवं गमनाय उद्यता जाता, एतेन तस्याः पतिभक्तिः, अनुरागः, नैराश्यं च प्रकाशिताः। एवमेव स्वल्पे परिसरे रेणुकायाः, हैहयस्य महिष्याश्च चरित्रगतं वैचित्र्यं विधृतमस्ति कविना हेमचन्द्रेण ।

## *पाण्डवविजयम्*

पाण्डवविजये महाकाव्ये सन्निवेशिते गौणभूते नारीचरित्रद्वये आदौ आयाति पाण्डवजननी कुन्ती । पृथायाः उपस्थितिर्दृश्यते तृतीयसर्गस्य उपान्तीमे श्लोके कृष्णेन सह तस्याः कथोपकतनस्योल्लेखे । ततः परं समग्रे चतुर्थे सर्गे चतुर्थे सर्गे तथा पञ्चमसर्गस्य अंशविशेषे कर्णस्य उपजापकाले माधवेन सह कर्णजनन्याः कुन्त्याः उपस्थितिर्दृश्यते सम्यक्तया । एतेषु केवलं चतुर्थे सर्गे एव कुन्त्याः चारित्रिकवैशिष्ट्यानि उपस्थापितानि । अत्र माधवेन सह तस्याः वार्त्तालापे पुत्रान् प्रति तथा द्रौपदीं प्रति तस्याः वात्सल्यं यथा दृश्यते तथैव तेषां वनवासक्लेशं विचिन्त्य तस्याः विलापोऽपि नयनपथमुपैति, तदुदाहणं यथा -

"दशाविपर्य्यासमथानुभूय द्विषत्प्रयुक्तां निकृतिञ्च बाला ।
सा मन्युनान्तः परितप्यमाना कथं वत क्षेमवती बधूर्मे ॥४/३॥
पराक्रमाक्रान्तनरेन्द्रचक्राः प्रशासितारो भुवनस्य पूर्व्वम् ।
वनेचरास्ते सुखिनः कथं वा चिरानुभूतव्यसनाः सुता मे ॥४/५॥"[२] इति।

सर्गेऽस्मिन् विलापकाले तस्याः क्रोधस्य प्रकाशोऽपि दृश्यते पाण्डवानां सन्धिप्रचेष्टादर्शने, तस्योदाहरणं यथा –

"सामार्थमर्थित्वमथो गतन्त्वां पृच्छामि – तेऽसौ प्रथितजसोऽपि ।
हा हन्त विस्मृत्य बधूनिकारं पार्थाः कथं शान्तिमुशन्ति शत्रौ ॥४/२४॥
भैक्ष्येण लभ्या यदि नाम लक्ष्मीर्न भैक्ष्यमर्हन्ति हि राजपुत्राः।
धर्म्मात्मजस्यापि रुचिः स्वधर्मे न लक्ष्यते – दुःखमतःपरं किम् ॥४/२६॥"[३] इति।

---

[१] परशु.च.(प्र.सं.) पृष्ठे ५०

[२] पा.वि.(द्वि.सं.) पृष्ठे ३०, ३१ च

[३] तत्रैव. पृष्ठे ३४, ३५ च

कुन्तीं व्यतिरिच्य महाकाव्यस्यास्य अपरं गौणं चरित्रमेव अभिमन्युभर्ष्या उत्तरा अस्याः उपस्थितिः दृश्यते केवलं एकादशे संख्यके सर्गे । सर्गेऽस्मिन् श्रीहरिसकाशे नववैधव्यप्राप्तायाः तस्याः विलापस्य अतीव करुणं चित्रमेव चित्रितमस्ति एके एव श्लोके –

"ततः प्रपेदे हरिमुत्तरा न निर्वृतिं यामि विनाभिमन्युना ।
क्व मे प्रियोऽसाविति पृच्छती मुहुर्विदायन्ती हृदयानि श्रृण्वताम् ॥११/४०॥"[१] इति।

महाकाव्यस्यास्य नायिका पाण्डवकुलबधूः द्रौपदी । नायिका त्रिधा, यथा – स्वीया, अन्या, साधारणीस्त्री ; निगदितं च दशरूपके - "स्वान्या साधारणस्त्री तद्गुणा नायिका त्रिधा।..॥२/१५॥"[२] इति। कुलबधूरिति पदमलंकृतत्वात् सा स्वीया इति नायिकारूपेण गण्यते ; द्रौपदी परिपूर्णयौवना, पञ्चपुत्राणां जननी च अतः सा 'स्वीयामध्या' इति नायिकापदवीमेति, तल्लक्षणं निगदितं धनञ्जयेन "मध्योद्यद्यौवनानङ्गा मोहान्तसुरतक्षमा ॥२/१६॥"[३] इति। मध्यानायिका कोपप्रकाशकाले त्रिधा विभज्यन्ते यथा - मध्याधीरा, मध्याधीराधीरा, मध्याऽधीरा चेति। पाण्डवविजयस्य द्वितीये द्वादशे च सर्गे द्रौपद्याः अश्रुपूर्णविलापैः सह क्रोधोक्तयोऽपि दृश्यन्ते, अतः सा अत्र विराजते 'धीराधीरा' इति स्वीयामध्यानायिकारूपेणैव, 'धीराधीरा'याः लक्षणप्रसङ्गे धनिकेन निगदितम् - "धीराधीरा साश्रु सोत्प्रासवक्रोक्त्या खेदयेत्"[४] इति।

## नानावृत्तमयत्वम्

आलंकारिकसम्मतदिशा विविधवृत्तमयः कश्चन सर्गः महाकाव्ये स्थातुं शक्नोति, विषयेऽस्मिन् विश्वनाथस्य मतमेव प्रमाणत्वेन ग्रहितुं शक्यते "नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते॥६/३०२॥"[५] इति । परन्तु आलोच्ये महाकाव्यत्रितये एकाधिकेषु सर्गेषु नानावृत्तमयत्वं दरीदृश्यते । यथा –

**परशुरामचरिते**

अत्रत्ये प्रथमे, द्वितीये, तृतीये, षष्ठे, अष्टमे च सर्गपञ्चके दरीदृश्यते नानावृत्तमयत्वम्, यथा –

- प्रथमसर्गः > वंशस्थविलम् (श्लोकाः १-९), मन्दाक्रान्ता (श्लोकाः १०-२७), द्रुतविलम्बितम् (श्लोकाः २८,२९), उपजातिः (श्लोकाः ३०-३२), मालिनी (श्लोकः ३३)।

---

[१] पा.वि.(द्वि.सं.) पृष्ठे १०८

[२] दश.रू.(वेङ्कट.) पृष्ठे ९१

[३] तत्रैव. पृष्ठे ९२

[४] तत्रैव. पृष्ठे ९६

[५] सा.द.(हरिदास.) पृष्ठे ४२४

- द्वितीयसर्गः > उपजातिः (श्लोकाः १-१०, १२, १३, १५-१७, २२, २३, २५, २६, २९-३६), उपेन्द्रवज्रा (श्लोकाः११,२०,२१,२४,२८), इन्द्रवज्रा (श्लोकाः१४,१८,१९,२७), द्रुतविलम्बितम् (श्लोकः ३७), शिखरिणी (श्लोकः ३८)।
- तृतीयसर्गः > उपजातिः (श्लोकाः१-५, ७-११, १३-१५, १७-२१, २३-२५), इन्द्रवज्रा (श्लोकः६), उपेन्द्रवज्रा (श्लोकाः १२, १६, २२), वंशस्थविलम् (श्लोकः२६), प्रमिताक्षरा (श्लोकः २७)।
- षष्ठसर्गः > उपजातिः (श्लोकाः १-९, ११-१३, १५-१८, २०-३०), उपेन्द्रवज्रा (श्लोकाः १०, १९), इन्द्रवज्रा (श्लोकः १४), मालिनी (श्लोकः ३१), प्रहर्षिणी (श्लोकः ३२)।
- अष्टमसर्गः > रथोद्धता (श्लोकाः १-२०), उपजातिः (२१-२४), (श्लोकः२६), वसन्ततिलकम् (श्लोकाः २७,२८), शार्दूलविक्रीडितम् (श्लोकाः २५, २९)।

**हैहयविजये**

अत्रत्ये तृतीये, षष्ठे, सप्तमे च सर्गे नानावृत्तमयत्वं नयनपथमुपैति । यथा –

- तृतीयसर्गः > उपजातिः (श्लोकाः १,६,७,८,९) ; उपेन्द्रवज्रा (श्लोकाः २,३,४,५) ; वंशस्थविलम् (श्लोकः १०) ; औपच्छन्दसिकम् (श्लोकः ११) ; स्वागता (श्लोकः १२) ; सुन्दरी (श्लोकः १३,१४) ; वसन्ततिलकम् (श्लोकाः १५,१६) ; द्रुतविलम्बितम् (श्लोकाः १७-१९) ; इन्द्रवज्रा (श्लोकः २०) ; वसन्ततिलकम् (श्लोकाः २१, २२) ; मन्दाक्रान्ता (श्लोकः २३) ; अपरवक्त्रम् (श्लोकः २४) ; रथोद्धता (श्लोकः २५) ; तूणकम् (श्लोकः २६) ; मञ्जुभाषिणी (श्लोकः २७) ; शार्दूलविक्रीडितम् (श्लोकः २८)।
- षष्ठसर्गः > वंशस्थविलम् (श्लोकाः १-८) ; उपेन्द्रवज्रा (श्लोकाः ९-१३,१५,१८,२०,२२) ; उपजातिः (श्लोकाः १४,१७,१९,२१) ; इन्द्रवज्रा (श्लोकः १६) ; सुन्दरी (श्लोकः २३) ; प्रहर्षिणी (श्लोकः २४)।
- सप्तमसर्गः > उपजातिः (श्लोकाः १-७, ९-१२,१४,१७,१८) ; प्रहर्षिणी (श्लोकः १९) ; मन्दाक्रान्ता (श्लोकः२०) ; इन्द्रवज्रा (श्लोकाः १३,१६) ; उपेन्द्रवज्रा (श्लोकाः ८,१५) ; हरिणी (श्लोकः २१)।

**पाण्डवविजये**

महाकाव्यस्यास्य ४र्थे, ५मे, ७मे, ८मे च सर्गत्रितये तथा १०मसर्गतः १२शसर्गं यावत् प्रत्येकसर्गे नानावृत्तमयत्वमिति वैशिष्ट्यमुपलभ्यते । यथा -

- **चतुर्थसर्गः >** उपेन्द्रवज्रा (१-३०श्लोकाः), सुन्दरी (३१श्लोकः), वसन्ततिलकम् (३२श्लोकः), मालिनी (३३श्लोकः)।

- **पञ्चमसर्गः** > अनुष्टुभ् (१-६२श्लोकाः), सुन्दरी (६३,६८,६९श्लोकाः), पुष्पिताग्रा (६४,६५श्लोकाः), मालिनी (६६श्लोकः), द्रुतविलम्वितम् (६७श्लोकः)।
- **सप्तमसर्गः** > उपेन्द्रवज्रा (१-३१श्लोकाः), स्रग्धरा (३२,३३,३४ श्लोकाः), शिखरिणी (३५,३६,३७ श्लोकाः), इन्द्रवज्रा (३८,३९ श्लोकौ), मालिनी (४०श्लोकः)।
- **अष्टमसर्गः** > अनुष्टुभ् (१-९७श्लोकाः), वंशस्थविलम् (९८ श्लोकः), सुन्दरी (९९-१०३श्लोकाः), वसन्ततिलकम् (१०४ श्लोकः)।
- **दशमसर्गः** > वसन्ततिलकम् (१-१४ श्लोकाः), शालिनी (श्लोकाः १५-१७, २४), प्रहर्षिणी (१८ श्लोकः), शार्दूलविक्रीडितम् (१९ श्लोकः), शिखरिणी (२०-२२ श्लोकाः), मालभारिणी (२३,३४ च श्लोकौ), द्रुतविलम्बितम् (२५ श्लोकः), मालिनी (२६ श्लोकः), मन्दाक्रान्ता (२७-२९ श्लोकाः), स्वागता (३० श्लोकः), सुन्दरी (३१-३२ श्लोकाः), भूजङ्गप्रयातम् (३३ श्लोकः) ।
- **एकादशसर्गः** > वंशस्थविलम् (१-२५श्लोकाः), इन्द्रवज्रा (२६-२९श्लोकाः), मत्ता (३०श्लोकः), भूजङ्गप्रयातम् (३१श्लोकः), शालिनी (३२श्लोकः), मालिनी (३३ श्लोकः)।
- **द्वादशसर्गः** > उपेन्द्रवज्रा, उपजातिश्च (१-३९श्लोकाः); वंशस्थविलम् (४०,४२,४३,४८,४९ श्लोकाः); शार्दूलविक्रीडितम् (४४श्लोकः); उपेन्द्रवज्रा (४५-४७श्लोकाः); मालभारिणी (४१श्लोकः); मालिनी (५०श्लोकः) ; उपजातिः (५१श्लोकः); रुचिरा (५२श्लोकः)।

प्रसङ्गत उल्लेख्यं यद्, हेमचन्द्रस्य काव्यकृतिषु प्रायः सर्वत्रैवोपलभ्यते 'सुन्दरी', 'पुष्पिताग्रा' चेति अर्धसमवृत्तद्वयम् । पुनः कानिचन अप्रसिद्धानि वृत्तानि अपि विराजन्ते यथा - 'औपच्छन्दसिकम्', 'अपरवक्रम्', 'तूणकम्', 'मञ्जुभाषिणी', 'मालभारिणी', 'मत्ता', 'स्वागता', 'प्रमिताक्षरा' चेति ।

## रससम्बन्धिनी स्वकीयता

रसविषये हेमचन्द्रस्य प्रायः सर्व्वेषु काव्यकृतिषु आलंकारशास्त्रविहितो विधान एवानुसृयते । केवलं पाण्डवविजयमिति महाकाव्यस्य रसविषये कविनामुना उच्यते - "वीरकरुणरसप्रधानं महाकाव्यम्"[१] इति । हेमचन्द्रस्य उक्तिरियन्तु विश्वनाथस्य रसविषयकनियमं लङ्घयति । यतः साहित्यदर्पणानुसारेण वीरशृङ्गारशान्तादिषु एक एव महाकाव्यस्य अङ्गिरसो भविष्यति, अत्र तु वीरः, करुणश्चेति रसद्वयमेव अङ्गिरूपेण उपस्थाप्यते कविनामुना । यद्यपि महाकाव्यमिदं रसविधानविषये साहित्यदर्पणमतिक्रामति तथापि मे मतानुसारेण न लङ्घयति सर्वान् अलङ्कारशास्त्रान् । यतो दण्डिनः काव्यादर्शे, भामहस्य काव्यालंकारे च एक एव रसः अङ्गिरसो भवेद् इति महाकाव्यस्य विषये नोपलभ्यते इत्येतादृशविधानं, वक्तव्यस्यास्य याथार्थ्यं प्रतिपादनाय तयोर्वक्तव्यानि अनुसन्धेयानि ; यथा काव्यादर्शे –

---

[१] पा.वि.(द्वि.सं.)पृष्ठे १

"अलंकृतमसंक्षिप्तं रसभावनिरन्तरम् ।
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुगन्धिभिः ॥१/१८"[१] इति।

भामहस्य काव्यालंकारेऽपि भणितम् - "युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक् ॥२१"[२] चेति । अतो महाकाव्ये रसद्वयस्य अङ्गित्वस्वीकारे न किमपि हानिर्दृश्यते मया । वस्तुतस्तु प्रायशः महाकाव्येषु विश्वनाथस्य मतानुसरणमेव भूयो दृश्यते । अत एतेन महाकाव्यमिदं 'पाण्डवविजयम्' रसविषये सनातनमार्गात् पृथक्त्वं धत्ते ।

## अलंकाराः

कवेरस्य महाकाव्येषु प्रायः अर्थान्तरन्यासालंकारस्य भुयः प्रयोगो दरीदृश्यते । अतस्तेभ्यः अर्थान्तरन्यासालंकारेण समुपन्यस्तानि कतिपयपद्यानि परं मनोज्ञानि इत्यत्र उद्ध्रियन्ते उदाहरणत्वेन, यथा –

**परशुरामचरिते –**

शमव्रते ब्रह्मकुलेऽपि जातो लेभे धनुर्व्वेदमसौ विशिष्य ।
देहान्तरेऽपि स्फुरतीह पुंसां क्रिया हि संस्कारवशान्न वंशात् ॥२/४॥[३],

**हैहयविजये –**

दर्पान्ध एव यतते दशकन्धरश्चेदस्मानतीत्य नृपतिं सहसाभियातुम् ।
बाधामहे प्रतिपदं वयमायुधैस्तं वीरप्रिया न हि पुनः सुलभा जयश्रीः ॥५/२८॥[४],

**पाण्डवविजये –**

"कीर्तिर्लोके ध्रुवा लक्ष्मीरकीर्तिर्हि दरिद्रता ।
कीर्तिरेका स्थिरा ज्योत्स्ना तमिस्रं तद्विपर्ययः ॥६/७१॥"[५] चेति ।

---

[१] काव्याद.(पाठक.) पृष्ठे २४

[२] काव्यालं.(शर्मा.)पृष्ठे ४८

[३] परशु.च.(प्र.सं.) पृष्ठे १४

[४] हैहय.वि.(प्र.सं.) पृष्ठे ३८

[५] पा.वि.(द्वि.सं.) पृष्ठे ५२

## नायकसहायकाः

नायकस्य कर्त्तव्यकार्य्येषु ये सहायभूताः भवन्ति ते एव नायकसहायकाः। सहायास्तु विविधाः, यथा – 'शृङ्गारसहायाः', 'अर्थसिद्धेः सहायाः', 'धर्मसहायाः', 'दण्डसहायाः', 'अन्तःपुरसहाया'श्च । भेदानेतान् अनुसृत्याधुना हेमचन्द्रप्रणीतस्य महाकाव्यत्रयस्य नायकसहाया निरूप्यन्ते ।

तत्रत्ये परशुरामचरिते पिता जमदग्निरेव नायकस्य परशुरामस्य शिष्यधर्मपालने, मुनिधर्मपालने च सहायरूपेण चित्रितो जातः ; हैहयविजये कार्त्तवीर्य्यस्य अमात्यमुख्याः तस्य अर्थसिद्धेस्तथा दण्डस्य सहायरूपेण चित्रिताः, राज्ञो हितचिन्तनत्वात्तथा तस्य रक्षणाय रक्षोभिः सह समरे नृपेण विना अंशग्रहणत्वाच्च ; पाण्डवविजये श्रीकृष्णो नायकानां पाण्डवानां अर्थसिद्धेः सहायभूतेन मन्त्रिरूपेण, दण्डसहायभूतेन सुहृद्रूपेण च अवतिष्ठते । सहायानां विषये निगदितञ्च दशरूपके –

"अथ नेतुः कार्यान्तरसहायानाह –

मन्त्री स्वं वोभयं वापि सखा तस्यार्थचिन्तने ॥२/४२॥

धर्मसहायास्तु –

ऋत्विक्पुरोहितौ धर्मे तपस्विब्रह्मवादिनः ॥२/४३॥

दुष्टदमनं दण्डः । तत्सहायस्तु –

सुहृत्कुमाराटविका दण्डे सामन्तसैनिकाः।..॥२/४४॥"[१] इति ।

पुनः सहायका उत्तमाधममध्यमभेदेन त्रिविधाः। हेमचन्द्रस्य महाकाव्यत्रये चित्रिताः सहायकास्तु सर्व्वे उत्तमाः, यत उत्तमश्रेण्याः सहायकविषये विश्वनाथेनोक्तम् - "उत्तमाः पीठमर्द्दाद्याः॥३/५६॥"[२] इत्यत्र 'आद्याः' इति पदेन मन्त्रिपुरोहितादयोऽपि बुध्यन्ते, तदुक्तं साहित्यदर्पणे - "आद्याशब्दान्मन्त्रिपुरोहितादयः"[३]। इत्यत्र 'मन्त्री'ति पदेन हैहयविजयस्य अमात्यमुख्यानां उत्तमसहायकत्वमेव प्रतिपद्यते । पुनः विटविदूषकशकारचेटादयो मध्यमाधमश्रेण्यामापतन्ति ; परन्तु एषु नान्तर्भावो दृश्यते सुहृदिति दण्डसहायकस्य, तपस्वीति धर्मसहायकस्य च । एतेन जमदग्निः, अमात्यमुख्याः, श्रीकृष्णश्चेत्यादीनां चरित्राणाम् उत्तमसहायकत्वं सिद्धमिति ।

---

[१] दश.रू.(वेङ्कट.) पृष्ठे १२१

[२] सा.द.(हरिदास.) पृष्ठे १०१

[३] तत्रैव.

## प्रतिनायकाः

अत्रत्ये आलोच्यभूते महाकाव्यत्रये सहृदयानां सकाशे नायकानां चरितोत्कर्षप्रतिपादनाय कविनामुना विधीयते प्रतिनायकानामतीव प्राधान्यान्वितं मनोज्ञं वर्णनम् । प्रसङ्गेऽस्मिन् उदाहरणं यथा – दशसर्गात्मके परशुरामचरिते प्रथमे सर्गे नाकसदानां वचनेषु, द्वितीये सर्गे कार्त्तवीर्य्यस्य शापलाभवर्णनप्रसङ्गे, चतुर्थे सर्गे आदिभूतेषु श्लोकेषु प्रतिनायकभूतस्य हैहयाधिपतेर्वर्णनमुपलभ्यते ; पुनः पञ्चमसर्गादारभ्य अष्टमसर्गं यावद् विद्यते कार्त्तवीर्य्यार्ज्जुनस्य उपस्थितिः, वर्णनञ्च । ततः परं नवसर्गात्मके हैहयविजये तृतीये सर्गे प्रतिनायकस्य रावणस्य चरितवर्णनात्तथा तस्य रेवाभिगमनवर्णनात् परं चतुर्थसर्गतो नवमसर्गं यावदस्ति रावणस्योपस्थितिः प्राधान्येनाप्राधान्येन वेति । अथ द्वादशसर्गात्मके पाण्डवविजये प्रतिनायकस्य दुर्य्योधनस्य परोक्षोल्लेखो दृश्यते प्रथमसर्गतो द्वितीयसर्गं यावत् ; ततः परं तृतीयसर्गतः एकादशसर्गं यावद् दुर्य्योधनस्योपस्थितिर्दृश्यते प्राधान्येनेति । अधुना एतेषां प्रतिनायकभूतानां चरित्राणां प्रतिनायकत्वं प्रतिपद्यते अलंकारशास्त्रदृशा । प्रतिनायकस्य लक्षणविषये दशरूपककारेण भणितम् "लुब्धो धीरोद्धतः स्तब्धः पापकृद्व्यसनी रिपुः॥२/९॥"[1] इति । पाण्डवविजये द्वौ खलनायकौ दृश्येते ; यथा - 'दुर्य्योधनः', 'अश्वत्थामा' चेति । परन्तु कुरुयुवराजो दुर्योधनः प्रधानप्रतिनायकरूपेणैवोपस्थाप्यते महाकविनामुना । दुर्योधनोऽत्र पाण्डवराज्यग्रसनत्वाद् लुब्धः, मात्सर्यदर्पचण्डत्वविकत्थनत्वादिदोषयुक्तत्वाद् धीरोद्धतः, युद्धे अत्युत्साहवशात् स्तब्धः, परनार्यौ (द्रौपद्याम्) तथा द्यूतासक्तिवशाद्व्यसनी चेति । अश्वत्थामाचरित्रे तु 'धीरोद्धतः', 'स्तब्धः', 'पापकृत्' चेति दोषत्रयमेव दृश्यते । प्रसङ्गत उल्लेख्यं यद्, आलोच्यभूते महाकाव्यत्रये –

"गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम् ।
निराकरणमित्येष मार्गः प्रकृतिसुन्दरः ॥१/२१॥"[2]

- इति नियममनुसृत्य आदौ नायकान् परशुराम - हैहय - पाण्डवानुपस्थाप्य, कार्त्तवीर्य्यार्ज्जुन - रावण - दुर्य्योधनाश्वत्थामादीनां प्रतिनायकानां वर्णनं विहितमिति कविभूषणेनामुना हेमचन्द्रेण ।

## गुणरीतयः

कविभूषणहेमचन्द्रेण वैदर्भीरीतौ एव रचितानि महाकाव्यानि । वैदर्भीरीतेः लक्षणविषये वामनाचार्य्येण कथितं - "समग्रगुणोपेता वैदर्भी ॥१/२/११॥"[3] इति। परन्तु अत्र प्रसादगुणस्य एकाधिपत्यमेव दरीदृश्यते प्रायः सर्वेषु महाकाव्येषु । यद्यपि प्रसादं व्यतिरिच्य अन्येऽपि गुणाः सन्निवेशिताः। यथा – परशुरामचरिते प्रथमे सर्गे ओज-

---

[1] दश.रू.(वेङ्कट.) पृष्ठे ८७

[2] काव्याद.(पाठक.) पृष्ठे २८

[3] का.सू.वृ.(सूरि.) पृष्ठे १७

प्रसादयोः युगपदुपस्थितिर्दृश्यते । पुनः पाण्डवविजये सप्तमे सर्गे भीमोक्तिषु 'ओजः' इति गुणस्य प्रकाशो दृश्यते । पञ्चमसर्गस्य सन्ध्यावर्णनायाम् (५/६३-६८ श्लोकाः) उपलभ्यते 'माधुर्यम्', 'सौकुमार्यम्' चेति गुणद्वयम् । युधिष्ठिरस्य राज्याभिषेकवर्णनायाम् प्रसाद-सौकुमार्य-माधुर्यमिति गुणत्रयमुपलभ्यते । अपि च परशुरामचरिते हैहय-जामदग्न्ययोः समरे (सर्गाः६-८), परशुरामेण जितायाः धरायाः दाने (सर्गः१०) ; हैहयविजये हैहय-पौलस्त्ययोः प्रतापवर्णने (सर्गाः१,३), समरवर्णने (सर्गाः७,८), हैहयेन रावणस्य मुक्तिदाने (सर्गः९) ; पुनः पाण्डवविजये कर्णेन कवचकुण्डलदाने, समरवर्णने (सर्गाः७,८) चेत्यादिषु त्यागशौर्य्ययोः द्योतनं दृश्यते, एतेन काव्यानामेतेषां 'उदारत्वमि'ति गुणवत्वं सिद्धम् । गुणानेतान् व्यतिरिच्य सर्वेषु महाकाव्येषु अर्थस्य अकल्पनीयत्वाद् 'अर्थव्यक्तिः', परशुराम-हैहय-रावण-पाण्डवकौरवादीनां रामायण-महाभारत-पौराणिकचरित्राणां वर्णनेन चमत्कारजनकत्वात् 'कान्तिः', अङ्गिरसेन सह विविधानामङ्गरसव्यञ्जकानां वाक्यानां प्रयोगे 'माधुर्य्यम्', मिश्रवर्णानां प्रयोगे सर्वत्र मध्यमबन्धयुक्तत्वात् 'समता', महाकाव्यानां केषुचित् सर्गेषु कोमलवर्णानां प्रयोगाधिक्ये 'सुकुमारता', बन्धशैथिल्याभावात् 'श्लेष'श्चेत्यादयो गुणाः सन्निवेशिताः। अतः कविरयं वैदर्भीरीतिरसिक एवेत्यभिप्रायो मे ।

## वृत्तयः

आलोच्यमाने महाकाव्यत्रये वीर एवाङ्गित्वेनावतिष्ठते, पुनः रामायण-महाभारताख्यानान्वितत्वाद् अद्भुतरसस्योपस्थितिरपि दृश्यते । अतो वीररसस्य प्राधान्यात्तथाद्भुतस्यावस्थानादत्रत्येषु महाकाव्येषु सात्वतीवृत्तेरवस्थानं तु स्वाभाविकमेव । पुनः युद्धात्मकवृत्तान्वितत्वाद् रौद्ररसस्यावस्थानमप्युपलभ्यते आलोच्ये महाकाव्यत्रितये, अतस्तेषु काव्यकृतिषु आरभटीवृत्तिरपि नयनपथमुपैति । धनञ्जयेनाप्युक्तं वृत्तिविनियोगविषये –

"शृङ्गारे कैशिकी वीरे सात्त्वत्यारभटी पुनः ।
रसे रौद्रे च बीभत्से वृत्तिर्सर्वत्र भारती ॥२/६२॥"[1] इति ।

सात्त्वतीवृत्तेः स्वरूपकथनप्रसङ्गे दर्पणकारेणोक्तम् –

"सात्त्वती बहुला सत्त्व-शौर्य्यत्यागदयार्जवैः।
सहर्षा क्षुद्रशृङ्गारा विशोका साद्भुता तथा॥६/१५०॥"[2] इति।

अर्थाद्, या वृत्तिः सत्त्वशौर्य्यत्यागदयार्जवैः परिपूर्णा, प्रायेण हर्षयुक्ता, स्वल्पशृङ्गारान्विता, शोकविहीना, अद्भुतरसान्विता सा एव सात्त्वती वृत्तिः। आलोच्ये महाकाव्यत्रितये परशुराम - हैहय - पाण्डवादीनां नायकानां

---

[1] दश.रू.(वेङ्कट.) पृष्ठे १३१

[2] सा.द.(हरिदास.) पृष्ठे ३५७

प्रवृत्तिभूते व्यापारे पूर्वोक्तेषु वैशिष्ट्येषु सत्त्वशौर्य्यत्यागदयार्जवत्वं, स्वल्पशृङ्गारत्वम्, अद्भुतरसान्वितत्वमित्यादीनि वैशिष्ट्यानि सन्निवेशितानि । सात्त्वतीवृत्तेः उदाहरणतया पाण्डवविजयस्य श्लोकोऽयम् अनुसन्धेयः –

"क्रुद्धो विकृष्य स पुनर्निशितं कृपाणं तेनापि मूर्धनि मुधैव जघान भूतम् ।
सोऽसि पफाल, परमेण च विस्मयेन द्रौणिः पराक्रमधियं न बबन्ध भूयः ॥१०/११॥"[1] ;

आरभटीवृत्तेः लक्षणप्रसङ्गे विश्वनाथेनापि उक्तम् –

"मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।
संयुक्ता बधबन्धाद्यैरुद्धतारभटी मता ॥६/१५५॥"[2] इति।

अर्थाद्, या वृत्तिः मायया इन्द्रजालेन च युक्ता, क्रोधोद्भ्रान्तचेष्टितैर्युक्ता, संग्राम-बध-बन्धान्विता उद्धता सैव आरभटी वृत्तिः। एतेषु महाकाव्येषु माया-संग्राम-बध-बन्धादीनि वैशिष्ट्यानि सन्निवेशितानि । अस्या आरभटीवृत्तेः उदाहरणं यथा पाण्डवविजये –

"गदाघातेन घोरेण महीं मोहं समं गतः। ययौ दुःशासनः सङ्ख्ये भीमसेनस्य वश्यताम्॥८/७४
व्यदारयन्नरहरिर्हिरण्यकशिपोरिव । उरो दुःशासनस्यासौ पश्यत्सु प्रतियोद्धृषु॥८/७५
स वक्षःक्षतजैस्तस्य तृप्तःक्षीर इवोत्थितः। राक्षसोऽयमिति त्रासाद्विषद्भिर्नाभिवीक्षितः॥८/७६"[3] चेति ।

## ध्वनि-वक्रोक्त्योः अस्तित्वम्

अधुना कविभूषणस्य हेमचन्द्रस्य महाकाव्यत्रयेषु दिङ्मात्रत्वेन केवलं पाण्डवविजयमाधारीकृत्य तत्र ध्वनि-वक्रोक्तीनाम् अस्तित्वविषयिनी आलोचना विधीयते । महाकाव्यमिदं कवेः हेमचन्द्रस्य मतानुसारेण "वीरकरुणरसप्रधानं महाकाव्यम्" अतोऽत्रास्ति वीररसध्वनिः, करुणरसध्वनिश्च ; पुनरत्र रौद्राद्भुतयोः ध्वनिरपि विराजन्ते । पुनः पाण्डवानां विजयद्वारेणात्र अधर्मोपरि धर्मस्य विजयोऽपि सूच्यते इति वस्तुध्वनिः । अर्थान्तरन्यासः-उत्प्रेक्षा-उपमा-एकदेशविवर्तिरूपकम्-निदर्शना-पर्यायादीनामलंकाराणां ध्वनिरपि अत्र दृश्यते । अतो महाकाव्येऽस्मिन् ध्वनित्रयमेव विराजते ।

[1] पा.वि.(द्वि.सं.) पृष्ठे ८८

[2] सा.द.(हरिदास.) पृष्ठे ३५८

[3] पा.वि.(द्वि.सं.) पृष्ठे ७०

वाच्यार्थस्य सुचारुप्रयोगत्वादस्मिन् काव्ये कुन्तकसम्मता वक्रोक्तिः अर्थाद्, "वैदग्ध्यभङ्गिभणितिः ॥१/१०॥"[1] अपि दृश्यते । काव्येऽस्मिन् कविनानुस्रियते कुन्तकानन्दयोः शब्दार्थविधानम् ; आनन्दवर्धनः शब्दार्थविधानविषये कथयति –

"सोऽर्थस्तद्व्यक्ति सामर्थ्ययोगी शब्दश्च कश्चन ।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः ॥१/८॥"[2] इति ।

पुनः काव्यस्य शब्दार्थयोः स्वरूपविषये कुन्तकोऽपि कथयति -

"शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि ।
अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः ॥१/९॥"[3] इति ।

विषयेऽस्मिन् उदाहरणतया पाण्डवविजयस्य श्लोकोऽयमनुसन्धेयः -

"जयश्रिया स्फुटमभिषेकलक्ष्यया सहार्जितं दधदधिमौलि तं मणिम् ।
सुरापगाश्रितजटमिन्दुशेखरं विडम्बयंस्त्रिपुररिपुम्बभौ नृपः ॥१२/५२॥"[4]

- इत्यत्र 'त्रिपुररिपुः' इति पदेन युधिष्ठिर आसीद् धार्तराष्ट्ररिपुः इत्येव सूच्यते । अतो महादेववाचकानि अन्यानि पदानि व्यतिरिच्य 'त्रिपुररिपुः' इति पदमेव सम्यक्तया युज्यते । पुनः श्लोकस्यास्य पूर्वार्धेण, 'त्रिपुररिपुः' इति पदेन च वीररसोऽपि अभिव्यज्यते । पुनरत्र 'सुरापगाश्रितजटमिन्दुशेखरं विडम्बयन्' इत्यंशेन व्यतिरेकालंकारध्वनिरपि अभिव्यज्यते । श्लोकोऽयं द्वादशसर्गगतः, सर्गोऽयं निर्वहणसन्धेराधारः अतः अद्भुतविषयस्य सन्निवेशोऽपि विधेयः, श्लोकेऽस्मिन् युधिष्ठिरेण महादेवातिक्रमणाद् विषयस्य अद्भुतत्वमेव सूचितम् । श्लोकस्यास्य शब्दार्थयोः मिथः सौष्ठवं स्मारयति कुन्तकस्य उक्तिरियम्

"समसर्वगुणौ सन्तौ सुहृदाविव सङ्गतौ ।
परस्परस्य शोभायै शब्दार्थौ भवतो यथा ॥टीका.१/१८॥"[5] इति।

एवमेव अध्यायोऽयं समाप्यते अत्र मन्दमतिना मया।

---

[1] व.जी.(मूर्थि.) पृष्ठे २०

[2] ध्वन्या.(मूर्थि.) पृष्ठे १५

[3] व.जी.(मूर्थि.) पृष्ठे १४

[4] पा.वि.(द्वि.सं.)पृष्ठे ११०

[5] व.जी.(दे.) पृष्ठे ११

# ✠ तृतीयोऽध्यायः ✠

## ॥ हेमचन्द्रप्रणीतानि खण्डकाव्यानि ॥

## (संक्षिप्तं समीक्षम्)

प्रथमो भागः : सत्यभामापरिग्रहम् ; दशावतारस्तोत्रञ्च

द्वितीयो भागः : संस्कृतानूदितं खण्डकाव्यम् : पतिदानव्रतम्

कविभूषणस्य हेमचन्द्ररायस्य काव्यकृतिषु सन्ति चत्वारि खण्डकाव्यानि ‘सत्यभामापरिग्रहम्’, ‘दशावतारस्तोत्रम्’, ‘पतिदानव्रतम्’, ‘भारतीगीतिः’ ; एतेषु भारतीगीतिं व्यतिरिच्य शेषानि काव्यानि अधुना प्राप्यन्ते । भागद्वयान्विते अध्याये अस्मिन् प्रथमे भागे आदौ सत्यभामापरिग्रहस्य, ततः परं दशावतारस्तोत्रस्य संक्षिप्तमालोचनं विद्यते ; द्वितीये भागे संस्कृतानूदितस्य खण्डकाव्यस्य पतिदानव्रतस्य आलोचनमेव सन्निवेशितमिति ।

## ३.१. प्रथमो भागः : सत्यभामापरिग्रहम्

### उत्सप्रसङ्गान्वेषणम्

श्रीकृष्ण-स्यमन्तक-सत्यभामादीनाम् आख्यानं प्रधानतः महाभारतस्य हरिवंशपर्वे, पद्मपुराणे, श्रीमद्भागवते एव प्राप्यते । एतेषु हरिवंशपर्वे ३८’तमे अध्याये तथा पद्मपुराणे त्रयदशाध्याये श्रीकृष्णेन स्यमन्तकोद्धारोपाख्यानमुपलभ्यते, परन्तु तत्र सत्यभामया सह तस्य परिणयस्य वृत्तं नोपलभ्यते । परन्तु श्रीमद्भागवते दशमे स्कन्धे ‘स्यमन्तकोपाख्यानमि’ति षट्-पञ्चाशत्तमोऽध्याये यदाख्यानं विद्यते, तत्र सत्राजितः स्यमन्तकोद्धारात् परं तेन कन्यकया सत्यभामया सह शौरेः विवाहमङ्गलम्, सत्राजितेन तस्मै यौतुकत्वेन स्यमन्तकप्रदानं, शौरिणा सत्राजिते मणिप्रत्यर्पणमित्यादीनि वृत्तानि चित्रितानि । प्रायः अस्यानुरूपवृत्तान्तविन्यासो विधीयते हेमचन्द्रेण सत्यभामापरिग्रहे । अत एव कृष्णद्वैपायनवेदव्यासप्रणीतं श्रीमद्भागवतमेव खण्डकाव्यस्यास्य सत्यभामापरिग्रहस्य उत्सरूपेण प्रतिभाति तयोराख्यानगतसादृश्यत्वादिति । रचनद्वितयस्यास्य मूलवृत्ते यथा सादृश्यमस्ति तथा तयोः आकारे, वृत्तविन्यासे च वैसादृश्यमपि दरीदृश्यते । तानि वैसादृश्यानि यथा –

(क) भागवतगतं ‘स्यमन्तकोपाख्यानम्’ केवलं पञ्चचत्वारिंशत्श्लोकात्मकं, हेमचन्द्रकृतं ‘सत्यभामापरिग्रहम्’ तु चतुःसर्गात्मकमिति ।

(ख) सत्यभामापरिग्रहस्य प्रारम्भे दृश्यते यद्, माधवः कस्माच्चित् चारमुखाद् द्वारिकायाः सुखसमृद्धिवर्णनं श्रुत्वा तदनन्तरं लोकापवादमपि श्रुतवान् तन्मुखात् । परन्तु भागवतीये स्यमन्तकोपाख्याने स अपवादो लोकमुखतः (श्रीवैष्णवतोषणीटीकानुसारेण श्रीमदुद्धवमुखात्) शौरिणा श्रुतः।

(ग) भागवते दृश्यते यत्, श्रीकृष्णो नगरजनैः सह प्रसेनमन्वेष्टुं गतवान् ; सत्यभामापरिग्रहे तु केवलमेव सैन्यैः सह स निर्ययौ ।

(घ) स्यमन्तकोपाख्याने सत्यभामायाः सह श्रीकृष्णस्य साक्षात्कारोऽभवत् स्यमन्तकस्य उद्धारात् परं सत्राजिता कृष्णाय कन्यासम्प्रदानकाले, परन्तु सत्यभामापरिग्रहे द्वितीये सर्गे कविः शौरि-सत्यभामयोः साक्षात्कारं तथा तयोः मध्ये अनुरागसञ्चारमपि चित्रितवान् । ततः परं कविनामुना हेमचन्द्रेण एतदपि चित्रितं यत्, श्रीकृष्णः सत्यभामया हृतचित्तोऽपि प्रणतस्य जाम्बवतः प्रार्थनापूरणाय मणिना सह जाम्बवतीं जग्राह ।

(ङ) भागवतमहापुराणे दृश्यते यद्, माधवस्य सहचारिणः कन्दराद् बहिः द्वादशदिवसान् स्थित्वा माधव ऋक्षेण हत इति मत्वा शोकाकुलाः द्वारिकां गतवन्तः, परन्तु सत्यभामापरिग्रहे शौरेरनुयात्रिकाः एकविंशतिदिवसान् अतीत्यैव द्वारिकां प्रत्यागताः ।

(च) भागवते मूलभूताख्याने सर्वे द्वारिकावासिनः श्रीकृष्णं पुनर्दर्शनाय चन्द्रभागा इति दुर्गादेवीम् अर्चितवन्तः, तस्याः आश्वासवाणीम् आशिर्वाणीं च श्रवणादनन्तरमेव द्वारवतीमध्ये जाम्बवत्याः सह मधुसूदनस्य आविर्भावोऽभूदिति अलौकिको वृत्तान्तो महाकविना हेमचन्द्रेण सत्यभामापरिग्रहे सुकौशलेनैव परित्यक्तो जातः ।

## समासेन प्रतिसर्गगतं विषयवस्तुकथनम्

(क) **प्रथमसर्गः**

अस्मिन् सर्गे कृष्णः चारं स्वचारित्रगतां पौरवचःप्रवृत्तिमपृच्छत्, तदाज्ञानुसारेण स चारः आदौ कृष्णाधीनस्य द्वारिकानिवासीनां सुखसमृद्धिं निवेद्य क्रमात् कृष्णेन हृतं स्यमन्तकं सत्राजितानुजस्य प्रसेनस्य बधादनन्तरमिति अप्रियं सत्राजित्कृतापवादमपि अशंसद् । ततः परं विद्यते माधवस्य स्यमन्तकोद्धारसंकल्पः।

(ख) **द्वितीयसर्गः**

प्रसेनपदवीमन्वेष्टुं श्रीकृष्णस्य प्रस्थानम्, प्रस्थानकाले शौरेः रूपवर्णनम्, दारुकवचनश्रवणादनन्तरं रथस्थेन माधवेन सह सत्यभामायाः साक्षात्कारः, साक्षात्कारत्वात् तयोः रतिः –

"आदृष्टिपथमालोक्य सत्यभामाथ वल्लभम् ।
मनसा चानुगच्छन्ती देहेनाववृते गृहम् ॥१८॥
स्मरन् सत्राजितः पुत्र्याश्चेष्टितानि क्षणं हरिः ।

न क्रान्तमपि पन्थानं बुबुधे किञ्चिदुन्मनाः॥ १९॥ ”[१]इति ।

ततः परं गहने वने प्रसेनशवम्, अथ व्यात्ताननं सिंहशवम्, ततः परं तस्मादनन्तरम् ऋक्षपर्वतं प्राप्य माधवः स्यैन्यान् बहिः संस्थाप्य विवेश तत्र । तत्रास्ति ऋक्षकुमारधात्र्या रामायणवर्णनम् अथ सर्गस्य अन्ते विद्यते ऋक्षशिशुहस्ताद् माधवेन मणिहरणमिति । अत एते एव विषयाः सर्गस्यास्य उपजीव्यरूपेण सन्निवेशिताः ।

(ग) **तृतीयसर्गः**

कुमारधात्रीकृतमार्त्तघोषणं श्रुत्वा जाम्बवतः आगमनम्, तेन माधवरूपवर्णनं निन्दा च, तयोः (जाम्बवान्-कृष्णयोः) युद्धम्, युद्धे जाम्बवतः पराजयः, अथ जाम्बवतः अनुरोधेन माधवेन तत्पुत्र्याः पाणिग्रहणमित्यादयो विषयाः सन्निवेशिताः सर्गेऽस्मिन् ।

**(घ) चतुर्थसर्गः**

सर्गस्यास्य आदौ अस्ति जाम्बवत्या सह माधवस्य द्वारकाप्रत्यागमनवृत्तान्तः, अस्मिन्नेव वृत्तान्ते विद्यते दारुककृतं शौरिविरहाकुलं द्वारकावर्णनम्, ततः परमस्ति माधवस्य स्वपूरीप्रवेशवृत्तान्तः, तत्रास्ति माधवप्राप्तित्वाद् आनन्दमुखरितं द्वारिकावर्णनमिति, अथ कविनामुना एकेनैव श्लोकेन विहितं रुक्मिण्या अभिमानभञ्जनम् –

“अभिमानवतीञ्च रुक्मिणीं तव दासीयमिति प्रसादयन् ।
अपि जाम्बवतीं स्वमन्दिरे नवपाणिग्रहणां न्यवेशयत् ॥२०॥ ”[२] इति,

अथ सत्राजित्सकाशे स्यमन्तकदानादनन्तरं सत्यभामा-कृष्णयोरुद्वाहरेव वर्णितोऽस्ति ।

## खण्डकाव्यत्वविचारणम्

कविभूषणस्तु स्वयमेव काव्यमिदं खण्डकाव्यमित्यभिधया अभिधीयते, खण्डकाव्यस्य लक्षणविषये विश्वनाथेन निगदितम् - “खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च ॥६/३०७॥ ”[३] इत्यत्र ‘च’कारोपदानात्, काव्येन सह महाकाव्यमपि बुध्यते, तदुक्तं कुसुमप्रतिमायाम् - “काव्यस्य पूर्वनिरुक्तस्य महाकाव्यस्येत्यर्थः एकदेशानुसारि एकांशानुरूपं काव्यं खण्डकाव्यं भवेत्। ”[४] इति। पुनः विश्वनाथकृतं काव्यस्य विशेषलक्षणमपि ‘काव्यस्य’ इति पदेन

---

[१] सत्य.प.(द्वि.सं.) पृष्ठे १३

[२] सत्य.प.(द्वि.सं.) पृष्ठे ३०

[३] सा.द.(हरिदास.) पृष्ठे ४२६

[४] तत्रैव. तत्पृष्ठे

बुध्यते, यतो लक्षणमिदमपि विद्यते खण्डकाव्यलक्षणस्य अव्यवहिते पूर्व्वे । अतएव सत्यभामापरिग्रहमिति काव्यं काव्यस्य विशेषलक्षणस्यापि एकदेशानुसारि भवेदिति वक्तुं शक्यते ।

अत आदौ विश्वनाथकृतं काव्यस्य विशेषलक्षणमनुसृत्यैव प्रारभ्यते सत्यभामापरिग्रहस्य खण्डकाव्यत्वविचारणम् –

"भाषाविभाषानियमात् काव्यं सर्गमुज्झितम् ॥
एकार्थप्रवणैः पद्यैः सन्धिसामग्र्यवर्जितम् ।..॥६/३०६॥"[1] इति।

लक्षणस्यास्य वैशिष्ट्यचतुष्टयेषु द्वयमेव सम्यक्तया नयनपथमस्माकमुपैति, यथा- भाषाविभाषानियमः सत्यभामापरिग्रहस्य कृते प्रयुज्यते, यतः "भाषया संस्कृतेनारब्धे संस्कृतेनैव कर्त्तव्यम्,.."[2] इति विधानमनुसृत्य काव्यमिदं सम्पूर्णतया संस्कृतभाषयैव लिखितमस्ति, पुनः काव्यलक्षणगतं एकार्थप्रवणता इति वैशिष्ट्यं तु अत्र सम्यग्रूपेण दरीदृश्यते । अपरञ्च वैशिष्ट्यद्वयं नानुस्रियते यतः काव्येऽस्मिन् विद्यते सर्गविभागः, पुनः काव्यमिदं न सम्पूर्णतया सन्धिविवर्जितमिति । यतः सत्याभामापरिग्रहे लक्षणस्यास्य एकदेशानुसरणमेव प्रतिपद्यते अत एव काव्यमिदं खण्डकाव्यमिति लक्षणसङ्गतिः ।

अधुना तु वक्तुं शक्यते यत्, खण्डकाव्यस्य लक्षणानुसारेण खण्डकाव्यं महाकाव्यस्य एकदेशानुसारि भवति, अतो विश्वनाथकविराजकृतानि महाकाव्यलक्षणानि आधारीकृत्य सत्यभामापरिग्रहस्य खण्डकाव्यत्वविचारणा कार्य्या ।

## नामकरणालोचनम्

महाकाव्यस्यैकदेशानुसारित्वात् खण्डकाव्यस्य नामकरणेऽपि महाकाव्यलक्षणेषु निर्दिष्टो तद्विषयको विधिरेवानुस्रियते । नामकरणप्रसङ्गे विश्वनाथेन निर्दिश्यते यत्, कवेर्नाम्ना, वृत्तनाम्ना, नायकनाम्ना, इतरविषयनाम्ना वा विधीयते नामकरणम् - "कवेर्वृत्तस्य नाम्ना नायकस्येतरस्य वा ।॥६/३०२॥"[3] इति। अधुना हेमचन्द्ररायप्रणीते आलोच्यमाने क्षुद्रेऽस्मिन् काव्ये नामकरणविधेः द्वितीयविकल्पमर्थात् श्रीकृष्णेन सह सत्यभामायाः परिग्रह इति वर्णनीयं वृत्तान्तमवलम्ब्यैव सत्यभामापरिग्रहमिति नाम अभूत् ।

पुनः सत्यभामापरिग्रहमिति नाम्नो व्युत्पत्तिर्यथा 'सत्यः भामो यस्याः' इति विग्रहेण वहुब्रीहौ स्त्रियां प्रथमैकवचने 'सत्यभामा' इति पदं निष्पद्यते, अथ 'सत्यभामायाः परिग्रहः' इति विग्रहे "कृद्योगा च षष्ठी समस्यत इति वाच्यम् (वा. १३१७)"[4] इति वार्त्तिकेन षष्ठीतत्पुरुषे 'सत्यभामापरिग्रहः' इति पदमुत्पद्यते । पदमिदं खण्डकाव्यस्य

[1] सा.द.(हरिदास.) पृष्ठे ४२५

[2] तत्रैव. तत्पृष्ठे

[3] तत्रैव. पृष्ठे ४२४

[4] वैया.सि.कौ.(गिरिधर.,परमेश्वर.)द्वि.भा. पृष्ठे ४५

विशेषणत्वाद् "ह्रस्वो नपुंसके प्रातिपदिकस्य(१/३/४७)"[१] इति सूत्रेण 'सत्यभामापरिग्रहः' इति पदे जायते नपुंसकत्वम्, तेनैव निष्पद्यते 'सत्यभामापरिग्रहम्' इति नाम ।

प्रसङ्गत उल्लेख्यं यत्, साधारणतया वर्णनीयेषु वृत्तेषु मुख्यं वृत्तमेव नामकरणे हेतुर्भवति, इह महाकविहेमचन्द्ररायो माधवसत्यभामयोः साक्षात्कारं, परस्परानुरागं, विवाहञ्च मुख्येन स्वीकृत्य सत्यभामापरिग्रहमिति पदं काव्यस्यास्य नामत्वेन स्वीकरोति । परन्तु समग्रे काव्ये "मणिं...त्वं हत्वा प्रसेनं हृतवानसीति॥१/१७॥"[२] इति मिथ्यापवादमार्ष्टुकामेन द्वारकेशेन माधवेन स्यमन्तकोद्धारकथा एव मुख्येन बाहुल्येन च वर्णिता, अपि च अनया वर्णनया सत्यभामायाः परिग्रहापेक्षया माधवेन मिथ्यापवादजनितम् अपयशमोचनमेव काव्यस्यास्य मुख्यफलत्वमहर्ति । अत एव न सार्थकतामेति इदं नाम इत्येवाशयो मे ।

## सर्गविधानम्

सामान्यतया सर्गशब्दोपस्थापिताध्यायैः विन्यस्तरसवत्पद्यसमूह एव महाकाव्यमिति अभिधया अभिधीयते –

"सर्गबन्धो महाकाव्यम्... ॥६/३०२॥"[३] इति।

अतः साधारणतया खण्डकाव्येषु सर्गविभागस्तु न स्वाभाविकः, परन्तु सत्यभामापरिग्रहे दृश्यते सर्गविभागः । महाकाव्यस्य सामान्ये लक्षणे 'बन्ध' इति पदेन रसवत्पद्यसमूहानां विन्यास एव बुध्यते, तदुक्तं कुसुमप्रतिमाटीकायां हरिदाससिद्धान्तवागीशमहाभागेन - "....बन्धो रसवत्पद्यसमूहविन्यासो..."[४] इति । पद्यानि पुनः पञ्चविधानि, यथा – मुक्तम्, 'युग्मकम्', 'सन्दानितकम्', 'कलापकम्', 'कुलक'ञ्चेति । पद्यविभागभूतत्वाद् मुक्तकादीनां सर्गबन्धाङ्गत्वं महाकाव्याङ्गत्वं वा यथा स्वीकर्त्तव्यं, तथैव महाकाव्यस्य एकदेशानुसारित्वात् तथा सर्गबन्धात्मकत्वात् सत्यभामापरिग्रहे एतेषां मुक्तकादीनां खण्डकाव्याङ्गत्वमपि सिद्धमेव परम्परासम्बन्धेन । प्रसङ्गत उल्लेख्यं यत्, सत्याभामापरिग्रहे केवलं मुक्तकान्येव सन्निवेशितानि नान्यानि पद्यानीति ।

महाकाव्ये अष्टाधिका नातिस्वल्पा नातिदीर्घाः सर्गाः सन्ति - "नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह।..॥६/३०२॥"[५] इति । सत्यभामापरिग्रहे सर्गाः महाकाव्यस्य सर्गा इव नातिस्वल्पा नातिदीर्घाश्च यतोऽत्र सर्वेषु सर्गेषु पञ्चविंशत्यधिकाः श्लोकाः सन्ति, न तु त्रिशतानधिकाः श्लोकाः । परन्तु काव्यस्यास्य सर्गसंख्याविषये अष्टाधिकत्वस्य विधानं नानुसृतं कविना हेमचन्द्रेण, यतः काव्यमिदं सर्गचतुष्टयात्मकमिति ।

---

[१] अष्टाध्य.(शास्त्री.,पाण्डे.) पृष्ठे ६

[२] सत्य.प.(द्वि.सं.) पृष्ठे ८

[३] सा.द.(हरिदास.) पृष्ठे ४२३

[४] तत्रैव. तत्पृष्ठे

[५] तत्रैव. पृष्ठे ४२४

## नायकविधानम्

महाकाव्यस्य नायकप्रसङ्गे विश्वनाथेन निर्दिश्यते विकल्पत्रयमिति, यथा – एक एव धीरोदात्तगुणान्वितो देवस्वभावापन्नो जनो नायको भविष्यति, अथवा कश्चन धीरोदात्तगुणान्वितः सद्वंशजातः क्षत्रियो नायकपदं प्राप्स्यति, अथवा एकस्मिन्नेव वंशे जाताः कुलीना बहवोऽपि धीरोदात्तगुणान्विता भूपा नायका भवितुमर्हन्तीति –

"........................तत्रैको नायकः सूरः।
सद्वंशः क्षत्रियो वापि धीरोदात्तगूणान्वितः॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा।..॥६/३०२॥"[१] इति।

सत्यभामापरिग्रहे आदिभूतं विकल्पद्वयमेवानुस्रियते । यतः अत्र धीरोदात्तगुणान्वितः, विष्णोरवतारत्वाद् देवस्वभावाच्च सूरः, यदुकुलोद्भूतः क्षत्रियः तथा जगन्निवासः श्रीकृष्ण एव एक-नायकत्वेन स्वीक्रियते ।

विश्वनाथमतेन नायकस्तु स्याद् धीरोदात्तगूणान्वितः । अतो नायकोऽयं श्रीकृष्णो धीरोदात्तो न वेति विचारणीयः, परन्तु नायकस्यास्य धीरोदात्तत्वविचारात् पूर्वं नायकत्वप्रतिपादनं कर्तव्यम् । तथा चोच्यते नायकलक्षणविषये साहित्यदर्पणे तृतीये परिच्छेदे –

"त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही ।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान् नेता ॥३/३५॥"[२] इति।

लक्षणमिदं नायकस्य सामान्यलक्षणम्, अतोऽत्र यानि वैशिष्ट्यानि सन्ति तानि साधारणवैशिष्ट्यानि, इमानि वैशिष्ट्यानि आधारीकृत्यैव यथाक्रमेण विधीयतेऽत्र नायकस्यास्य श्रीकृष्णस्य नायकत्वविचारणम् -

- **त्यागी**

नायकस्तु त्यागी अर्थात् दानशीलो अनासक्तो वा भवेत् । श्रीकृष्णस्य अनासक्तताया उदाहरणं दृश्यते अन्तिमे सर्गे, सत्राजिते स्यमन्तकसमर्पणवर्णने –

"हरिणा स्वयमर्पितं सदस्यथ सत्राजिदवाप्य तं मणिम् ।
अपराद्धमकारणं मया महतोऽस्येति बभूव लज्जितः ॥४/२१॥"[३] इति।

तथा सत्यभामां उद्वाहादनन्तरं तस्य मणेरग्रहणे –

---

[१] सा.द.(हरिदास.) पृष्ठे ४२३

[२] तत्रैव. पृष्ठे ९०

[३] सत्य.प.(द्वि.सं.) पृष्ठे ३०

"दत्तां स्वयंवरवधूमिव सत्यभामां जग्राह सादरमथो मणिमर्पितन्तु ।

प्रत्यादिशन् विनयपूर्वकमुवाच शौरिस्तिष्ठत्वयं त्वयि नरेन्द्र, फलं तथा नः ॥४/३०॥"[१] चेति।

➢ **कृती**

पुनः नायकः कृती कर्मकुशलो वीरो वा भवेत् । तस्योदाहरणं दृश्यते प्रथमे सर्गे कृष्णं प्रति चारोक्तेषु वचनेषु (श्लोकाः ४-९), दिङ्मात्रमुदाहरणं यथा –

"भवाञ्जरासन्धभयाभिभूतां श्रियं यदूनामवहद् यदूनाम् ।

तद्वासवीमप्यधुना समृद्धिं सा त्वन्नयेनोपचितातिशेते ॥१/७॥"[२] इति।

➢ **कुलीनः**

कुलीनः अर्थात्, सद्वंशजातः पुरुष एव नायकत्वमेति नान्यः। आसीत् श्रीकृष्णः चन्द्रकुलोद्भूतो यदुवंशीयः क्षत्रियः । अतस्तस्य कौलीन्यं सिद्धमेव । जाम्बवन्तं प्रति श्रीकृष्णस्य उक्तिरेव मानमस्मिन् विषये "....अवैतु मां क्षत्त्रकुलोद्भवं भवान्...॥३/१३॥"[३] इति ।

➢ **सुश्रीकः**

'सुश्रीक' इति पदस्यार्थो बुद्धिमानिति । काव्येस्मिन् श्रीकृष्णस्य प्रत्युत्पन्नमतेः प्रमाणमुपलभ्यते द्वितीये सर्गे वन-मध्ये स्यमन्तकमणेः अन्वेषणावसरे । अतो बुद्धिमानयं नायकः।

➢ **रूप-यौवनवान्**

रूपयौवनवत्त्वं नायकस्य अपरं वैशिष्ट्यम् । यतः संस्कृतवाङ्मये दृश्येषु श्रव्येषु च काव्येषु नायकानां रूपयौवनवर्णना वर्णिता प्रायः सर्व्वैरेव कविभिः। अतो रूपयौवनान्वितो नायकः खलु ईप्सितः काव्यकृतिषु । श्रीकृष्णस्य रूपवर्णना उपलभ्यते द्वितीये सर्गे (श्लोकाः ३, ४, ६५ च), तृतीये सर्गे [श्लोकाः ३, ४, ५ (पूर्वार्धः), ६ (उत्तरार्धः), ७ (पूर्वार्धः), ९ (पूर्वार्धः)] । अस्योदाहरणतया उद्धृता जाम्बवता माधवदर्शनवर्णना –

"समीक्ष्य तत्राधिगतस्यमन्तकं रुदन्तमप्यर्भकमभ्यवस्थितम् ।

विलक्षणोत्साहभरं सुलक्षणं स पुरुषं स्मेरमुखं विसिस्मिये ॥३/३॥

मनस्यकुर्व्वन्निव साहसं हरेर्महीयसासौ महसैव निर्जितः।

पिबन्निमेषालसया दृशा भृशं मनोरमं रूपमतिष्ठदुन्मनाः ॥३/४॥"[४] इति ।

---

[१] सत्य.प.(द्वि.सं.) पृष्ठे ३२

[२] तत्रैव. पृष्ठे ६

[३] तत्रैव. पृष्ठे २१

[४] तत्रैव. पृष्ठे १९

➢ **उत्साही**

रूपयौवनान्विततत्वाद् नायकस्य कृते तारुण्यं तु सिद्धमेव । अतः तारुण्यत्वाद् उत्साहवत्वमपि नायके स्वाभाविकमेव । सत्यभामापरिग्रहे माधवे दृश्येते लोकापवादमोचनोत्साहो, युद्धोत्साहश्च । लोकापवादमोचनाय स्यमन्तकमणेः उद्धाराय तस्योत्साहो दृश्यते प्रथमे सर्गे अन्तिमे भागे श्लोकद्वये स्यमन्तकोद्धारप्रतिज्ञायाम् (श्लोकौ २९, ३० च), द्वितीये सर्गे आदिभूते श्लोकद्वये मणेरुद्धाराय माधवस्य प्रयाणोद्यमे (श्लोकौ १, २ च) ; तृतीये सर्गे श्लोकपञ्चके (श्लोकाः १३-१७) दृश्यते जाम्बवता सह द्वारकाधीशस्य द्वन्द्वयुद्धोत्साहश्च । अत उत्साहवानयं नायकः।

➢ **दक्षः**

अत्र 'दक्ष' इति पदेन 'अनलस' इत्यर्थ एव बुध्यते । काव्येऽस्मिन् समग्रे द्वितीये सर्गे मणेः अन्वेषणवृत्तान्ते, तथा तृतीये सर्गे एकविंशति दिनानि यावत् प्रचलितस्य माधवजाम्बवतोः युद्धस्य वर्णने सम्यगेव प्रकटिता माधवस्य अनलसता ।

➢ **अनुरक्तलोकः**

अनुरक्तलोक इति पदस्यास्य व्युत्पत्त्या एवास्य अर्थो ज्ञायते - 'अनुरक्ताः लोकाः यस्मिन् सः' इत्यत्र 'लोकाः' इत्यनेन बुध्यन्ते काव्यकृतौ नायकं व्यतिरिच्य सर्वाण्येव चरित्राणि । अतो नायिकाः, सहायकाः, प्रतिनायकाः तथा नृपाश्रिते काव्ये प्रजाः अपि 'लोकाः' इत्यभिधया अभिधीयते । अतः काव्ये यस्मिन्नेव पात्रे जातान्यनुरक्तानि पात्राण्यन्यानि सर्वाणि, तस्मिन्नेव चरित्रे नायकत्वमारोप्यते । इह सत्याभामापरिग्रहे वृत्तविन्यासद्वारेण प्रतिनायकनायिकासहायकास्तथा पुरवासिनश्चेत्यादीनि पात्राणि माधवे एवानुरक्तिकृतानि कविना हेमचन्द्रेण । अतः स द्वारिकापतिरेव नायकत्वमेति, नान्यः।

➢ **तेजोवान्**

नायकस्तु भवेत् तेजस्वी । द्वितीये सर्गे स्यमन्तकोद्धाराय माधवस्य प्रयाणवर्णने तस्य तेजमयं वर्णनमुपलभ्यते श्लोकेनैकेन -

"स किरीटच्छटापुञ्जच्छुरितास्यच्छविर्बभौ ।
बालार्कघुसृणालिप्तमुखश्रीरिव वासरः ॥२/३॥"[1] इति।

---

[1] सत्य.प.(द्वि.सं.) पृष्ठे १२

➢ **वैदग्ध्यम्**

नायकः स्याद् विदग्धो निपुणः, पण्डितो, निगूढाभिप्रायज्ञो वेति । प्रथमे सर्गे चारमुखात् पुराधिवासीनां जीवनचर्याज्ञानेन, सत्राजितो धनहानेः परिवारहानेश्च ज्ञानेन, सत्राजित्प्रचारितेन जनापवादज्ञानेन द्योतिता माधवस्य निगूढाभिप्रायज्ञता इति ।

➢ **शीलवान्**

नायकस्य कृते शीलत्वम् अर्थात् सद्वृत्तत्वम्, सच्चरित्रत्वं वा अत्यावश्यकीयमिति । प्रसङ्गेऽस्मिन् विश्वनाथेनोक्तम् - "शीलं सद्वृत्तम् ।"[१] इति। प्रथमे सर्गे जनापवादं श्रुत्वा सदोमण्डपमुपगम्य तत्र माधवेन मणेरुद्धारप्रतिज्ञायाम् , तृतीये सर्गे प्रणतस्य जाम्बवतः अनुरोधरक्षणाय श्रीकृष्णेन तस्य कन्यायाः पाणिग्रहणे च प्रकटितमस्ति माधवस्य शीलत्वमेव ।

### *नायकभेदः*

अधुना श्रीकृष्णः कीदृशो नायक इति विचारयितुं नायकस्य भेदविषये आलोच्यते । विश्वनाथेन नायकस्य चातुर्विध्यं स्वीकृतम्, तद् यथा – 'धीरोदात्तः', 'धीरोद्धतः', 'धीरललितः', 'धीरप्रशान्त'श्चेति । तदुक्तं साहित्यदर्पणे –

"धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च।
धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः॥ ३/३६ ॥"[२] इति।

नायकस्तु धीरोदात्तलक्षणान्वितः स्यादित्येव निर्देशोऽस्ति पूर्वोक्ते महाकाव्यलक्षणे, अतः अधुना नायकस्य माधवस्य धीरोदात्तत्वविचारणं कर्तव्यम् । धीरोदात्तनायकस्य लक्षणं यथा साहित्यदर्पणे –

"अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।
स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः॥ ३/३७॥"[३] इति।

अर्थात्, यस्मिन् नायके आत्मश्लाघाहीनत्वम्, क्षमावानत्वम्, अतिगाम्भीर्यम्, महासत्त्वत्वम्, स्थैर्यम्, निगूढमानत्वम्, दृढव्रतत्वमित्यादीनि वैशिष्ट्यानि सन्ति स एव धीरोदात्तो नायकः। इमानि वैशिष्ट्यानि आधारीकृत्यैव यथाक्रमेण विधीयते नायकस्य श्रीकृष्णस्य धीरोदात्तत्वविचारणम् –

---

[१] सा.द.(हरिदास.) पृष्ठे ९०

[२] तत्रैव. पृष्ठे ९१

[३] तत्रैव. तत्पृष्ठे

➢ **अविकत्थनः**

सत्यभामापरिग्रहे प्रथमे सर्गे दृश्यते यत्, चारमुखात् तस्य शासने द्वारकावासीनां सुखसमृद्धेः वर्णनं श्रवणादनन्तरं तत्सम्बन्धिनं मिथ्यापवादं श्रुत्वा स माधवो नाभूत् क्रोधितः, अपि तु बभुव उद्योगी मिथ्यापवादमोचनाय, एतेनैव तस्य द्वारकाधीशस्य अविकत्थनत्वम् आत्मश्लाघाहीनत्वं वा द्योतितमिति ।

➢ **क्षमावान्**

अत्रत्ये तृतीये सर्गे युद्धे पराजित ऋक्षयुथपः स्यमन्तकेन सह गृहागमनार्घ्यभूतां सुतां ग्रहणे अनुरुरोध केशवम् । "प्रणतस्य न भङ्गमर्हति..॥३/३३॥ "[1] इति विचिन्त्य स मधुसूदनः पुरयामास तस्य प्रार्थनाम् । पुनः चतुर्थे तथान्तिमे सर्गे दृश्यते यद्, मिथ्यापवादप्रचारिणः सत्राजितः कृते दण्डविधानं न विधाय स माधवः तं मणिं सत्राजिताय ददौ । अनेनैव प्रकारेण द्योतितमस्य नायकस्य क्षमान्वितत्वमिति वैशिष्ट्यम् ।

➢ **अतिगम्भीरः**

प्रथमे सर्गे स्वजनान् प्रति कृष्णस्य उक्तिषु एव प्रकाशितं तस्य गाम्भीर्य्यम्, प्रसङ्गेऽस्मिन् दिङ्मात्रमुदाहरणं यथा –

"यशोऽवदातेऽत्र कुले यदूनां नाभूदधन्यः पुरुषो मदन्यः।
यद्भौतिकं देहमहं बिभर्मि कलङ्किते कीर्त्तिमयेऽपि तस्मिन् ॥१/२७॥ "[2] इति।

➢ **महासत्त्वः**

आत्मनो विषये मिथ्यापवादमवगम्य नाभूत् स अतीव दुःखार्द्दितः, पुनः जाम्बवन्तं पराजित्य हृतं स्यमन्तकं तथा स्यमन्तकोद्धारावसरे स्त्रीरत्नद्वयं प्राप्यापि नाभूत् स विह्वलः सुखातिशय्येन । अतो नायकोऽयं महासत्त्वः नास्तीत्यत्र सन्देहावसरः ।

➢ **स्थैर्यवान्**

काव्येऽस्मिन् सत्यभामापरिग्रहे प्रथमे सर्गे ऊनविंशतिसंख्यके श्लोकान्विते (श्लोकाः ३-२१) चारवचनश्रवणे ; द्वितीये सर्गे धात्र्या सह ऋक्षशिशोः कथोपकथनश्रवणे (श्लोकाः ४७-६१) ; तृतीये सर्गे श्लोकसप्तकान्वितानि (श्लोकाः ६-१२) जाम्बवतः परुषवचनानि श्रवणे ; तथा चतुर्थे सर्गे आदिभूते अंशे द्वारिकां

---

[1] सत्य.प.(द्वि.सं.) पृष्ठे २५

[2] तत्रैव. पृष्ठे १०

प्रत्यागमने दारुकात् स्वपुरस्य वर्णनं (श्लोकाः ३-१५) श्रवणेनापि नायकस्यास्य माधवस्य स्थैर्य्यमेव प्रतिपादितमिति ।

- **निगूढमानः**

तृतीये सर्गे ऋक्षयुथपस्य जाम्बवतः क्रोधान्वितानि तथा अवमाननात्मकानि वचनानि श्रुत्वा जाम्बवन्तमुद्दिश्य श्रीहरेः प्रत्युत्तरभूतेषु श्लोकपञ्चकेषु (श्लोकाः१३-१७) विनयेन सह तस्य वीर्य्यवत्वमपि अस्माकं नयनपथमुपैति । अस्योदाहरणतया उद्ध्रियते श्लोकोऽयम् –

"स्त्रिया भिषत्या मणिमामिषं यथा हरिञ्छिशोर्नाहमपद्रुतो यतः।
कथं तदा श्येन इवास्मि, न ह्यसौ प्रतीक्षते सत्प्रतिपक्षमात्मनः॥३/१५॥"[१] इति।

- **दृढव्रतः**

प्रथमे सर्गे चारमुखात् 'सत्राजितस्य भ्रातरं प्रसेनं हत्वा माधवेन हृतं स्यमन्तकम्' इति सत्राजितेन प्रचारितं मिथ्यापवादं ज्ञात्वा द्वारिकापतिः श्रीकृष्णेन विहिता स्यमन्तकोद्धारस्य भीषणा प्रतिज्ञा –

"तदीदृशः सम्प्रति निश्चयो मे स्यमन्तकं स्वञ्च यशःस्वमुच्चैः।
नष्टं द्वयं वा सममुद्धरेयं जीवन् पुरीं वा न पुनर्विशेयम् ॥१/२९॥"[२] इति।

एतेनैव प्रतीयते नायकस्यास्य दृढव्रतत्वमिति ।

एतेनैव सम्यगेव प्रतीयते यद्, अस्य सत्यभामापरिग्रहस्य नायकभूतो द्वारकाधीशः श्रीकृष्णो धीरोदात्तगुणान्वितो नायक इति ।

## अङ्गिरसनिरूपणम्

आलंकारिकमतानुसारेण श्रृङ्गारवीरशान्तानां मध्ये एक एव काव्यस्य अङ्गी रसरूपेण उपस्थापनीयः, प्रसङ्गेऽस्मिन् साहित्यदर्पणकारः अगादिः "श्रृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ॥६/३०२॥"[३] इति, अनेन विधानेन सत्यभामापरिग्रहे वीररसः अङ्गित्वमर्हति इत्येव मे आशयः। यतः काव्येऽस्मिन् सर्वेषु सर्गेषु वीरस्य स्थायिभूतस्य उत्साहस्याभिव्यञ्जनं दृश्यते आधिक्येनैव । यथा प्रथमे सर्गे नायके दृश्यते मिथ्यापवादमोचनोत्साहः ; द्वितीये सर्गे

[१] सत्य.प.(द्वि.सं.) पृष्ठे २२

[२] तत्रैव. पृष्ठे ११

[३] सा.द.(हरिदास.) पृष्ठे ४२३

नायकस्य मङ्गलविधाने नायिकायाः सत्यभामायाः उत्साहः, माधवेन सत्यभामाप्राप्तेरुत्साहः, स्यमन्तकोद्धारोत्साहश्च दृश्यन्ते ; तृतीये सर्गे नायके, जाम्बवति च रणोत्साहः यथा दृश्यते तथैव जाम्बवति कन्यादानोत्साहोऽपि दृश्यते ; अथ चतुर्थे सर्गे नायके प्रतिनायके च यथाक्रमेण मणिदानोत्साहः, कन्यादानोत्साहश्च दृश्येते । स्थायिभावेन विभावानुभावव्यभिचारिसंयोगाद् रसोऽयं वीरो निष्पद्यते ।

### *विभावाः*

नाट्यशास्त्रानुसारेण वीरस्यास्य कृते सन्ति द्वादशसंख्यका विभावाः "स चासंमोहाध्यवसाय-नयविनयबलपराक्रम-शक्तिप्रतापप्रभावादिभिर्विभावैरुत्पद्यते।"[1] इत्यत्र नवसंख्यका विभावाः, ततः परम् उद्धृतायां आर्यायामस्यामस्ति 'अविषादः', 'अविस्मयम्', 'अमोहः' चेति अतिरिक्तं विभावत्रयम् –

"असम्मोहाध्यवसायादविषादित्वादविस्मयामोहात्।
विविधादर्थविशेषाद्वीररसो नाम सम्भवति ॥ ६/६७॥"[2]

इत्येतेषु कति सन्ति सत्याभामापरिग्रहे इत्यस्मिन् विषये अधस्ताद्विधीयते आलोचनम् –

प्रथमे सर्गे नायको माधवः स्वविषये मिथ्यापवादं श्रुत्वा न मुमोह, न विसिस्मिये, नाभूच्चातिविषण्णः। एतेनैव 'अमोहः', 'अविषादः', 'अविष्मयम्' चेति विभावाः प्रतीयन्ते । अथ अस्मिन्नेव सर्गे सदोमण्डपे स्वजनानां सकाशे स्यमन्तकोद्धारप्रतिज्ञायां विनयाच्छन्नस्य क्षोभस्याभिव्यञ्जनाद् 'विनय' एव प्रतीयते ।

द्वितीये सर्गे मणेरुद्धाराय गमनोद्योगे, गमने, मणेरन्वेषणे च 'याने'न सह 'बल'स्यापि उपस्थितिर्दृश्यते ; बलेनानेन तथा शौरिणा गिरिकन्दरे विवेशे रिपुदमनरूपः 'पराक्रमो'ऽपि द्योतितः। पुनः अत्रत्ये सर्गे धात्रीकुमारयोः कथोपकथने धात्रीवचनेषु नायकस्यास्य माधवस्य शत्रुषु जन्मान्तरीया ख्यातिरेव प्रकाशिता, एतेन 'प्रताप' एवाभिव्यज्यते।

तृतीये सर्गे ऋक्षेशयादवेशयोः वार्तालापे यदुनाथोक्तेषु उक्तिषु 'अध्यवसायः', तयोः उभयोरुक्तिषु च युद्धसामर्थ्यभूता 'शक्ति'रेवाभिव्यज्येते । तयोः युद्धे तु द्योतितो 'विग्रहः'। ततः परं जाम्बवतः अनुरोधेन जाम्बवत्याः पाणिग्रहणे, पुनः चतुर्थे सर्गे सत्राजितेन स्वसुतया द्वारिकापतेः आराधनस्य प्रयत्ने माधवेन सत्यभामापरिग्रहे तदनन्तरं सत्राजिते यौतुकेनप्राप्तभूतस्य मणेः प्रत्यर्पणे 'सन्धि'रेव द्योतिता ।

---

[1] ना.शा.(वन्द्यो.) पृष्ठे १४८

[2] तत्रैव. तत्पृष्ठे

एतद्व्यतीत्य प्रथमे चतुर्थे च सर्गे यथाक्रमेण चारवर्णिते माधवशासिते पौरजनचरितवर्णने, दारुकवर्णिते कृष्णवियोगशोकार्द्दिते द्वारिकावर्णने कुलमानधनयशभूतः 'प्रभाव' एवाभिव्यज्यते । एवमेव सर्व्वे एव विभावाः सन्निवेशिताः अत्रत्ये अङ्गिभूते वीररसे ।

## *अनुभावाः*

नाट्यशास्त्रे प्रायः सप्त अनुभावाः स्वीकृताः अस्याङ्गिरसस्य वीरस्य कृते "तस्य स्थैर्य्यशौर्य्यधैर्य्यत्यागवैशारद्यादिभिरनुभावैरभिनेयः प्रयोक्तव्यः।"[१] इत्यत्रास्ति पञ्चसंख्यकाः अनुभावाः, ततः परम् उद्धृतायां आर्यायामस्ति 'वीर्य्यम्', 'आक्षेपकृतं वाक्यम्' चेति अतिरिक्तमनुभावद्वयम्[२] । एतेषु स्थैर्य्यमस्ति प्रथमे सर्गे माधवेन चारवचनश्रवणे तथा तृतीये सर्गे जाम्बवतो वचनश्रवणे । पुनः तृतीये सर्गेऽस्मिन् माधवजाम्बवतोः कथोपकथने आक्षेपकृतानि वाक्यानि अपि नयनपथमुपयन्ति । अत्रत्ये सर्गे माधवजाम्बवतोः युद्धकर्मवर्णनत्वात् शौर्य्यमित्यनुभावो दृश्यते । चतुर्थे सर्गे सत्राजिते मिथ्यापवादप्रचारिणे राजद्रोहिणे निजबलार्जितस्य स्यमन्तकस्यार्पणे तथा सत्यभामायाः पाणिग्रहणात् परम् उपहारभूतस्य स्यमन्तकस्य सत्राजिते प्रत्यर्पणेन त्याग एव विधीयते । काव्येऽस्मिन् चारवचनानि तथा ऋक्षपतेर्वचनानि निशम्य तत्प्रतिक्रियायां, मणेरन्वेषणे च माधवे धैर्य्यमेव दरीदृश्यते । काव्यस्यास्य तृतीये चतुर्थे च सर्गद्वये स्थिते वृत्तान्ते आदौ जाम्बवता सह युद्धे वीर्य्यम्, ततः परं पराजितस्य ऋक्षयुथपस्य सकाशे स्वविषये मिथ्यापवादापनोदनाय जितस्य स्यमन्तस्य पुनर्याचने, तथा सत्राजिते मणिप्रदानावसरे यथाक्रमेण दण्डसामदानादित्रयाणाम् उपायानां नियोजनयाथार्थ्येन वैशारद्यमपि विधीयते । अतः सर्व्वे एव अनुभावाः चित्रिताः अस्मिन् सत्यभामापरिग्रहे ।

## *व्यभिचारिभावाः*

वीरस्य कृते स्वीकृताः अष्ट व्यभिचारिभावाः"सञ्चारिभावाश्चास्य धृतिमतिगर्वावेगौग्रतामर्षस्मृतिरोमाञ्चादयः।"[३] इति । तेषु प्रथमे सर्गे चारवचने मणिप्रणाशात् क्षुभितस्य सत्राजितः प्रतिक्रिया वर्णने, ततः परं मिथ्यापवादश्रवणात् शौरेः क्षुभितमनोभाववर्णने दृश्यते अमर्षस्य चित्रणम् । पुनः सत्राजिता प्रचारितेन मिथ्यापवादश्रवणेन अप्रियश्रवणजनित आवेगः अभिव्यज्यते । द्वितीये सर्गे कृष्णेन सत्यभामायाः चेष्टितानि स्मरणेन सत्यभामाविषयिनी स्मृतिः (२/१९) ; चिन्ता (२/२०, २१) च दृश्येते । तृतीये सर्गे धात्र्याः आर्त्तस्वरं निशम्य क्रोधदीप्तस्य जाम्बवतः त्वरितागमनवर्णनेन अमर्षेण सह वासनाभिघातज आवेगोऽपि अभिव्यज्यते ; ततः परं मणिहर्त्तारं द्वारकेशं प्रति जाम्बवतो वचनेषु उग्रता, बलगर्वश्च चित्रिताः। पुनः द्वन्द्वे युद्धे पराजितस्य जाम्बवतः सुतायाः पाणिग्रहणस्य

---

[१] ना.शा.(वन्द्यो.) पृष्ठे १४८

[२] तत्रैव. "स्थितिधैर्य्यवीर्य्य..। वाक्यैश्चाक्षेपकृतैर्वीररसः सम्यगभिनेयः॥६/६८॥" इति, पृष्ठे १४९

[३] तत्रैव. पृष्ठे १४८

प्रार्थनापूरणावसरे सत्यभामया हृतचित्तस्य माधवस्य चिन्तापि (३/३३) नयनपथमायातीति । अथ चतुर्थे सर्गे अपराधिना सत्राजिता श्रीकृष्णस्य आराधनाय तस्मै एव स्वसुतायाः प्रदाने मतिरेव प्रकाशिता (४/२२) । एतद्व्यतीत्य समग्रं काव्यमिदं पर्यालोच्य बुध्यते यत्, शौर्येण स्यमन्तकोद्दारात् प्राचुर्येण वित्तधनादिलाभात् तस्योपभोगोऽपि सम्भवति, अतः अभिव्यज्यते अत्र धृतिः। अनेनैव प्रकारेण रोमाञ्चं व्यतिरिच्य वीरस्य सर्व्वे एव व्यभिचारिभावाः सन्निवेशिताः काव्येऽस्मिन् ।

## *अङ्गिरसस्य भेदनिरूपणम्*

सत्यभामापरिग्रहे वीर एव अङ्गी रसः । वीरोऽयं नायके पताकानायके उभयत्रैव विद्यते । रसस्यास्य भेदप्रसङ्गे भरतेन विश्वनाथेन स्वीकृतं यथाक्रमेण त्रैविध्यं चातुर्विध्यं च । तेषु विश्वनाथोक्तं 'दयावीरः' इति भेदं व्यतिरिच्य शेषभूते भेदत्रितये अनयोः मतैक्यं विद्यते । अत इह सत्यभामापरिग्रहे भरतनिर्दिष्टं 'दानवीरः', 'धर्मवीरः', 'युद्धवीरः' चेति भेदत्रितयमेवोपलभ्यते, वीरस्य भेदप्रसङ्गे नाट्यशास्त्रकारः अगादिः –

> "दानवीरं धर्मवीरं युद्धवीरं तथैव च ।
> रसं वीरमपि प्राहुस्तज्ज्ञास्त्रिविधमेव हि ॥६/७९॥"[१] इति।

- **दानवीरः**

अत्रत्ये चतुर्थे सर्गे आदौ स्यमन्तकोद्धारात् परं द्वारिकामागत्य सत्राजितो हस्ते जितस्य स्यमन्तकस्य अर्पणेन तथा सत्यभामापरिग्रहादनन्तरं यौतुकभूतस्य स्यमन्तकस्य सत्राजिते पुनः समर्पणेन द्योतितं नायकस्यास्य माधवस्य दानवीरत्वमित्याशयो मे ।

- **धर्मवीरः**

चारमुखात् सत्राजितो मणिप्रणाशवृत्तं तथा स्वसम्बन्धिनं मिथ्यापवादं श्रुत्वा माधवेन स्यमन्तकोद्धारप्रतिज्ञायां, जाम्बवन्तं प्रति प्रत्युत्तरकाले क्षत्रियानां हरणधर्म्मस्य कथने, पुनः पराजितस्य जाम्बवतः सकाशे कथं स्यमन्तकेन तस्य प्रयोजनमस्तीति वर्णने तस्य धर्मज्ञत्वं, राजधर्मपालनोत्साहश्च अभिव्यज्येते । अतो धर्मवीरोऽयं नायकः।

पुनः पताकानायके जाम्बवानेऽपि धर्मवीरत्वमिदं दृश्यते, यतः स्यमन्तकरक्षणद्वारेण पुत्रस्वार्थरक्षणे आसीत् स उत्साही । पुत्रस्य संरक्षणमेव हि पितुः प्रधानो धर्म इति ।

---

[१] ना.शा.(वन्द्यो.) पृष्ठे १५२

➢ **युद्धवीरः**

अत्रत्ये तृतीये सर्गे जाम्बवता सह माधवस्य कथोपकथने तथा तयोः युद्धे एवाभिव्यज्यते रणोत्साहः। अतस्तयोः कृते युद्धवीरत्वमपि स्थिरमेव इत्यत्र नास्ति सन्देहलेशः।

## अङ्गरसनिरूपणम्

अङ्गिरसनिरूपणादनन्तरं कविराजेन विश्वनाथोक्तेन विधानानुसारेण अङ्गिरसं व्यतिरिच्य सर्वे एव अन्ये रसाः अङ्गत्वमाप्तुं शक्नुवन्ति - "अङ्गानि सर्वेऽपि रसाः"[1] इति। अनेन विधानेन अधुना अस्मिन् सत्यभामापरिग्रहे काव्ये अङ्गीं वीरं विहाय अन्ये रसास्तु अङ्गभूताः, तेषु आधिक्येन वर्णितत्वात् (सर्गाः१-४) श्रृङ्गार एव प्रधानभूतोऽङ्गरसः। अत्रत्ये काव्ये प्रथमे सर्गे चारवचने माधवसकाशे सत्राजितो बलवर्णनप्रसङ्गेन तस्य कन्यारत्नस्य उल्लेखे श्रृङ्गारस्य सूचनं दृश्यते (१/१९)। ततः परं द्वितीये सर्गे द्वारिकापतिं प्रति सत्यभामायाः मनोभाववर्णने, पुष्पवृष्टिकारयन्त्या सत्यभामया सह श्रीकृष्णस्य साक्षात्कारवर्णने श्रृङ्गार एवाभिव्यज्यते (२/८-२१)। अथ समग्रे तृतीये सर्गे केवलं जाम्बवतः प्रार्थनापूरणावसरे एकस्मिन्नेव श्लोके सत्यभामया हृतचित्तस्य माधवस्य उल्लेखे (३/३३) तथा चतुर्थे सर्गे श्रीकृष्णाय कन्यादानविषये सत्राजितः चिन्तने, सत्यभामया सह माधवस्य उपयमवृत्तान्ते (४/२२-३३) श्रृङ्गार एवाभिव्यज्यते ।

काव्येऽस्मिन् सत्यभामापरिग्रहे श्रृङ्गारं व्यतिरिच्य अन्ये गौणाः अङ्गरसा यथा 'बीभत्सः', 'हास्यः', 'भयानकः', 'शान्तः', 'करुण'श्चेत्यादयो रसाः। अधुना रसानामेषां स्थानानि अधस्तात् समासेनैव उपस्थापितानि –

| **सत्यभामापरिग्रहम्** | | |
|---|---|---|
| **अङ्गरसः** | **स.सं.** | **रसस्थानानि** |
| बीभत्सः | २'यः | सत्राजितो भ्रातुः प्रसेनस्य मृगेन्द्रनखक्षतान्विते शववर्णने (श्लोकः२६), पुनः ऋक्षेण व्यापादिते व्यात्ताननमृगेन्द्रशववर्णने च (श्लोकः३४)। |
| हास्यरसः | २'यः | धात्र्या सह आलापकाले ऋक्षशिशोः हसने (श्लोकः६१)। |
| भयानकः | ३'यः | ऋक्षयुथपस्य जाम्बवतः क्रोधान्विते रूपवर्णने (श्लोकौ २, १८ च)। |
| शान्तः | ३'यः | माधवसकाशे स्वपराभवस्य हेतोरनुसन्धानाय जाम्बवता समाधिग्रहणे, समाधौ द्वारकेशं श्रियस्पतिमिति ज्ञात्वा तं प्रति भक्तिप्रदर्शने च (श्लोकौ २७, २८ च)। |
| करुणः | ४'र्थः | दारुकमुखेन कृष्णविरहविधुराया द्वारिकाया वर्णने (श्लोकाः३-१५)। |

सारणी ३.१ : अङ्गरसानां स्थानानि (सत्य.प.)

[1] सा.द.(हरिदास.) पृष्ठे ४२३

## सन्धयः

नाटकमिव महाकाव्येऽपि पञ्चसन्धिसमन्वितत्वमित्यपरं वैशिष्ट्यमेव, तदर्थं निगदितं कविराजेन विश्वनाथेन तदीये ग्रन्थे “सर्वे नाटकसन्धयः।॥६/३०२॥”[1] इति । महाकाव्यस्यैकदेशानुसारित्वात् खण्डे काव्येऽपि लक्षणस्यास्य ग्रहणं भवति । अधुना सत्यभामापरिग्रहे कथावस्तौ सन्धेः प्रयोगस्थानानि अधस्तादुपस्थाप्यन्ते -

| सत्यभामापरिग्रहम् | | |
|---|---|---|
| | सन्धीनां नामानि | सन्धिना व्याप्यानि स्थानानि |
| पञ्चसन्धयः | मुखसन्धिः | प्रथमसर्गादारभ्य द्वितीये सर्गे एकविंशतितमं श्लोकं यावदस्ति मुखसन्धिः । |
| | प्रतिमुखसन्धिः | द्वितीये सर्गे त्रयविंशतितमश्लोकतः त्रिषष्टितमं श्लोकं यावदस्ति प्रतिमुखसन्धिः। |
| | गर्भसन्धिः | द्वितीयसर्गस्य अन्तिमश्लोकद्वयात् (श्लोकौ ६४, ६५) तृतीये सर्गे सप्तविंशतितमस्य श्लोकस्य पूर्वार्धं यावद् विद्यते गर्भः। |
| | विमर्षसन्धिः | अथ तृतीये सर्गे पूर्वोक्तश्लोकस्य उत्तरार्धात् सर्गान्तं यावद् विमर्षस्य उपस्थितिरेव दृश्यते । |
| | उपसंहृतिः | निर्वहणसन्धेः स्थलं तु समग्रः चतुर्थः सर्ग एव । |

सारणी ३.२ : पञ्चसन्धयः (सत्य.प.)

## काव्यवृत्तान्तविधानम्

कृष्णद्वैपायनवेदव्यासप्रणीते श्रीमद्भागवते महापुराणे दशमे स्कन्धे षट्पञ्चाशत्तमे अध्याये ‘स्यमन्तकोपाख्यानम्’ एव सत्यभामापरिग्रहस्य उपजीव्यरूपेण परिगृह्यते । अतः श्रीमद्भागवतान्तर्गतत्वात् काव्यस्यास्य वृत्तान्तस्तु इतिहासोद्भूत एव । पुनः सत्यभामापरिग्रहस्य आख्याने नायकस्य द्वारकेशस्य जीवनचरितस्य पर्वमेकं चित्रितमस्ति सुष्ठुतया । नायकः श्रीकृष्णस्तु सज्जनो विष्णोरवतारभूतत्वादिति । अतो वृत्तान्तोऽयं सज्जनाश्रितः, इत्यनेनैव प्रतिपद्यते यद् हेमचन्द्रप्रणीते अस्मिन् क्षुद्रे काव्ये आख्याने भागे महाकाव्यमिव इतिहासोद्भवत्वं, सज्जनाश्रयत्वञ्चेति वैशिष्ट्यद्वयमेवोपलभ्यते । प्रसङ्गेऽस्मिन् महाकाव्यस्य कृते विश्वनाथोक्तं वृत्तान्तविधानमेव अनुसन्धेयम् – “इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ॥६/३०२॥”[2] इति।

---

[1] सा.द.(हरिदास.) पृष्ठे ४२३

[2] तत्रैव. तत्पृष्ठे

## प्रयोजनविचारणा

महाकाव्यस्यैकदेशानुसारित्वात् खण्डकाव्येऽपि धर्मार्थकाममोक्षरूपाः चत्वार एव वर्गा वर्णनीयाः, तेषु यत्किञ्चिदेको मुख्यप्रयोजनरूपेणापि चित्रितो भवति । मानमस्मिन् प्रसङ्गे विश्वनाथोक्तिः – "चत्वारस्तस्य वर्गाः स्युस्तेष्वेकश्च फलं भवेत् । ॥६/३०२॥"[१] इति । अत्रत्ये सत्यभामापरिग्रहे वर्णितेषु वर्गचतुष्टयेषु कामस्यैव वर्णनाधिक्यं दरीदृश्यते । अत एव शेषान् त्रीन् वर्गान् (धर्मार्थमोक्षान्) आलोच्यैव विहिता काम इति वर्गस्य चर्चा ।

काव्येऽस्मिन् प्रथमे सर्गे श्लोकद्वितये (श्लोकौ १४, १५ च) स्यमन्तकमणेः रूपवर्णने माहात्म्यवर्णने च विहिता अर्थस्य वर्णना कविना हेमचन्द्ररायेण । अथ तृतीये सर्गे जाम्बवता सह श्रीकृष्णस्य कथोपकथने माधवोक्तेषु वचनेषु (श्लोकाः १३-१७) क्षत्रियधर्म्मस्य वर्णनमुपलभ्यते, अस्य दिङ्मात्रमुदाहरणं यथा –

"न केवलं क्षत्त्रकुलस्य सा स्थितिर्बलेन रत्नं ह्रियते न केन वा ।
कथं न निर्जित्य हरिं यथा भवान् भवन्तमन्योऽपि बली हरेन्मणिम् ॥३/१४॥"[२] इति।

पुनः चतुर्थे सर्गे तेनैव मणिना सह द्वारिकाप्रवेशेन, सत्राजिते मणिसमर्पणेन च मुच्येते सत्राजितप्रचारितो प्रसेनहत्यापवादो मणिहरणापवादश्च इत्यनेन मिथ्यापवादात् श्रीहरेः मुक्तिरेव द्योतिता । अतो विहितमत्र मोक्षरूपवर्गस्य परोक्षं वर्णनमिति ।

वर्गानेतान् व्यतिरिच्य प्रायः समग्रे काव्ये विविधप्रकारस्य कामस्य उपस्थितिरेव दरीदृश्यते । पुनः सत्यभामया सह माधवस्य परिग्रह एव काव्यस्यास्य मुख्यं फलम्, अतः काम एव 'सत्यभामापरिग्रहमि'ति काव्यस्य मुख्यप्रयोजनमिति । अतः काव्येऽस्मिन् कामस्य मुख्यत्वप्रतिपादनत्वात् प्रायः सर्वेषु सर्गेषु कामस्य यद् वर्णनमुल्लेखनं वा दृश्यते, तदेव समासेनालोच्यते अधस्तात्, तद् यथा –

प्रथमे सर्गे षोडशे श्लोके मृगयाविहारिणः प्रसेनस्य मृगयातः अनागमनकथनप्रसङ्गे काम एव द्योतितो यतो मृगया तु कामजव्यसनमेवेति । ततः परं सप्तदशे अष्टदशे च श्लोके दृश्यते मणिप्रणाशात् क्षुभितेन सत्राजितेन प्रचारितेन माधवविषयकेन मिथ्यपवादेन काम एव प्रतिफलितो जातः ।

अथ द्वितीये सर्गे दृश्यते यद्, वने प्रसेनं हत्वा सिंहेन हृतं स्यमन्तकम्, ततः परं मृगेन्द्रं हत्वा ऋक्षयुथपेन हृतं तद्रत्नम् । पुनः अन्तिमे अस्ति ऋक्षशिशोः करात् श्रीहरिणा मणिहरणस्य वृत्तमित्येतेन प्रकटिता मणिग्रहणेच्छा । एतद्व्यतीत्य सर्गस्यास्य आदौ सत्यभामया सह माधवस्य साक्षात्कारः, तयोः मध्ये अनुरागोत्पत्तिरपि दृश्येते । अत एव सर्गेऽस्मिन् काम एवाधार इति ।

---

[१] सा.द.(हरिदास.) पृष्ठे ४२३

[२] सत्य.प.(द्वि.सं.) पृष्ठे २१

तृतीये सर्गे स्यमन्तकलाभाय माधवजाम्बवतोः युद्धवर्णने तथा तयोः परस्परजयाभिलाषवर्णने काम एवाभिव्यज्यते । पुनः पराजितस्य जाम्बवतः कृष्णाय कन्यादानेच्छावर्णनेन, सत्यभामया हृतचित्तस्य माधवस्य उल्लेखेन, माधवेन जाम्बवतः प्रार्थनापूरणेन कामस्यैव पूर्त्तिः दृश्यते, नान्यथा ।

चतुर्थे सर्गे महिष्याः रुक्मिण्याः मानभञ्जने, अपयशमार्ष्टुकामेन कृष्णेन सत्राजिताय मणिसमर्पणे, माधव-सत्यभामयोः मिलने चेत्यादिष्वपि कामस्यैव पूर्त्तिरेव द्योतिता ।

## सतां गुणकीर्तनं खलनिन्दा च

महाकाव्येषु सतां गुणकीर्तनं तथा खलानां निन्दा अपरं वैशिष्ट्यम्, तदुक्तं साहित्यदर्पणे – "क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्तनम्। ॥६/३०२॥"[१] इति । परन्तु विधानस्यास्य सम्यगनुसरणं न दृश्यते सत्यभामापरिग्रहे । यतः साधारणतया काव्येषु नायक एव सज्जनरूपेण चित्रितो भवति, प्रतिनायकस्तु खलरूपेण । इह तु आदौ प्रथमे सर्गे चारोक्तेषु वाक्षु (१/३-२१) नायको द्वारकाधीशः श्रीकृष्णः सज्जनरूपेणैव चित्रितोऽस्ति । किन्तु एष एव सज्जनो नायकः तृतीये सर्गे ऋक्षशिशोः हस्ताद् स्यमन्तकमणिहरणत्वाद् ऋक्षयुथपस्य जाम्बवतः सकाशे खलरूपेण चित्रितो जातः, अपि च खलत्वेन चित्रितत्वाद् दृश्यते जाम्बवता द्वारिकापतेः निन्दा (३/६-११) ।

## वृत्तविधानम्

अस्मिन् विषये सत्यभामापरिग्रहे महाकाव्यस्य वृत्तविधानस्य लक्षणमनुस्रियते पुङ्खानुपुङ्खेन । यतो महाकाव्यमिव काव्ये अधिकांशाः सर्गाः (सर्गाः१-३) एकप्रकारछन्दोभिर्बद्धाः, तत्र सर्गान्ते तु सन्ति वृत्तान्तराणि । पुनः अत्रत्ये एकस्मिन् सर्गे (४र्थः सर्गः) नानावृत्तमयत्वमपि दृश्यते लक्षणानुसारेण इति । तथा चोच्यते विश्वनाथेन –

"एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ॥
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ॥६/३०२॥"[२] इति।

काव्यस्यास्य सर्गेषु वृत्तविधानं यथा –

---

[१] सा.द.(हरिदास.) पृष्ठे ४२३

[२] तत्रैव. पृष्ठे ४२३, ४२४ च

| ख.का. | स.सं. | सर्गनाम | वृत्तविधानम् | |
|---|---|---|---|---|
| | | | सर्गादिमध्यौ | सर्गान्ते |
| स त्य भा मा प रि ग्र ह म् | १'मः | कृष्णाभिशस्तिः (श्लो.सं. ३२) | उपेन्द्रवज्रा (श्लोकौ १,२); उपजातिः (श्लोकाः ३-३०) | मालिनी (श्लोकौ ३१,३२) |
| | २'यः | मणिविचयः (श्लो.सं. ६५) | अनुष्टुप् (श्लोकाः १-६२) | शार्दूलविक्रीडितम् (श्लोकौ ६३,६४); द्रुतविलम्बितम् (श्लोकः ६५) |
| | ३'यः | जाम्बवत्स-मागमः (श्लो.सं. ३४) | वंशस्थविलम् (श्लोकाः १-३०) | वसन्ततिलकम् (श्लोकः३१), शार्दूलविक्रीडितम् (श्लोकः३२), सुन्दरी(श्लोकः३३), मालभारिणी (श्लोकः ३४) |
| | ४'र्थः | परिग्रहः (श्लो.सं. ३३) | वृत्तविधानम् (नानावृत्तमयत्वम्) | |
| | | | सुन्दरी (श्लोकाः १-२४) ; शालिनी (श्लोकौ २५, ३१) ; वंशस्थविलम् (श्लोकः २६) ; प्रहर्षिणी (श्लोकः २७) ; वसन्ततिलकम् (श्लोकाः २८, २९, ३०, ३२) ; मालिनी (श्लोकः ३३) । | |

सारणी ३.३ : वृत्तविधानम् (सत्य.प.)

## सर्गान्तविधानम्

महाकाव्यमिव सत्यभामापरिग्रहमिति क्षुद्रे काव्येऽपि सर्गाणामन्ते भाविसर्गस्य कथा सूचिता कविभूषणेन हेमचन्द्रेण । सर्गान्तविधानविषये विश्वनाथेनोच्यते – "सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ॥६/३०२॥"[1] इति। वैशिष्ट्यस्यास्य उदाहरणानि यथा –

| सत्यभामापरिग्रहम् | | |
|---|---|---|
| स.सं. | सर्गनाम | भाविसर्गस्य कथायाः सूचनम् |
| १ | कृष्णा-भिशस्तिः | अत्र अन्तिमे श्लोकचतुष्टये (श्लोकाः २९-३२) स्यमन्तकोद्धारप्रतिज्ञया तथा मणेरन्वेषणाय गमनोद्यमेन द्वितीये सर्गे चित्रितानि श्रीकृष्णस्य प्रयाणम्, मणेरन्वेषणञ्चेत्यादीनि वृत्तानि सूचितानि । |

[1] सा.द.(हरिदास.) पृष्ठे ४२४

| | | |
|---|---|---|
| २ | **मणिविचयः** | अत्रत्ये अन्तिमे श्लोकद्वये (श्लोकौ ६४, ६५) आदौ दृश्यते ऋक्षशिशोः करात् स्यमन्तकहरणम्, ततः परं भयत्रस्तया धात्र्या भल्लूकमल्लस्य प्रभोराह्वानम् । अन्तिमे श्लोके ऋक्षशिशोः प्रमुखे मणिधारिणो माधवस्य अवस्थानमेव दृश्यते । एतेन परवर्तिनि सर्गे ऋक्षयुथपस्य जाम्बवतः आगमनम्, जाम्बवता सह माधवस्य साक्षात्कारो, तयोः युद्धञ्चेत्यादयो वृत्तान्ताः द्योतिताः। |
| ३ | **जाम्बवत्समागमः** | अत्रत्ये अन्तिमे श्लोके जाम्बवतो गिरिकन्दराद् वनितया जाम्बवत्या सह सस्यमन्तकस्य श्रीकृष्णस्य निर्गमनेन द्योत्यते यदुत्तरवर्तिनि सर्गे सत्राजिताय स्यमन्तकसमर्पणं भविष्यतीति । पुनः सर्गस्यास्य उपान्तिमे श्लोके "हृतचित्तोऽपि स सत्यभामया।॥३/३३॥"[1] इत्यंशेन परवर्तिनि सर्गे सत्यभामया सह जनार्दनस्य भाविमिलनमपि भविष्यति स्यमन्तकोद्धारत्वादिति स्फुटितमस्ति । |

सारणी ३.४ : सर्गान्तविधानम् (सत्य.प.)

## सर्गनामविधानम्

सर्गचतुष्टयान्विते सत्यभामापरिग्रहे केवलं प्रथमे संस्करणे महाकाव्यस्य सर्गाणामिव सन्ति सर्गनामानि । सर्गाणां नामकरणप्रसङ्गे विश्वनाथेनोक्तम् "नामास्य सर्गोपादेयकथया सर्गनाम तु ॥६/३०२॥"[2] इति। अर्थात्, सर्गगतेषु वृत्तेषु यद् अतीव रमणीयम्, तदनुसारेणैव भवेत् सर्गस्य नामकरणम् । सत्यभामापरिग्रहस्य सर्गाणां नामकरणस्य याथार्थ्यं अधस्थाद् विचार्य्यते –

| **सत्यभामापरिग्रहम्** | |
|---|---|
| **सर्गनाम** | **नामकरणस्य याथार्थ्यम्** |
| **कृष्णाभिशस्तिः** | द्वारिकानिवासिना सत्राजितेन प्रचारितो मृगयागतस्य प्रसेनस्य बधादनन्तरं माधवेन हृतं स्यमन्तकमिति मिथ्यापवादः, तथा तस्यापवादस्य प्रतिकाराय माधवेन विहिता स्यमन्तकोद्धारप्रतिज्ञा इत्येव सर्गस्यास्य मूलवर्णनीया कथा । सैव कथा सर्गेऽस्मिन् वर्णनसौकर्य्येण रामणीयकं धत्ते । अतः सार्थकमेवास्य सर्गस्य नाम । |
| **मणिविचयः** | सर्गेऽस्मिन् स्यमन्तकोद्धाराय श्रीकृष्णस्य प्रयाणं, प्रयाणकाले माधवसत्यभामयोः साक्षात्कारः, ततः परं मणेरन्वेषणं प्रापणञ्चेत्यादीनि वृत्तानि वर्णितानि, तेषु मणेरन्वेषणमेव मुख्यम् । वृत्तमिदं पूर्वोक्तेन गौणवृत्तद्वयेन, सरलभाषया च रमणीयतामाप्नोति । अपि तु मणेरन्वेषणस्य वृत्तमेव सर्गेऽस्मिन् आधिक्येन वर्णितमस्ति । अतो युक्तमिदं नाम । |

[1] सत्य.प.(द्वि.सं.) पृष्ठे २५

[2] सा.द.(हरिदास.) पृष्ठे ४२४

| | |
|---|---|
| **जाम्बव-त्समागमः** | कुमारधात्र्या आर्ताह्वानेन ऋक्षयुतपस्यागमनम्, माधवजाम्बवतोः साक्षात्कारः कथोपकथनञ्च, तयोर्युद्धम्, युधि जाम्बवता पराजयस्वीकारः, मणिना सह गृहागमनार्घ्यभूतां स्वसुतां जाम्बवतीं माधवाय दानमित्यादीनि वृत्तानि सन्निवेशितानि अत्रत्ये सर्गे । वृत्तानि इमानि नैव सम्भवन्ति यदि न स्याद् जाम्बवतः समागमः, अतस्तस्यागमनमेव मुख्यमिति । एतेनैव बुध्यते सुयुक्तमिदं नाम । |
| **परिग्रहः** | सत्यभामया सह द्वारकाधीशस्य मिलनमिति फलमेव सर्गस्यास्य उपजीव्यमिति । अपि च अस्मिन् सर्गे आदौ माधवेन रुक्मिणीसकाशे नवपरिगृहीतायाः जाम्बवत्याः स्थापनं यथा दृश्यते तथैव स्यमन्तसमर्पणादनन्तरं सत्राजितानुरोधेन सत्यभामया सह माधवस्य मोदपूर्णं मिलनं, उपयमं च वर्णितं मनोहारित्वेन । सर्गस्यास्य आदौ दृश्यते नवपरिगृहीता जाम्बवती, सर्गान्तिमे भागे च दृश्यते नवपरिगृहीता सत्यभामा । परिग्रहमेवात्र मुख्यमिति । अतो युज्यते नामकरणोऽयम् । |

सारणी ३.५ : सर्गनामविधानम् (सत्य.प.)

## गौणलक्षणानि

महाकाव्यलक्षणानाम् एकदेशानुसारित्वाद् महाकाव्यस्य गौणानि लक्षणान्यपि एकदेशेन अनुसृतानि भवन्ति खण्डकाव्ये । अतो विश्वनाथकविराजमहाभागेन प्रोक्तानि गौणलक्षणानि यथा -

"सन्ध्या-सूर्य्येन्दु-रजनी-प्रदोष-ध्वान्त-वासराः॥
प्रातर्मध्याह्न-मृगया-शैलर्त्तु-वन-सागराः।
सम्भोग-विप्रलम्भौ च मुनि-स्वर्ग-पुराध्वराः॥
रणप्रयाणोपयम-मन्त्र-पुत्रोदयादयः।॥६/३०२॥"[१]

इत्येतेषु लक्षणेषु कानिचन सन्निवेशितानि सत्यभामापरिग्रहे, तानि यथा –

| **सत्यभामापरिग्रहम्** | | |
|---|---|---|
| **गौणलक्षणानि** | **गौणलक्षणान्वितानि स्थानानि** | |
| **क. मृगयावर्णनम्** | **सर्गः१** | इह केवलं षोडशे श्लोके प्रसेनस्य मृगयागमनस्य उल्लेखेन विहिता मृगयावर्णना । |
| **ख. शैलवर्णनम्** | **सर्गः२** | सर्गेऽस्मिन्नस्ति ऋक्षाणां निवासभूतस्य गिरेः वर्णनम् (श्लोकाः ८६-४१) । |
| **ग. वनवर्णनम्** | **सर्गः२** | इह पञ्चविंशतितमे श्लोके स्यमन्तकान्वेषणवर्णनावसरे वनस्य उल्लेखो विद्यते । |
| **घ. नदीवर्णनम्** | **सर्गः२** | अत्रत्ये श्लोकचतुष्टये (श्लोकाः ३०-३३) विद्यते नर्मदायाः वर्णना । |
| **ङ. पुरवर्णनम्** | **सर्गः१** | अत्र चारमुखाद् माधवसकाशे पौरजनवृत्तान्तवर्णनावसरे विहिता पुरवर्णना । |

[१] सा.द.(हरिदास.) पृष्ठे ४२४

| | | |
|---|---|---|
| | **सर्गः४** | अत्र दारुकेन वर्णितमस्ति कृष्णवियोगशोकार्दितं द्वारिकावर्णनम् (श्लोकाः२-१५)। |
| **च. अध्वरवर्णनम्** | **सर्गः१** | सर्गेऽस्मिन् अष्टमे श्लोके यज्ञस्य उल्लेखो दृश्यते । |
| **छ. रणवर्णनम्** | **सर्गः३** | अत्रास्ति द्वारकेशऋक्षयुथपयोः द्वन्द्वयुद्धस्य वर्णनम् (श्लोकाः १९-२४)। |
| **ज. प्रयाणवर्णनम्** | **सर्गः१** | सर्गेऽस्मिन् अन्तिमे श्लोके स्यमन्तकोद्धाराय प्रयाणोद्यमो दृश्यते । |
| | **सर्गः२** | अत्र विद्यते मणेरुद्धाराय श्रीकृष्णस्य प्रयाणम् अन्वेषणञ्च (श्लोकाः१-४६)। |
| **झ. उपयमवर्णनम्** | **सर्गः३** | माधवसकाशे पराजितस्य जाम्बवतः अनुरोधे (श्लोकः३१), माधवेन तस्य प्रार्थनापूरणे, गुहातो निर्गमने च द्योतिता जाम्बवत्या सह द्वारिकापतेः उपयमवर्णना (श्लोकौ ३३, ३४)। |
| | **सर्गः४** | अत्रत्ये श्लोकषट्के (श्लोकाः२६-३१) वर्णितं माधवसत्यभामयोः उपयमवर्णनमिति। |

सारणी ३.६ : गौणलक्षणान्वितानि स्थानानि (सत्य.प.)

## काव्ये उपस्थापितानां चरित्राणामालोचनम्

### श्रीकृष्णः

सत्यभामापरिग्रहस्य नायकत्वाद् द्वारिकापतेः श्रीकृष्णस्य चरित्रे नायकगतानि सर्व्वाण्येव वैशिष्ट्यानि यथा – त्यागी-कृती-कुलीनादीनि, पुनः धीरोदात्तत्वात् तस्मिन् सन्निवेशितानि अविकत्थनादीन्यपि वैशिष्ट्यानि । वैशिष्ट्यानि इमानि व्यतिरिच्य मुख्ये चरित्रे अस्मिन् दाक्षिण्यमिति गुणः अपि दृश्यते । यत आसीत् स तस्य महिषीत्रितये समरागः, उच्यते च साहित्यदर्पणे "एषु त्वनेकमहिलासु समरागो दक्षिणः कथितः ॥३/४२॥"[1] इति । तस्य दाक्षिण्यस्य उदाहरणं दृश्यते खण्डकाव्यस्यास्य श्लोकद्वितये –

"अभिमानवतीञ्च रुक्मिणीं तव दासीयमिति प्रसादयन् ।..॥४/२०॥
तिसृभिरथ वधूभिः सेवितः सुव्रताभिः श्रिततनुभिरिवासौ शक्तिभिर्वासुदेवः।॥४/३३॥"[2] इति।

पुनः विष्णोरवतारभूतत्वाद् अगाधसत्त्वत्वाद् नायकत्वाच्च श्रीमाधवे शोभा, विलासः, माधुर्य्यम्, गाम्भीर्य्यम्, धैर्य्यम्, तेजः, ललितम्, औदार्य्यम् इत्यादीनां सात्त्विकानां गुणानामुपस्थितिरपि काम्यैव ; अतः प्रसङ्गेऽस्मिन् नायकगतानां सात्त्विकानां गुणविषये साहित्यदर्पणकृन्मतमेव मानम्[3]। एतेषु कति गुणाः तस्मिन् श्रीकृष्णे सन्निवेशिताः तदधस्तादेव आलोच्यन्ते –

---

[1] सा.द.(हरिदास.) पृष्ठे ९३

[2] सत्य.प.(द्वि.सं.) पृष्ठे ३०, ३२ च

[3] सा.द.(हरिदास.) "शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी । ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥३/६१॥" इति, पृष्ठे १०३

प्रथमे सर्गे चारवचनेषु द्वारिकायाः सुखस्वच्छन्दवर्णने द्वारकेशस्य देवधर्मिता प्रशासनिकी दक्षता च द्वौ एवाभिव्यञ्जिता, दिङ्मात्रमस्योदाहरणं यथा –

"स्वयं वसत्यत्र जगन्निवासे नाथे यदूनां त्वयि लोकनाथे ।
स्वर्लोकलक्ष्म्यामधरीकृतायामुपैति किन्नाम जनो न सौख्यम् ॥१/३॥"[1] इति।

अस्मिन्नेव सर्गे अन्तिमे भागे स्यमन्तकोद्धारप्रतिज्ञायां गमनोद्योगे च प्रकाशितस्तस्य महोत्साहः। पुनः चारमुखात् सत्राजित्प्रचारितेन मिथ्यापवादेन सत्राजितं तथा पौरजनान् प्रति तस्यानादरं न दृश्यते, अपि तु व्यथितेन तेन सभायाम् उद्घोषितः स्यमन्तकोद्धारसंकल्पः अपवादापनोदनाय, येनाभिव्यज्यते सर्व्वान् प्रति तस्यानुरागः ।

आसीत् सत्राजिद् मिथ्यापवादी लुब्धश्च एतेनैव तस्य नीचप्रकृतित्वमेव सूच्यते, नीचस्यास्य अपवादेन कलङ्कितयशोऽपि स मधुसूदनः परमकृपया तस्य निधिभूतं मणिमुद्धारयित्वा तं समर्पितवान्, अत आसीन्माधवो नीचान् प्रति दयालुः।

तृतीये सर्गे स्यमन्तकलाभाय माधवेन जाम्बवन्तं द्वन्द्वयुद्धे आह्वाने द्योतितो जातो नायकस्यास्य प्रवलं प्रति स्पर्धारूपो गुणः, श्लोकेनैकेन –

"कथन्नु जानन् प्रथितां कुलस्थितिं मणिं विहास्यामि भियात्मना हृतम् ।
अथासि शक्तस्त्वमिह स्वयंग्रहे यतस्व, - वीर्य्यातिशयः पदं श्रियः॥३/१७॥"[2] इति।

स्यमन्तकेन सह प्रत्यावर्तनोत्साहे तथा पराभूतस्य जाम्बवतः सकाशे स्यमन्तकेन तस्य प्रयोजनवर्णने माधवस्य सत्यनिष्ठता तथा सत्यप्रतिष्ठायां व्यग्रतापि व्यञ्जिता ।

अस्मिन्नेव तृतीये सर्गे स्यमन्तकपाणिं केशवं स्वगिरिकन्दरे दृष्ट्वा अमर्षप्रदीप्तेन ऋक्षयुथपेन माधवनिन्दाकाले तस्य यद् वर्णनं विहितं, तस्यैव वर्णनस्यैकदेशे माधवस्य राजन्यकुलोचिता गतिरेव वर्णिता - "न भीतिलेशोऽपि यदस्ति ते मुखे गतिश्च राजन्यकुलोचितैव यत्।..॥३/७॥"[3] इति। पुनः, प्रथमे सर्गे प्रचारितां मिथ्यापकीर्तिमवगम्य लोकास्यरङ्गेषु विहरणशीलायाः तस्यापकीर्तेरपनोदनाय स माधवः सिंहासनं परित्यज्य सभामागतवान्, प्रसङ्गेऽस्मिन् हेमचन्द्रेण स माधवो 'नृसिंहः' इति विशेषणेन विशेषितो जातः। येन तस्य दृप्तगमनमेव द्योत्यते - "..सिंहासनादुच्चलितो नृसिंहः सद्यः सदोमण्डपमाससाद ॥१/२५॥"[4] इति ।

[1] सत्य.प.(द्वि.सं.) पृष्ठे ५

[2] तत्रैव. पृष्ठे २२

[3] तत्रैव. पृष्ठे २०

[4] तत्रैव. पृष्ठे १०

पुनस्तस्मिन्नेव तृतीये सर्गे जाम्बवता श्रीकृष्णस्य रूपदर्शनवर्णने कविना माधवः 'स्मेरमुखम्' इति विशेषणेन विशेषितो जातः । येन हास्यमयमाननमेव चित्रीयते, एतेन परस्मिन् अंशे जाम्बवता सह वार्तायां माधुसूदनस्य वचनानि मृदुहास्ययुक्तानि भवन्तीति अनुमीयते ।

अथ द्वितीये सर्गे द्वारिकात्यागावसरे नगरमार्गे सत्यभामया सह शौरेः साक्षात्कारे शौरिणा सत्यभामायाः रूपदर्शनं यथा वर्णितम्, तथैव तयोः अन्योन्यनयनद्वन्द्वसंगतिरपि वर्णिता । येन उभयस्य दृष्टेः चाञ्चल्याभावः, अनुरागश्च अभिव्यज्येते सहृदयानां सकाशे ।

पुनरस्मिन्नेव सर्गे ससैन्यैः ऋक्षपदाङ्कानुसरणेन माधव उत्तुङ्गे गिरिपृष्ठे सिंहाद् मणिहरणकारिण ऋक्षस्य पातालमिव गम्भीरं तमःसंघातसंवृतं कन्दरं प्राप्तवान् । तद्दृष्ट्वा सर्व्वे सैन्याः भीताः उद्वेजिताः जाताः परन्तु अनुद्विग्नः स हरिः स्वभूजबलमाश्रित्य सैनिकान् परिजनान् च समाश्वास्य प्रविवेश दरीम् – इत्यत्र अनुद्वेजितत्वाद् माधुर्य्यवानयं नायकः।

ततःपरं सर्गस्यास्य द्वितीयस्य अन्तिमे अंशे ऋक्षकुमारधात्र्या भल्लुकमल्लस्य ऋक्षयुथपस्य जाम्बवतः आह्वानेन स्यमन्तकप्राप्तिरूपफलस्य कृते जाम्बवान् इति महाविघ्नस्य अवतारणा एव विहिता । अत्र महाविग्घस्यागमनं ज्ञात्वापि श्रीकृष्णस्य अविचलता एव चित्रिता सर्गस्य अन्तिमे श्लोके –

"रुदत ऋक्षशिशोः प्रमुखे हसंश्चकितयोषिदवेक्षितविक्रमः।
मणिमयूखचयच्छुरिताङ्गुलिः श्रियमधत्त नवामिव माधवः॥२/६५॥"[१] इति।

काव्यस्यास्य प्रथमे सर्गे सत्राजितेन प्रचारितं मिथ्यापवादं ज्ञात्वा क्रोधानुभवे, ततः परं त्वरितमेव सभागृहं गत्वा स्यमन्तकोद्धारप्रतिज्ञायां ; द्वितीये सर्गे स्यमन्तकोद्धाराय द्वारिकात्यागे अटव्यां निरन्तरानुसन्धाने, एकाकी एव प्रतिज्ञारक्षार्थं गिरिकन्दरे प्रवेशे ; तृतीये सर्गे पराजितस्य जाम्बवतः सकाशे कथं स्यमन्तकेन तस्य प्रयोजनमस्तीति कथने रिपुप्रयुक्तापवादं प्रति द्वारकेशस्य असहनीयता एव स्फुटिकृता कविना हेमचन्द्रेण ।

एतद्व्यतीत्य जाम्बवन्तं तथा स्वापभाषिणं सत्राजितं प्रति प्रियवाक्यप्रयोगे, पुनः उभयस्य अनुरोधेन सख्यस्थापनाय तेषां कन्यकानां पाणिग्रहणमपि कृतं मधुसूदनेन, एतेन शत्रौ मित्रौ च तस्य समभाव एवास्माकं नयनपथमुपैति । अतः अगाधसत्त्वस्य शौरेः चरित्रे केवलं ललितमिति गुणं विहाय शेषाः सर्व्वे एव सात्त्विकाः गुणाः सन्निवेशिताः कविनामुना हेमचन्द्रेण इति शम् ।

---

[१] सत्य.प.(द्वि.सं.) पृष्ठे १८

## सत्राजित्

सामान्येन नायकस्य रिपुरेव प्रतिनायकरूपेण उपस्थाप्यते काव्यकृतिषु । अत्रत्ये सत्यभामापरिग्रहे अपि नायकस्य रिपुभूतो जन एव सत्यभामायाः पिता सत्राजित् । आलंकारिकाचार्येण धनञ्जयेन प्रणीते दशरूपके दृश्यते यद्- लुब्धः, उद्धतः, स्तब्धः, पापकारी, व्यसनासक्तो रिपुरेव प्रतिनायकः "अथ प्रतिनायकः – लुब्धो धीरोद्धतः स्तब्धः पापकृद् व्यसनी रिपुः ॥२/९॥"[१] इति । विश्वनाथकृते लक्षणेऽपि प्रायः अस्य प्रतिध्वनिरेव श्रुयते "धीरोद्धतः पापकारी व्यसनी प्रतिनायकः ॥३/१३७॥"[२] इति ।

सत्राजितो वर्णनं दृश्यते प्रथमे सर्गे चारवचनेषु, द्वितीये सर्गे दारुकवचने, चतुर्थे सर्गे माधवाद् मणिलाभवर्णनावसरे च । अधुना पूर्वोक्तेषु गुणेषु कति गुणाः सत्राजिति सन्ति इत्यस्मिन् विषये विचारणं कर्त्तव्यम् –

प्रथमे सर्गे चारवचनेभ्यः अवगम्यते यत्, श्रीकृष्णः यदूनां गोष्ठीपतेः कृते स्यमन्तकं याचितवान्, परन्तु सत्राजित् तं स्यमन्तकं न अदाद् धनलोभाद् औद्धत्यवशाच्च । पुनः अस्मिन्नेव सर्गे यदा तमेव मणिं कन्ठमारोप्य सत्राजितो भ्राता मृगयाविहारी प्रसेनः वनं गत्वा न पुनर्निवृत्तः तदा स मणिप्रणाशक्षुभितान्तरात्मा सत्राजित् श्रीकृष्णमेव मणिप्रणाशस्य तथा भ्रातृप्रणाशस्य कारणं मत्वा - 'श्रीकृष्णेन हृतं स्यमन्तकं हत्वा प्रसेनमि'ति मिथ्यापवादं पौरजनेषु प्रचारितवान् । एतेनैव सत्राजितः स्तब्धत्वमेव द्योत्यते ।

अथ द्वितीये सर्गे सारथिना दारुकेन स सत्राजिद् राज्ञः अपभाषीरूपेण अभिधीयते – "पश्य सत्राजितः पुत्री राज्ञस्तदपभाषिणः।॥२/११॥"[३] इत्यत्र "अपभाषिणः" इति विशेषणेन वाक्पारुष्यमेव बुध्यते, वाक्पारुष्यन्तु क्रोधजव्यसनेषु अन्तर्याति अत आसीत् स सत्राजित् व्यसनीति नास्ति सन्देहः। पुनरस्मिन्नेव द्वितीये सर्गे सारथिना दारुकेन स एव सत्राजिद् "अहितस्य..॥२/१२॥"[४] इति पदेन 'मूर्त्तमहितम्' इति रूपेणाभिधीयते । वयं सर्व्वे एव जानिम यत्, श्रीविष्णोरवतारभूतो माधवस्तु जगतो हितसाधनाय एव धरायाम् अवततार, अतः स एव हितस्य मङ्गलस्य वा मूर्त्तविग्रहः। अधुना कवि हेमचन्द्रः दारुकमुखेन सत्राजितं 'मूर्त्तमहितम्' इति प्रकारेण उपस्थापयति । हितस्य रिपुरेव अहितम् अतः श्रीकृष्णस्य रिपुरेव सत्राजित् । एतेनैव प्रतिपादितं तस्य रिपुत्वमिति ।

ततः परं सत्यभामापरिग्रहे चतुर्थे सर्गे दृश्यते यत् सभामध्ये माधवात् स्यमन्तकमवाप्य सत्यञ्चानुभूय यदूद्वहस्य प्रसङ्गे मिथ्यापवादप्रचारणं स्मृत्वा स सत्राजिद् लज्जितो जातः "अपराद्धमकारणं मया महतोऽस्येति बभूव

[१] दश.रू.(वेङ्कट.) पृष्ठे ८७

[२] सा.द.(हरिदास.) पृष्ठे १४९

[३] सत्य.प.(द्वि.सं.) पृष्ठे १३

[४] तत्रैव. तत्पृष्ठे

लज्जितः॥४/२१॥"[1] इति । अनेन लज्जानुभवेन द्योतितमस्य पापकारित्वम् । पुनः श्रीकृष्णाय कन्यादानेन पापक्षालनप्रचेष्टायामपि द्योत्यते यद् आसीत् स पापकृदिति । अतः सत्राजिति एतेषां लक्षणानां सङ्गतित्वात् सिद्धमस्य चरित्रस्य प्रतिनायकत्वमिति शम् ।

## जाम्बवतः चरित्रम्

जाम्बवतः चरित्रस्य उपस्थितिः दृश्यते सत्यभामापरिग्रहे तृतीये सर्गे । अस्य चरित्रमध्ये यथा दर्पः, अहंकारः, चण्डत्वम्, विकत्थनत्वादीनां धीरोद्धतनायकगुणानां समावेशो दृश्यते ; तथैव धीरोदात्तनायकमिव स्थैर्यम्, क्षमावत्वमपि दृश्यते । एतद्व्यतीत्य लोकिकाचारज्ञत्वम्, स्थितप्रज्ञत्वम्, स्थितधित्वम्, प्रभुभक्तिः इत्यादयो गुणा अपि दरीदृश्यन्ते ।

सर्गेऽस्मिन् जाम्बवतः आगमनवर्णने, रूपवर्णने च तस्य रौद्रत्वमेव परिस्फुट्यते । अथ श्रीहरेः रूपदर्शने तथा तस्य वर्णने चारित्रिकप्रकारस्यानुसन्धाने परोक्षतया जाम्बवतः स्थैर्यमेव प्रकाशितमस्ति, यतः स श्रीकृष्णं प्राप्य नासीद् युद्धोद्यतः, प्रत्यक्षतया तु तस्य स्थितधीः पर्यवेक्षणशक्तिश्च प्रकाशिताः।

अस्मिन् सर्गे एकादशे संख्यके श्लोके श्रीकृष्णं प्रति तस्य ऋक्षयुथपस्य क्षमाप्रदानेच्छायाः उल्लेखे यथा क्षमावत्वं तथैव "हरिं विनिर्जित्य बलान्मयार्जितं..॥३/११॥"[2], "न जाम्बवन्तं न विजित्य कृत्यसि ॥३/१२॥"[3] चेति अंशद्वये तस्य दर्पान्विताहंकारः, विकत्थनत्वञ्च प्रतीयन्ते ।

जाम्बवता सह माधवस्य द्वन्द्वयुद्धवर्णने प्रकाशितं तयोः शौर्यं वीर्यञ्च । युद्धेऽस्मिन् स्वपराभवम् अनुभूय स्वपराजयकारणानुसन्धानाय स जाम्बवान् माधवसकाशे विरामं ययाच, इत्यत्र तस्य प्रत्युत्पन्नमतित्वमेव अस्माकं नयनपथमुपैति ।

ततः परं स्वपराभवहेतोरनुसन्धाने स्थितप्रज्ञः स स्थितः समाधिमाश्रित्य । तस्मिन् समाधौ मनुजदेहाश्रितं तं माधवं द्वारकेशं श्रियस्पतिरिति अवगम्य तत्पादपद्मे प्रणिपाते, हरेः वामनरूपस्य स्तुतौ च चित्रिता जाम्बवतो भगवद्भक्तिः । एतद्व्यतीत्य सर्गेऽस्मिन् माधवं दृष्ट्वा जाम्बवता पद्मदलेक्षणस्य रघूद्वहस्य रामचन्द्रस्य स्मरणमपि चित्रितमस्ति, एतेन तस्य प्रभुभक्तिस्तथा भगवद्भक्तिरपि विधृता ।

---

[1] सत्य.प.(द्वि.सं.) पृष्ठे ३०

[2] तत्रैव. पृष्ठे २१

[3] तत्रैव. तत्पृष्ठे

अथ केशवसकाशात् तस्य आगमनकारणं ज्ञात्वा स ऋक्षराट् अतिथिसत्काराय, लोकनाथमर्च्चनाय तथा पराजयस्वीकारादनन्तरं सन्धिस्थापनरूपं लौकिकाचारपालनाय गृहागमनस्य अर्घ्यरूपेण स्वसुतां दातुमैच्छत् समं स्यमन्तकेन –

"..................... जितं त्वयादौ जाने स्यमन्तकमहं न पुनस्तदर्थी ।

गृह्णासि मे यदि गृहागमनार्घ्यभूतां स्वामिन् सुतामपि, तदा सुतरां कृती स्याम् ॥३/३१॥"[१]

अत आसीत् स लौकिकाचारज्ञ इति ।

सर्व्वानेतान् गुणान् व्यतिरिच्य जाम्बवतः चरित्रे सातिशयं सन्तानवात्सल्यमेव सम्यक् चित्रितम् कविना हेमचन्द्रेण अतिस्वल्पे परिसरे । यतो द्वितीये सर्गे धात्रीवचनादेव यथा ज्ञायते यत्, सिंहं निहत्य प्राप्तं स्यमन्तकं जाम्बवता ऋक्षकुमारस्य कृते क्रीडनकीकृतम्, तथैव श्रीहरये स्यमन्तकेन सह कन्यादानेच्छापि ज्ञायते । एतेन तस्य जाम्बवतः चरित्रे न दृश्यते धनलिप्सा सत्राजितमिव अपितु दृश्यते सन्तानवात्सल्यमेव । अथ तृतीये सर्गे कुमारधात्रीकृतम् आर्तघोषणं श्रुत्वा जाम्बवता त्वरितागमने, स्यमन्तकहर्त्तारं माधवमुद्दिश्य जाम्बवता कृतायां निन्दायां -

"स्त्रिया पुरः श्येन इवामिषं यतो मणिन्त्वमाच्छिद्य कराच्छिशोरपि ।

न लज्जसे, नूनमसज्जनोऽसि तद् वपुश्रिया तु प्रतिभाति मेऽन्यथा ॥३/८॥"[२] इति,

तथा पुनः "त्यजार्भकक्रीडनकं स्यमन्तकम् ॥३/११॥"[३] इति आदिदेशे तस्य सन्तानवात्सल्यमेव चित्रितमिति ।

## स्त्रीचरित्राणि

खण्डे काव्येऽस्मिन् सन्ति चत्वारि स्त्रीचरित्राणि, यथा – नायिका सत्यभामा, ऋक्षकुमारस्य बृद्धा धात्री, जाम्बवतः सुता जाम्बवती, द्वारकेशस्य प्रथमा महिषी रुक्मिणी चेति । तेषु जाम्बवती केवलं नाममात्रेण वारचतुष्टयमेव उल्लिखिता, यथाक्रमेण – द्वितीये, तृतीये, चतुर्थे च सर्गे । तत्र द्वितीये सर्गे ऋक्षकुमारमुद्दिश्य धात्र्याः उक्तिषु ; तृतीये सर्गे जाम्बवता माधवाय स्यमन्तकेन सह स्वकन्यादानावसरे ; ततः परं चतुर्थे सर्गे प्रथमे श्लोके मणिना, बधूना च सह श्रीकृष्णस्य स्मृतिमात्रोपनते रथारोहणे तथा विंशतितमे श्लोके स्वमन्दिरे रुक्मिणीसकाशे जाम्बवत्याः स्थापनवर्णने सा उल्लिखिता नाममात्रेण ।

[१] सत्य.प.(द्वि.सं.) पृष्ठे २५

[२] तत्रैव. पृष्ठे २०

[३] तत्रैव. पृष्ठे २१

**⅄ सत्यभामा**

जाम्बवतीमिव सत्यभामायाः चरित्रेऽपि कविना न कापि उक्तिः सन्निवेशिता । परन्तु वर्णननैपुण्यात् तस्याः चारित्रिकगुणाः सुतरामेव प्रकाशिताः । दारुकमाधवसत्राजितोक्तिषु एव नायिकायाः गुणाः प्रकटिताः ।

अत्रत्ये काव्ये प्रथमे सर्गे चारवचनेषु केवलम् एकस्मिन्नेव श्लोके सत्यभामायाः उल्लेखो दृश्यते (श्लोकः १९) परन्तु अस्मिन्नेव श्लोके सा चित्रिता कन्यारत्नरूपेण यतः कृतवर्ममुख्यानां भोजवंशीयानां नृपाणां सकाशे सासीत् स्यमन्तकादपि स्पृहनीया इति ।

अथ सत्यभामायाः नायिकारूपेण सम्यक्-चित्रणमुपलभ्यते द्वितीये सर्गे (श्लोकाः ८-२१)। अत्रैव नायिकानायकयोः प्रथमसाक्षात्कारो दृश्यते, तस्य साधने महाकविना तु आश्रिता घटनाविन्यासस्य आकस्मिकता एव । यतः स्यमन्तकोद्धाराय रथारोहणेन नगराद् बहिर्गमनकाले दैवतार्चापदेशे बहिर्निर्गतया सत्यभामया सह साक्षात्कारोऽभूत् श्रीमाधवस्य । साक्षात्कारस्यास्य अनुघटकोऽभूत् सारथिः दारुकः। यतो मधुसूदनस्य पथि पुष्पवृष्टिं कारयन्तीं सत्यभामां प्रति स एव माधवस्य दृष्टिमाकर्षितवान् । अत्र कविना सा हरौ बद्धभावा इति चित्रिता। चित्रिता च स्वप्राणेशस्य मङ्गलकारिणी सुलक्षणा रमणीरूपेण, मानमत्र दारुकोक्तिः "जयत्याकर्षणी सेयं शक्तिस्ते गुणसम्पदः ॥२/१२॥"[१] इति ।

साक्षात्कारे अस्मिन् यथा सत्यभामायाः रूपवर्णना दृश्यते तथैव अनेन वर्णनेन द्योतिता तस्याः चारित्रिकी स्निग्धता, रमणीयता, दयितगतप्राणता, शीलता, प्रणयस्य गभीरता चेति । निम्ने लिखितेषु श्लोकांशेषु एव एतेषां वैशिष्ट्यानां द्योतनं दरीदृश्यते, यथा –

> "शौरिः सम्भावयामास स्निग्धेनालोकितेन ताम् ॥२/१३॥
> स्रजेवार्पितया दृष्ट्या वृणानेव स्वयं प्रियम् ।..॥२/१४॥
> आदृष्टिपथमालोक्य सत्यभामाथ वल्लभम् ।
> मनसा चानुगच्छन्ती देहेनाववृते गृहम् ॥२/१८॥"[२] इति ।

पुनः सत्यभामां दृष्ट्वा उन्मनसा माधवेन सा नायिका कन्याललामत्वेन स्वीकृता ; अपि च तस्याः गुणसम्पदैः नृपापभाषी पिता सत्राजिदपि माधवसकाशे आराध्यभूतोऽभूत् –

> "श्लाघ्यमन्यत् पुनर्मन्ये रम्यं कन्याललाम तत् ॥२/२०॥

---

[१] सत्य.प.(द्वि.सं.) पृष्ठे १३

[२] तत्रैव. तत्पृष्ठे

नाराध्यः केन सत्राजित्तत्कन्याधनलिप्सया ॥२/२१॥"[1] इति ।

तृतीये सर्गे सत्यभामायाः उपस्थितिः नास्ति, परन्तु सर्गस्य उपान्तिमे श्लोके दृश्यते यद् जाम्बवतः कन्यायाः पाणिग्रहणावसरेऽपि आसीत् स माधवः सत्यभामया हृतचित्तः। एतेन कन्याललामभूतस्याः तस्याः स्वगुणैः प्रथमे साक्षाते माधवस्य चित्तहरणसामर्थ्यमेव द्योतितमिति ।

काव्यस्यास्य अन्तिमे सर्गे कृष्णसकाशाद् मणिप्रापणादनन्तरं स्वापराधं स्मृत्वा तदपनोदनचिन्तने व्यापृतस्य लज्जितस्य सत्राजितः स्वगतोक्तिषु स्वसुतायाः सत्यभामायाः विरहार्दितस्य चरित्रस्य चित्रणमभूत् । तत्र दृश्यते यत्, श्रीहरेः नगरीत्यागात् परं प्रत्यावर्तनं यावत् सासीत् परिपाण्डुवदना । परन्तु तया न प्रकटिता तस्याः प्रणयार्त्तिः कुलस्य मर्यादारक्षणाय "बहिरप्रकटा हि शोभते प्रणयार्त्तिः कुलकन्यकाहृदि। ॥४/२४॥"[2] इति । तस्याः सकाशे जगत् शून्यमिव भाति विना माधवेन । गोविन्दगतचित्तायाः तस्याः कृते स्निग्धाः रम्याश्च विषयाः माहात्म्यवर्जिताः यतः सासीत् तेषु निर्वपेक्षा । एतेन सत्यभामायाः विरहविधुरता, दयितगतचित्तता यथा प्रकटिता तथैव शीलता, पितृकुलस्य मानरक्षणे दृढतापि विधृता । अथ आनन्दितायाः सत्यभामायाः चित्रणं दृश्यते सर्गस्यास्य सप्तविंशतितमे श्लोके यत्र सा अभीष्टं वरभूतं माधवं प्राप्य तथा तादृशं वनिताभूतां सत्यभामां प्राप्य द्वौ एव ननन्दतुरिति । एवमेव सा नायिका सत्यभामा काव्येऽस्मिन् सर्वेषु सर्गेषु एव चित्रिता भिन्नत्वेन ।

उपर्युक्तेषु आलोचनेषु दृश्यते यत्, काव्यस्यास्य नायिका सत्यभामा आसीद् हरौ बद्धभावा, विनयशीलार्जवादिगुणयुक्ता, अपि च काव्यान्ते श्रीकृष्णेन पत्नीत्वेन स्वीकृता ; एतेन सा स्वीया नायिकेव विभाति मत्सकाशे । स्वीयायाः लक्षणप्रसङ्गे दशरूपककारः अगादिः "..स्वीया शीलार्जवादियुक् ॥२/१५॥"[3] इति । एतद्व्यतीत्य नवयौवनयुक्ता, नवप्रेमयुक्ता, अकोपना सा मुग्धेति स्वीयानायिकायाः अवान्तरभेदस्य लक्षणान्यपि उद्वहति ; अस्याः मुग्धायाः लक्षणं लक्षितं दशरूपके "मुग्धा नववयःकामा रतौ वामा मृदुः क्रुधि। ॥२/१६॥"[4] इति। अतः सत्राजित्तनया सा सत्यभामा काव्येऽस्मिन् स्वीयामुग्धेति नायिकारूपेण चित्रिता नास्तीत्यत्र सन्देहलेशः।

### ➤ ऋक्षकुमारस्य धात्री

द्वितीये सर्गे चित्रितमिदं चरित्रं तु नारीचरित्रेषु वयसि वरिष्ठमेव । यतः कविना सा 'धात्री', 'जरती', 'अम्ब' चेति प्रकारेण सम्बोधिता । ऋक्षकुमारेण सह वार्तालापादेव तस्याः धात्र्याः चारित्रिकवैशिष्ट्यानि अस्माकं

---

[1] सत्य.प.(द्वि.सं.) पृष्ठे १४

[2] तत्रैव. पृष्ठे ३०

[3] दश.रू.(परव.) पृष्ठे ५३

[4] तत्रैव. पृष्ठे ५४

नयनपथमुपयन्ति । वार्तालापेऽस्मिन् धात्र्या रामायणीकथा, रुक्मिणीहरणकथा च वर्णिता, एतेन तस्याः प्राचीनार्वाचीनयोः वृत्तान्तज्ञता स्फुटिता । पुनः समग्रे कथोपकथनेऽस्मिन् कुमारं प्रति तस्याः वात्सल्यस्नेहमपि दरीदृश्यते । सर्गान्ते उपान्तिमे श्लोके दृश्यते यत्, सहसोपस्थितेन मुरारिणा ऋक्षशिशोः हस्ताद् मणिहरणं दृष्ट्वा सा धात्री भयार्ता जाता । भीतया तया आहुतो जातः स जाम्बवान् ऋक्षयुथपः। एतेन धात्र्याः भयशीलता, प्रभुभक्तिश्च स्फुटिता । एवमेव काव्येऽस्मिन् सत्याभामापरिग्रहे स्वल्पे परिसरे सुतरामेव चित्रितं चरित्रमिदं कविनामुना हेमचन्द्रेण ।

### ⅄ रुक्मिणी

धात्रीचरित्रम् इव रुक्मिणीचरित्रम् अपि एकसर्गव्यापि । धात्रीचरित्रं यथा केवलं द्वितीयसर्गे दृश्यते तथा रुक्मिणीचरित्रमपि चतुर्थसर्गे कतिपयेषु श्लोकेषु चित्रितमस्ति । अत्र सा अतीव धैर्य्यशीला, आत्मप्रत्ययसम्पन्ना, व्यक्तित्वमयी रमणीरूपेण चित्रिता । यतो यदा सर्वे एव पौरजनाः सप्तदिवसेभ्यः परमपि गिरिकन्दराद् माधवस्य प्रत्यागमनं न दृष्ट्वा पुरीं द्वारिकां प्रत्यागम्य माधववियोगनिश्चयत्वात् शोकातुराः जाताः। तदा केवलं महिष्या रुक्मिण्या एव ते जनाः समाश्वासिताः। तस्या उक्तिषु दृश्यते यद्, आत्मप्रत्ययसम्पन्नायाः तस्याः सकाशे माधवस्य हानिर्नैव सम्भवति यतः स भगवान् स्वयमेव । एवमेव पुनः दृश्यते यत्, तस्याः वचनमेव आप्तवाक्यवद् अवधाय अवलासंहतिः माधवस्य मङ्गलाय चकार दैवतार्चनमिति, अनेन चित्रितमस्याः व्यक्तित्वमयीत्वमिति । एतद्व्यतिरिच्य सर्गेऽस्मिन् विंशतितमे श्लोके सा भीष्मकात्मजा अभिमानवतीति विशेषणेन विशेषिता, यतो दृश्यते तत्र माधवेन तस्याः मानभञ्जनम् –

> “अभिमानवतीञ्च रुक्मिणीं तव दासीयमिति प्रसादयन् ।
> अपि जाम्बवतीं स्वमन्दिरे नवपाणिग्रहणां न्यवेशयत् ॥४/२०॥”[१] इति ।

अतः काव्येऽस्मिन् रुक्मिणी तु माधवपत्नीत्वाद्, धैर्य्यव्यक्तित्वशीलत्वात् तथा अभिमानयुक्तत्वात् स्वीया-मध्या-धीरेति नायिकेव विभातीति ।

## चारचरित्रस्य तात्पर्यम्

सत्यभामापरिग्रहस्य उत्सभूते श्रीमद्भागवते स्यमन्तकोपाख्याने चारस्य चरित्रं नैवोपलभ्यते । तत्रत्ये आख्याने स माधवो लोकेभ्यः स्वविषये मिथ्यापवादमश्रृणोत् । परन्तु हेमचन्द्रेण काव्यकृतौ अस्मिन् सत्यभामापरिग्रहे प्रथमे सर्गे एव चारस्य चरित्रमुपस्थाप्य आरभ्यते वृत्तान्तोऽयं पौराणिकः। माधवेन पृष्टः स चारो माधवमुद्दिश्य द्वारिकायाः पौरजनवृत्तं वक्तुं प्रचक्रमे । नास्ति केवलं पौरजनवृत्तं तत्र ऊनविंशतिश्लोकान्वितेषु चारोक्तिषु । एतेषु श्रीकृष्णशासितस्य

---

[१] सत्य.प.(द्वि.सं.) पृष्ठे ३०

द्वारिकानगर्य्याः वर्णनं जनजीवनं तथा नायकस्य चरित्रमपि चित्रितमिति । अनेन चारवचनेन प्रतिनायकेन सत्राजितेन मणिलाभः, प्राप्तमणेः प्रणाशः ; तेन कृष्णाभिशस्तिः इत्यादयोऽपि चित्रिताः । एतेन विहिता प्रतिनायकस्योपस्थापना ।

ततः परं चारमुखे सत्यभामाया उल्लेखे तथा तस्याः कृते स्पृहयालूनां भोजानामुल्लेखे श्रीकृष्णोऽपि कन्यारत्नस्यास्य विषये स्पृहयालुः भविष्यतीत्येव द्योतितः परोक्षतया । अथ चारस्य अन्तिमेन उक्तिना मिथ्यापवादरूपमालिन्यस्य अपनोदने माधवविहिता भाविप्रचेष्टापि चित्रिता । यतः एतैरुक्तिभिः अवगतवृत्तान्तः स चकार स्यमन्तकोद्धारप्रतिज्ञा यया परोक्षतयैव विज्ञापिता प्रायः सामग्रिकी काव्यकथा इत्याशयो मे ।

## सारथेः दारुकचरित्रस्य तात्पर्यम्

सत्यभामापरिग्रहे कविना हेमचन्द्रेण स्वमस्तिष्कप्रसूतेषु चरित्रेषु अपरं चरित्रमेव यदुनायकस्य माधवस्य सारथेः दारुकस्य चरित्रमिति । काव्येऽस्मिन् दारुकस्य उपस्थितिः दृश्यते सर्गद्वितये, यथा – आदौ द्वितीये सर्गे स्यमन्तकोद्धाराय द्वारकात्यागावसरे पुष्पवर्षणकारिणीं सत्यभामां प्रति माधवस्य अवधानाकर्षणे ; ततः परं चतुर्थे सर्गे जाम्बवत्या स्यमन्तकेन च सह द्वारिकां प्रत्यागमने काले माधवसकाशे माधववियोगे शोकसन्तप्तायाः द्वारिकायाः वर्णनाकारिरूपेण स सारथिर्दारुकः चित्रितोऽभूत् ।

माधवस्य सारथिरेव दारुकः अतः काव्येऽस्मिन् दारुकचरित्रस्य उपस्थापनस्य तात्पर्यम् उद्घाटनप्रसङ्गे काव्यवृत्तमवलम्ब्य तस्य चरित्रस्य विश्लेषणं कर्त्तव्यमिति । प्रसङ्गेऽस्मिन् अमरकोषे क्षत्रियवर्गे रथकुटुम्बिनः संज्ञाः उल्लिखिताः –

(६१) "नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः॥
सव्येष्ठदक्षिणस्थौ च संज्ञा रथकुटुम्बिनः।"[1]

- इत्येतेषु सूतः, क्षत्ता, सारथिः चेति जनाः सारथ्यकर्मणा एव उपजीवन्ति । सारथ्यकर्म तु न विधीयते येन केनापि । यतः अस्य कर्मणः कृते केचन गुणाः प्रयोजनीयाः। प्रसङ्गेऽस्मिन् मत्स्यपुराणे सारथिनो गुणाः वर्णिताः –

"निमित्तशकुनज्ञानी हयशिक्षाविशारदः।हयायुर्वेदतत्त्वज्ञो भूरिभागविशेषवित् ॥
स्वामिभक्तो महोत्साहः सर्वेषां च प्रियंवदः।शूरश्च कृतविद्यश्च सारथिः परिकीर्तितः॥"[2] इति ।

---

[1] नामलिङ्गानुशासनम् (अमरसिंहविरचितम्), सम्पा. एन.जि.सारदेशाइ, डि.जि.पाध्ये, पूना ओरिएन्टाल बुक एजेन्सि, पूना, पूना ओरिएन्टाल सीरीज ६९, १९४०(प्र.सं.), पृष्ठे ७५

[2] मत्स्य.पु.(तर्करत्न.), २१५/२०, २१. पृष्ठे ७७१

अर्थात्, शुभाशुभविज्ञः, अश्वशिक्षाविशारदः, अश्वायुर्वेदज्ञः, सुपण्डितः, प्रभुभक्तः, उत्साहवान्, प्रियंवदः, शूरः, विद्वान् च जनः सारथिपदवीमेति । एतेषु दारुकस्य शुभाशुभविज्ञत्वं, प्रभुभक्तिः, उत्साहः, प्रियंवदत्वञ्च प्रकाशिताः काव्येऽस्मिन् स्वल्पे परिसरे ।

काव्यस्यास्य द्वितीये सर्गे दारुकस्य वाग्मीति विशेषणेन तस्य प्रियंवदत्वमेव द्योतितम् । पुनः अत्रैव सत्यभामां निर्दिश्य माधवं प्रति उक्तेषु दारुकवचनेषु यथा सत्यभामा चित्रिता माधवस्य गुणसम्पदः शक्तिरूपेण, तथैव चित्रिता दारुकोक्तिभिः उत्साहितेन श्रीकृष्णेन सह सत्यभामायाः अन्योन्यनयनद्वन्द्वसंगतेः वर्णना । एतेन प्रकटितं सारथेरस्य उत्साहवत्त्वं, शुभाशुभविज्ञत्वञ्चेति –

"अहितस्यात्मजा देव यत्तवैवं हितैषिणी । जयत्याकर्षणी सेयं शक्तिस्ते गुणसम्पदः ॥२/१२॥
अन्योन्यनयनद्वन्द्वसंगतिः क्षणिका तयोः। सान्तर्हासं तदालोकि सत्यभामासखीजनैः॥२/१७॥"[१] इति ।

अथ चतुर्थे सर्गे मणिना जाम्बवत्या च समं श्रीहरेः द्वारिकाप्रत्यावर्तनस्य दृश्ये तस्यैवानुयोगाद् दारुकेन हरिवियोगार्दिता करुणा द्वारवतीगता कथा वर्णिता, यया सारथेः प्रभुभक्तिरेव द्योतितेति ।

अधुना दृश्यते यद्, भागवतगते वीररसप्रधाने मूलभूताख्याने वीरं व्यतिरिच्य नास्ति कस्यचन रसान्तरस्य (शृङ्गारस्य करुणस्य वा) सम्यग् अभिव्यक्तिः। परन्तु काव्येऽस्मिन् अङ्गिना वीरेण सह शृङ्गारकरुणयोः प्रकाशोऽप्युपलभ्यते । अनयोः अभिव्यञ्जने सारथेर्दारुकस्य भूमिका तु अनस्वीकार्या एव । यतः, द्वितीये सर्गे तस्योत्साहेनैव अभूद् माधवसत्यभामयोः साक्षात्कारः, सत्यभामां दृष्ट्वा माधवस्य हृदये प्रणयसञ्चारश्च । एतेन विहितः काव्येऽस्मिन् शृङ्गारस्य सञ्चारः ; यस्योपस्थितिः तृतीये, चतुर्थे च सर्गेऽपि नयनपथमुपैति ।

अथ चतुर्थे सर्गे श्रीकृष्णसकाशे दारुकमुखेन माधवविरहार्दितायाः द्वारिकायाः वर्णने माधवस्य अप्रत्यावर्तनवशात् शोकसन्तप्तानां नगरवासीनां तथा राजान्तःपुरवासीनाम् अवस्था चित्रणे करुणस्य सम्यगभिव्यञ्जनमेव दरीदृश्यते । तस्योदाहरणमेकम् अधस्तात् प्रदीयते -

"अशिवं भवतोऽनुयात्रिकाः प्रतियाताः स्फुटमब्रुवन् यदा ।
तमसा प्रसभेन सा पुरी शशिलेखेव तदाभ्यभूयत ॥४/४॥
अपवर्ज्जितनृत्यगीतया प्रतिषिद्धोत्सवया हतश्रिया ।
गतभर्त्तृकयेव साम्प्रतं क इव द्वारकया न दूयते ॥४/१२॥"[२] इति ।

---

[१] सत्य.प.(द्वि.सं.) पृष्ठे १३

[२] तत्रैव. पृष्ठे २६, २८ च

## धात्रीकुमारयोः कथोपकथनस्य तात्पर्यम्

सत्यभामापरिग्रहस्य उत्सभूते भागवतगते स्यमन्तकोपाख्याने क्रीडारतस्य जाम्बवतः पुत्रस्य ऋक्षकुमारस्य तथा तस्य धात्र्याः नाममात्रेण उल्लेखो दृश्यते । परन्तु काव्येऽस्मिन् द्वितीये सर्गे अनयोः दीर्घकालिकी उपस्थितिः यथा दृश्यते तथैव तयोः कथोपकथनमपि संयोजितमस्ति । अस्मिन् कथोपकथनावसरे श्रीकृष्णस्तु चित्रितः ऋक्षस्य गुहाभ्यन्तरे अन्तरालवर्तिरूपेण ।

अस्मिन् कथोपकथने कति विषयाः उद्घाट्यन्ते । यथा – कुमारसकाशे धात्र्या रामायणकथावर्णने, पशुपालयुवा (श्रीकृष्णस्य) रुक्मिणीहरणवर्णने केशवस्य अवतारत्वमेव सूच्यते । ततः परं धात्र्याः वचनैरेव केन प्रकारेण स ऋक्षकुमारः क्रीडनकभूतं स्यमन्तकम् अवाप तस्य सविशेषम् उल्लेखं दृश्यते श्लोकेनैकेन –

"प्रसेनमवधीत् सिंहः सोऽपि जाम्बवताऽवधि ।
तत् क्रमेण कुमारैष तवायत्तः स्यमन्तकः॥२/५९॥"[1] इति ।

एतद्व्यतीत्य धात्रीवचनेभ्यः हरौ स्यमन्तकेन सह जाम्बवतः स्वकन्यकादानेच्छापि प्रकाशिता । अनेन यथा पताकानायकस्य जाम्बवतः अभीष्टं फलमपि उक्तम्, तथैव जाम्बवतः सकाशादेव माधवेन मणिप्राप्तिः भविष्यतीति विषयोऽपि पाठकानां सकाशे स्पष्टीयते अस्मिन्नेव धात्री-कुमारयोः वार्तालापे ।

प्रसङ्गत उल्लेख्यं यद्, अस्मिन्नेव अंशे काव्यस्य अङ्गभूतस्य हास्यरसस्य अभिव्यञ्जनं दृश्यते जरतीकुमारयोः वार्तालापान्ते धात्री तथा कुमारस्य हसनेन –

"कामं जामिं हरत्वन्यो न दास्यामः स्यमन्तकम् ।
इत्यथ व्याहरत्युच्चैर्जहास जरतीशिशौ ॥२/६१॥"[2] इति ।

कविकल्पितमिदं कथोपकथनं विना अङ्गरसस्यास्य हास्यस्य अभिव्यञ्जनमपि नैव सम्भवेत्, अतो युज्यते संयोजनमिदमिति शम् ।

---

[1] सत्य.प.(द्वि.सं.) पृष्ठे १७

[2] तत्रैव. पृष्ठे १८

# अपराणि वैशिष्ट्यानि

## *सम्बोधनप्रक्रिया*

खण्डकाव्येऽस्मिन् सत्यभामापरिग्रहे नायकः शौरिः प्रथमे सर्गे भृत्यभूतात् चारसकाशात् 'प्रभो' इति सम्बोधनेन सम्बोधितोऽस्ति ।

द्वितीये सर्गे सारथिना दारुकेन रथिनं केशवं प्रति 'आयुष्मन्' इति सुविदितं सम्बोधनं[१] न दृश्यते ; सम्बोधितः स दारुकेन 'देव' इति । पुनरस्मिन्नेव सर्गे बृद्धायाः जरत्याः कृते ऋक्षकुमारेण 'अम्ब' इति सम्बोधनं नयनपथमुपैति ।

तृतीये सर्गे जाम्बवान् नायकं माधवं "कस्त्वमतर्किंतागमः" इत्यनेन प्रकारेण सम्बोधितवान् । परन्तु सर्गस्यास्य अन्तिमे अंशे तेनैव ऋक्षयुथपेन स नायक एव सम्बोधितः 'स्वामिन्' इति पदेन । परन्तु कथमेवं जातम् ? व्याख्यानप्रसङ्गेऽस्य वक्तुं शक्यते यत्, सर्गादौ धात्र्याः आर्त्ताह्वानेन चौरसन्निधिसम्भावितत्वाद् आगतस्य जाम्बवतः सकाशे स नायको माधवः असज्जनरूपेण प्रतिभातोऽभूत् । एतेनैव तत्रत्ये जाम्बवता विहिते सम्बोधने रुढता प्रकाशिता। अथ श्रीकृष्णसकाशात् पराजयादनन्तरं योगबलेन तमेव नायकं "श्रीहरिः" इति ज्ञात्वा तेनैव जाम्बवता प्राप्तो भृत्यभावः। तस्माद् भृत्यभाववशादेव माधवं प्रति 'स्वामिन्' इति सम्बोधनं[२] प्रयुज्यते तेनैव ऋक्षयुथपेन इत्याशयो मे ।

## *वृत्तिः*

वृत्तिरिति पदस्यार्थो व्यापारो वा क्रिया वा । अभिनयव्यापारस्य सामग्रिकी तथा सावलीला अभिव्यक्तिरेव वृत्तिः। प्रवृत्तिरेव वृत्तेः मूलम्, यतः प्रवृत्तेः बहिरङ्गभूता अभिव्यक्तिरेव वृत्तिः। वृत्तिरियं भवति नायकव्यापारात्मिका । तदुक्तं दशरूपकस्य वृत्तिकारेण धनिकेन तदीये अवलोकवृत्तिमध्ये - "प्रवृत्तिरूपो नेतृव्यापारस्वभावो वृत्तिः।"[३] सैव वृत्तिश्च चतुर्धा, यथा – 'कैशिकी', 'सात्त्वती', 'आरभटी', 'भारती' चेति । अस्मिन् सत्यभामापरिग्रहे वीररस एवाङ्गित्वेन स्वीकृतत्वात् सात्त्वतीवृत्तेः उपस्थितिस्तु स्वाभाविकी एव । पुनः सर्वविधेषु रसेषु प्रयोज्यत्वाद् भारतीवृत्तेः प्रयोगसम्भावनापि विद्यते काव्यकृतौ अस्मिन् । अतः अत्रादौ भारतीवृत्तेः स्थानानि निरूप्य तदनन्तरं सात्त्वतीवृत्तेः स्थानानि निरूपितानि भविष्यन्ति ।

---

[१] दश.रू.(परव.) "रथी सूतेन चायुष्मन्..।..॥२/६८॥" इति, पृष्ठे ७७

[२] तत्रैव. "देवः स्वामीति नृपतिर्भृत्यैः..॥२/६९॥" इति, पृष्ठे ७८

[३] तत्रैव. पृष्ठे ७१

भारतीवृत्तेः स्वरूपप्रसङ्गे विश्वनाथेनोक्तम् - "भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः॥६/१४॥"[१] इति। प्रसङ्गत उल्लेख्यं यत्, साधारणतया श्रव्यकाव्येषु संस्कृतबहुलो वाग्व्यापारो दृश्यते, खण्डकाव्येऽस्मिन्नपि तस्य व्यतिक्रमो न दृश्यते । वृत्तिरियम् अङ्गचतुष्टयान्विता, तान्यङ्गानि यथा – 'प्ररोचना', 'वीथी', 'प्रहसनम्', 'आमुखम्' चेति - "तस्याः प्ररोचना वीथी तथा प्रहसनामुखे।॥६/१५॥"[२] इति। एतेषु अङ्गेषु प्ररोचना इत्याख्यस्य अङ्गस्य उपस्थितिर्दृश्यते सत्यभामापरिग्रहे मङ्गलाचरणे । यतः तत्रत्ये द्वितीये श्लोके काव्ये वर्णनीयवृत्तान्तस्य उत्सनिर्देशेन सह तस्य प्रशंसापि विहिता, वृत्तान्तस्य पवित्रतायाः उल्लेखे –

"पवित्राभिः पल्लवितं कथाभिः कमलापतेः।
सम्भाव्यनिर्वृतिफलम्भजे भागवतद्रुमम् ॥२॥"[३] इति।

पञ्चमे श्लोके परोक्षेण विद्यते कवेः प्रशंसा । ततः परं षष्ठे श्लोके सहृदयाः काव्यस्य गुणदोषयोः प्रमाणत्वेन स्वीकृतत्वात् तेषां प्रशंसाप्यत्र विहिता कविना हेमचन्द्रेण । अत एव मङ्गलाचरणे भारतीवृत्त्याः प्रयोगस्तु उपलभ्यते सत्यभामापरिग्रहे । सात्त्वतीवृत्तेः स्वरूपकथनप्रसङ्गे दर्पणकारेणोक्तम् –

"सात्त्वती बहुला सत्त्वशौर्य्यत्यागदयार्जवैः।
सहर्षा क्षुद्रशृङ्गारा विशोका साद्भुता तथा ॥६/१५०॥"[४] इति ।

अर्थाद्, या वृत्तिः सत्त्वशौर्य्यत्यागदयार्जवैः परिपूर्णा, प्रायेण हर्षयुक्ता, स्वल्पशृङ्गारान्विता, शोकविहीना, अद्भुतरसान्विता सा एव सात्त्वती वृत्तिः। अधुना सत्यभामापरिग्रहे समग्रे काव्ये नायकभूते श्रीकृष्णे तथा तदीये प्रवृत्तिभूते व्यापारे पूर्वोक्तेषु वैशिष्ट्येषु सर्वाणि एव वैशिष्ट्यानि सन्निवेशितानि ।

वृत्त्यामस्यां सन्ति चत्वारो भेदाः। यथा 'उत्थापकः', 'संघात्यः', 'संलापः', 'परिवर्त्तक'श्चेति "उत्थापकोऽथ संघात्यः संलापः परिवर्त्तकः।॥६/१५०॥"[५] इति । एतेषु केवलं प्रथमो भेद एव उपलभ्यते काव्येऽस्मिन् । उत्थापकस्य लक्षणं लक्षितं साहित्यदर्पणे "उत्तेजनकरी शत्रोर्वागुत्थापक उच्यते॥६/१५१॥"[६] इति । अर्थात्, प्रतिपक्षस्य कोपोत्पादकं वाक्यमेव उत्थापकः। इह सत्यभामापरिग्रहे तृतीये सर्गे श्रीकृष्णवचनेन क्षुभितस्य जाम्बवतो युद्धारम्भरूपा प्रतिक्रिया दृश्यते, अतो लक्षणसङ्गतिरित्याशयो मे ।

---

[१] सा.द.(हरिदास.) पृष्ठे २९८

[२] तत्रैव. पृष्ठे २९९

[३] सत्य.प.(द्वि.सं.) मङ्गलाचरणम्, पृष्ठे ३

[४] सा.द.(हरिदास.) पृष्ठे ३५७

[५] तत्रैव. तत्पृष्ठे

[६] तत्रैव. तत्पृष्ठे

## *उक्तिनिरूपणम्*

खण्डकाव्यमिदं सत्यभामापरिग्रहं यथा वर्णनान्वितं तथैव उक्तिप्रत्युक्तिभिरपि अन्वितमिति दृश्यते । अतः काव्येस्मिन् कीदृश्यः उक्तयः सन्तीत्यस्मिन् विषये चर्चा कार्या । तत्रादौ उक्तेः प्रकाराः आलोचनीयाः, अस्याः प्रकारभेदप्रसङ्गे विश्वनाथेन स्वीकृतं भेदपञ्चकमिति, यथा – 'स्वगतम्', 'प्रकाशम्', 'अपवारितम्', 'जनान्तिकम्', 'आकाशभाषितम्' चेति । एतेषु आदिभूतं भेदद्वयमेव (अर्थात् स्वगतम्, प्रकाशञ्चेति प्रकारद्वयम्) केवलमुपलभ्यते काव्येऽस्मिन् । भेदद्वयस्यास्य स्वरूपवर्णनयन्नाह विश्वनाथकविराजः "अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् ॥६/१६०॥ सर्वश्राव्यं प्रकाशं स्यात्...।॥६/१६१॥"[1] इति । अर्थाद्, यद्वाक्यमन्यैः अश्राव्यं स्वगतं तदेव, पुनः यद्वाक्यं सर्वैः श्राव्यं तत्तु प्राकशमिति । दिङ्मात्राणि अस्योदाहरणानि यथा –

द्वितीये सर्गे सत्यभामायाः चेष्टितानि स्मृत्वा तस्याः विषये माधवस्य चिन्तने दृश्यन्ते स्वगतोक्तयः। पुनः चतुर्थे सर्गे सत्राजितः चिन्तनेऽपि स्वगतोक्तयः सन्ति ।

एतद्व्यतीत्य अन्येषु स्थलेषु यथा प्रथमे सर्गे चारवचनेषु, सभागृहे माधवोक्तिषु ; द्वितीये सर्गे आदौ दारुकोक्तिषु, ततः परं जरतीशिशयोः कथोपकथने ; तृतीये सर्गे माधवजाम्बवतोः संवादे ; चतुर्थे सर्गे माधवसकाशे द्वारवतीगता कथा वर्णने दारुकोक्तिषु च प्रकाशोक्तय एव दरीदृश्यन्ते ।

## *योषिदलंकाराः*

दशरूपककारेण विंशतिरलंकाराः स्वीकृताः स्त्रीणां कृते[2]। तेषु 'भाव', 'हाव', 'हेला' चेति शरीरजानामलंकाराणाम्[3] उपस्थितिर्दृश्यते काव्येऽस्मिन् सत्यभामापरिग्रहे । भावस्य उदाहरणमस्ति द्वितीये सर्गे कविना माधवं प्रति सत्यभामायाः मनोभाववर्णने – "अथ सत्राजितः पुत्री बद्धभावा चिराद्धरौ । दैवतार्चापदेशेन निर्ययौ बहिः॥२/८॥"[4]; पुनः अस्मिन्नेव सर्गे -

"अन्योन्यनयनद्वन्द्वसङ्गतिः क्षणिका तयोः।
सान्तर्हासं तदालोकि सत्यभामासखीजनैः॥२/१७॥
आदृष्टिपथमालोक्य सत्यभामाथ वल्लभम् ।

---

[1] सा.द.(हरिदास.) पृष्ठे ३६१

[2] दश.रू.(परव.) "यौवने सत्त्वजाः स्त्रीणामलंकारास्तु विंशतिः।..॥२/३०॥", पृष्ठे ६३

[3] तत्रैव. "भावो हावश्च हेला च त्रयस्तत्र शरीरजाः॥२/३०॥", तत्पृष्ठे

[4] सत्य.प.(द्वि.सं.) पृष्ठे १२

मनसा चानुगच्छन्ती देहेनाववृते गृहम्॥२/१८॥"[1]

- इत्यस्मिन् श्लोकद्वये नायिकाया आह्लादजनकत्वावच्छिन्ने दृष्टिपाते 'हावः' इत्यलंकार एव द्योतितः। पुनरत्र 'हेला'पि द्योतिता हावेन श्रृङ्गारस्य स्पष्टाभिव्यञ्जनत्वात् । एतद्व्यतीत्य, काव्येऽस्मिन् सत्यभामापरिग्रहे 'औदार्य्यम्', 'धैर्य्यम्' चेति अयत्नजमलंकारद्वयमपि[2] केवलं नयनपथमुपैति । यतः काव्यस्यास्य वृत्तान्तं पर्यालोच्य बुध्यते यद्, नायकभूतं माधवं प्रति प्रेम्णो भाव एव सदैव पुष्यते सत्यभामया, अतः अस्त्यत्र 'औदार्य्यमि'ति अलंकारः ; पुनः रुक्मिण्याः चरित्रे योषिदलंकारभूतस्य 'धैर्य्य'स्योपस्थितिरपि दृश्यते ।

## *गुणसमीक्षा*

श्रुतिमात्रेणैव अर्थबोधत्वात् काव्येऽस्मिन् प्रसादगुणस्य एकाधिपत्यमेव दरीदृश्यते । एतद्व्यतीत्य खण्डे काव्येऽस्मिन् क्वचिद् रचनायाः मसृणत्वात् श्लेषः ; सर्वत्र अर्थस्य अकल्पनीयत्वाद् अर्थव्यक्तिः ; अत्रत्येषु विविधेषु श्लोकेषु वीभत्साद्भुत-भयानक-करुण-हास्य-शान्तादीनां रसानां सम्यक्तया परिवेशनत्वाद् माधुर्य्यम् ; प्रथमे सर्गे चारवचने माधवस्य चरितकथने उत्कृष्टगुणानां द्योतनाद् उदारता ; काव्येऽस्मिन् वाक्यव्यवहारे अर्थात्, स्यमन्तकोद्धारस्य तथा सत्यभामया सह परिग्रहस्य वृत्तान्तकथने लोकप्रसिद्धेः अनतिक्रमात् कान्तिः ; समग्रे काव्ये मृदुवर्णानां स्फुटवर्णानां युगपदवस्थानाद् मध्यमबन्धस्य प्रयोगो दृश्यते, बन्धस्यास्य अवैषम्यादत्र समता ; मध्यमबन्धान्वितत्वाद् अनिष्ठुराणां वर्णानां समावेशवशात् सुकुमारता ; तृतीये सर्गे जाम्बवतो वर्णनायां तस्योक्तिषु च दीर्घसमासयुक्तत्वात्, संयुक्तवर्णानां, रेफयुक्तवर्णानां प्रयोगाद् ओजः ; पुनः काव्ये आरोहावरोहक्रमस्य सद्भावात् समाधिरित्यादयो गुणाः अपि सन्निवेशिताः। अतः सर्वेषां गुणानां सद्भावादत्र वैदर्भी एव खण्डकाव्यस्यास्य रीतिरित्याशयो मे ।

## *अलंकाराः*

काव्येऽस्मिन् यथा सन्ति शब्दालंकाराः तथैव अर्थालंकाराऽपि सन्ति । साहित्यदर्पणकारेण विश्वनाथेन अनुप्रास-यमक-वक्रोक्ति-श्लेषादयः शब्दालंकाराः स्वीकृताः, तेषु केवलमनुप्रासयमकयोः प्रयोगो विधीयेते कविभूषणेन हेमचन्द्रेण तदीये सत्यभामापरिग्रहे खण्डकाव्ये । तत्र अनुप्रासस्यैवाधिक्यमुपलभ्यते काव्येऽस्मिन् । अलंकारोऽयं विश्वनाथेन पञ्चधा विभज्यते – 'छेकानुप्रासः', 'वृत्त्यनुप्रासः', 'श्रुत्यनुप्रासः', 'अन्त्यानुप्रासः', 'लाटानुप्रास'श्चेत्येतेषु लाटानुप्रासं व्यतिरिच्य अवशिष्टस्य भेदचतुष्टयस्यैव भूयः प्रयोगो दृश्यते काव्येऽस्मिन् ।

---

[1] सत्य.प.(द्वि.सं.) पृष्ठे १३

[2] दश.रू.(परव.) "शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता । औदार्य्यं धैर्य्यमित्येते सप्त भावा अयत्नजाः॥२/३१॥", पृष्ठे ६३

शब्दालंकारा इव काव्येऽस्मिन् विविधाः अर्थालंकाराऽपि सुप्रयुक्ताः कविभूषणेन हेमचन्द्रेण । तत्रत्ये सत्यभामापरिग्रहे उपमा, अर्थान्तरन्यासश्चेति अलंकारद्वितयस्य प्रयोगो यथा दरीदृश्यते तथैव तेषामलंकाराणां मनोहारित्वं हृदयाह्लादजनकत्वमपि पुनः पुनः नयनपथमुपैति अस्माकमिति । एतद्व्यतीत्य मालोपमा-उत्प्रेक्षा-अप्रस्तुतप्रशंसा-स्मरण-काव्यलिङ्ग-दृष्टान्त-संकर-संसृष्टिरादीनाम् अलंकाराणामुपस्थितिरपि दृश्यते । अतस्तेषामलंकाराणां स्थानानि अधस्ताद् निर्दिश्यते –

| **क्र.सं.** | **अर्थालंकाराः** | **स.सं./श्लो.सं.** |
|---|---|---|
| १. | अर्थान्तरन्यासः | १/२,१२,१९ ; ३/१७ ; ४/३१। |
| २. | उपमा | १/२०, २१, २२; २/२, ३, ५, १५, १६, ४१, ६४; ३/८, २२; ४/४, १२। |
| ३. | काव्यलिङ्गम् | १/११ |
| ४. | उत्प्रेक्षा | ३/२ |
| ५. | स्मरणम् | ३/१० |
| ६. | मालोपमा | ३/२६ |
| ७. | प्रतिवस्तूपमा | ४/३२ |
| ८. | संसृष्टिः | १/७ (समासोक्ति, अप्रस्तुप्रशंसा चेति अलंकारद्वितयस्य परस्परनिरपेक्षत्वेनावस्थानात्), २/१४ (उपमा-उत्प्रेक्षयोः परस्परनिरपेक्षत्वात्), ४/२४ (प्रतिवस्तूपमा, अप्रस्तुतप्रशंसा चेति एतयोः परस्परनिरपेक्षत्वेनावस्थानात्)। |
| ९. | संकरः | ४/३३ (उत्प्रेक्षा, विभावना चेति अलंकारद्वयस्य अङ्गाङ्गित्वेनावस्थानात्) |

सारणी ३.७ : अर्थालंकाराः (सत्य.प.)

व्यवहृतानाम् एतेषाम् अलंकाराणां कति उदाहरणानि अधस्तादुपस्थाप्यन्ते । अधुना अधिकरमणीयत्वात् केवलं अर्थालंकारस्य दिङ्मात्रमुदाहरणं यथा –

> "बहिरप्रकटा हि शोभते प्रणयार्त्तिः कुलकन्यकाहृदि ।
> प्रतमस्यभिदीप्यते पदे न दिवालोकपथे तु दीपिका ॥४/२४॥"[१]

- श्लोकेऽस्मिन् पूर्ववाक्ये उच्यते यत्, कुलकन्यकानां हृदयगता प्रणयार्त्तिः बहिः लोकसमक्षे यदि प्रकटिता न स्यात् तर्ह्येव सा शोभते ; द्वितीये वाक्ये उच्यते यत्, प्रदीपशिखा घने अन्धकारे एव औज्ज्वल्येन सह अतीव दीप्यते न तु दिवालोकेन

[१] सत्य.प.(द्वि.सं.) पृष्ठे ३०

आलोकिते पथे । अत्रत्ये पूर्ववाक्ये शोभते परवाक्ये अभिदीप्यते चेति क्रिययोर्मध्ये विम्बप्रतिविम्बभावो दृश्यते अर्थाद्, अनयोः सादृश्यं अर्थपर्यालोचनेनैव अवगम्यते, अनेन प्रकारेण क्रियारूपधर्म्मस्य प्रतिविम्बनत्वाद् दृष्टान्तालंकारः।

पुनः 'बहिरप्रकटा हि शोभते प्रणयार्त्तिः कुलकन्यकाहृदि ।' इत्यंशे सत्यभामायाः पितुः सकाशे द्वारकेशं श्रीकृष्णं प्रति तस्याः अप्रकाशितः प्रेम एवाभिव्यज्यते । कविनात्र 'कुलकन्यका' इति सामान्यार्थबोधकं पदमेव व्यवह्रयते न तु विशेषार्थबोधकं पदम्, परन्तु कुलकन्यकेति पदेनैव बुध्यते 'सत्यभामा' इति विशेषार्थ एव । अतः सामान्यात् 'कुलकन्यके'ति पदात् 'सत्यभामे'ति विशेषस्य ज्ञाने अप्रस्तुतप्रशंसालंकारो जायते ।

प्रसङ्गत उल्लेख्यं यत्, श्लोकेऽस्मिन् यदि "अभिदीप्यते" इति पदस्य 'शोभते' इति अर्थः स्वीक्रियते ; तर्हि शोभारूपस्य एकस्यैव सामान्यधर्म्मस्य "शोभते", "अभिदीप्यते" चेति पृथक् पृथक् पदेन भिन्ने भिन्ने वाक्ये उल्लेखे प्रतिवस्तूपमा एव स्वीकर्त्तव्या अलंकाररूपेण । अत्र एकाधारे दृष्टान्त-प्रतिवस्तूपमयोः सन्देहे संकरालंकारः।

पुनः -

"तिसृभिरथ वधूभिः सेवितः सुव्रताभिः श्रिततनुभिरिवासौ शक्तिभिर्वासुदेवः।
अधिगतपुरुषार्थो राजशब्दं विनापि व्यजयत नृपसङ्घश्लाघितश्रीविशेषः॥४/३३॥"[१]

- इत्यस्य श्लोकस्य प्रथमार्धे वासुदेवस्य पत्नीत्रयं मूर्त्तभूतेन राजशक्तित्रयरूपेण सम्भाव्यते, अत उत्प्रेक्षालंकारः ; अत्र "इव" इति सादृश्यवाचकस्य पदस्य प्रयोगे उत्प्रेक्षेयं वाच्या, पुनः "श्रिततनुभि"रिति पदेन 'तनुयुक्ता' अर्थाद् 'मूर्त्ता' इत्यर्थ एव बुध्यते सुतरां पदमिदं गुणवाचकम्, अतोऽत्र वाच्या गुणोत्प्रेक्षापि स्वीकर्त्तव्या । श्लोकस्यास्य द्वितीयार्धे कविः कथयति यद्, माधवो राजपदम् अनवाप्य अपि विजयी अभूत्, तस्य विजयस्य कृते "नृपसङ्घश्लाघितश्रीविशेषः" इति अंशः गौणहेतुरूपेण उच्यते । अतोऽत्र उक्तहेतुकविभावनालंकारः। अनेनैव प्रकारेण राजपदं विनापि विजयलाभस्य पश्चाते पूर्वार्धे स्थिता उत्प्रेक्षा एव परिपोषकरूपेण विद्यते । यतो मूर्त्तिधारिभिः शक्तिभिः श्रीकृष्णस्य अधिकसामर्थ्यमेवाभिव्यज्यते । एतेन दृश्यते यद्, उत्प्रेक्षया विभावना परिपुष्टा जाता; अत्र विभावना अङ्गी उत्प्रेक्षा च तस्याः अङ्गम्, अतः परस्परसापेक्षत्वात् संकरालंकारः।

---

[१] सत्य.प.(द्वि.सं.) पृष्ठे ३२

# दशावतारस्तोत्रम्

## संक्षिप्तपरिचयः

'रुक्मिणीहरणम्' इति महाकाव्यस्य द्वितीयसंस्करणस्यान्ते परिशिष्टमिति अंशे 'दशावतारस्तोत्रमि'ति भक्तिभावाप्लुतम् एकादशश्लोकात्मकं स्तोत्रकाव्यमपि ग्रथितं कविनामुना । जयदेवस्य गीतगोविन्दगतं दशावतारस्तोत्रम् अनुसृत्य एव हेमचन्द्रेण प्रणीतमिदं काव्यम् । पुनः एतदपि अहं वक्तुं शक्यते यद्, जयदेवात् परं हेमचन्द्ररायकविभूषणं तथा गणपतिसरकारविद्यारत्नं व्यतिरिच्य सम्भवतो न कोऽपि आसीद् वङ्गभूमौ दशावतारस्तोत्रस्य विरचने उद्योगी ।

## काव्यत्वविचारणम् साहित्यदर्पणस्य षष्ठपरिच्छेददृशा

दशावतारस्तोत्रमिदमादौ श्रव्यकाव्यमध्ये आपतति श्रवणयोग्यत्वादेव, साहित्यदर्पणकारेण विश्वनाथेनोक्तं श्रव्यकाव्यस्य लक्षणं यथा –

"श्रव्यं श्रोतव्यमात्रं तद् गद्यपद्यमयं द्विधा । ॥६ / ३००॥"[1] इति ।

पुनः छन्दोबद्धत्वादिदं काव्यं पद्यमयकाव्येषु आपतति, पद्यस्य लक्षणं यथा –

"छन्दोबद्धपदं पद्यम्.... ॥६/ ३०१॥"[2] इति ।

काव्यस्यास्य सर्वे एव श्लोकाः मुक्तकात्मकाः, यतः प्रत्येकेन श्लोकेन सम्पूर्णस्वतन्त्रतया वाक्यार्थाः प्रकाश्यन्ते, निगदितञ्च विश्वनाथेन –

"....तेनैकेन च मुक्तकम् ॥६/ ३०१॥"[3] इति ।

यद्यपि साहित्यदर्पणस्य प्रथमे परिच्छेदे काव्यस्य "वाक्यं रसात्मकं काव्यमि"[4]ति सामान्यलक्षणं विद्यते, तथापि काव्यस्यास्य स्वरूपोद्घाटनविषये कस्यचन विशिष्टकाव्यलक्षणस्य आवश्यकता अस्ति, वस्तुतः स्तोत्रेऽस्मिन् साहित्यदर्पणीयं षष्ठपरिच्छेदगतं काव्यलक्षणमेव सम्यक्तया युज्यते इति मे आशयः, तल्लक्षणं यथा –

"भाषाविभाषानियमात् काव्यं सर्गमुज्झितम् ॥

---

[1] सा.द.(हरिदास.) पृष्ठे ४२१

[2] तत्रैव.तत्पृष्ठे

[3] तत्रैव. तत्पृष्ठे

[4] तत्रैव. पृष्ठे १९

एकार्थप्रवणैः पद्यैः सन्धिसामग्र्यवर्जितम् । ॥६ /३०६॥"[१]

-अर्थाद्, भाषाविभाषानियमात् कविना कृतं सर्गवर्जितम्, एकविषयप्रतिपादकैः पदैर्निबद्धम्, सन्धीनां समुदायेन वर्जितं सरसं वाक्यवृन्दं काव्यं स्यात् । अतः

**प्रथमतः**, दशावतारस्तोत्रेऽस्मिन् विद्यते भाषानियमः। विषयेऽस्मिन् हरिदाससिद्धान्तवागीशमहोदयेनापि निगदितं कुसुमप्रतिमायाम् – "भाषया संस्कृतेनारब्धे संस्कृतेनैव कर्त्तव्यम्..."[२] इति, अत्रापि काव्यमिदं संस्कृतभाषया एव समारभ्य तेनैव समाप्यते ।

**द्वितीयतः**, काव्येऽस्मिन् नास्ति कोऽपि सर्गविभागः अतीव क्षुद्रायतनत्वाद् एकादशश्लोकात्मकत्वादिति ।

**तृतीयतः**, अस्मिन् काव्ये एकादशसंख्यकैः श्लोकैः श्रीविष्णोः दशावताराणां स्तुतिरिति एकविषय एव प्रतिपद्यते ।

**चतुर्थतः**, अत्र पञ्चकार्यावस्थाभावात्तथा पञ्चार्थप्रकृतेरभावादेव नोपलभ्यन्ते पञ्चसन्धयः, अतः काव्यमिदं सन्धिवर्जितमिति ।

## गुणविचारः

### ⅄ वामनदृशा

एकादशश्लोकात्मके अस्मिन् स्तोत्रकाव्ये सर्वेषां श्लोकानाम् अर्थास्तु प्रयोजनानुरूपपदप्रयोगवशाद् अतीव स्पष्टा एव अतोऽत्र अर्थवैमल्यमस्ति, फलतः अर्थवैमल्यत्वादत्र अर्थगुणरूपेण प्रसादगुणो विद्यते तदुक्तम् – "अर्थवैमल्यं प्रसादः ॥३/२/३॥"[३] इति । काव्यस्य सर्वे एव श्लोकाः कर्तृवाच्येन विरचिताः , एतेनात्र मार्गाभेद एव परिलक्ष्यते, अतोऽत्र शब्दसमता, तल्लक्षणं यथा "मार्गाभेदः समता ॥३/१/१२॥"[४] इति । पुनः अत्र अर्थसमतापि विद्यते, "अवैषम्यं समता ॥३/२/५॥"[५] इति वामनीयं सूत्रमनुसृत्य अत्र वैषम्यम् अर्थाद् भावस्य प्रक्रमभङ्गो न दृश्यते, पुनश्च अवैषम्यमिति पदस्य 'सुगमत्वमि'ति अर्थोऽपि स्वीक्रियते वामनेन "सुगमत्वं

[१] सा.द.(हरिदास.) पृष्ठे ४२५

[२] तत्रैव. तत्पृष्ठे (कुसुमप्रतिमाटीका)

[३] का.सू.वृ.(विद्याभूषण. विद्यारत्न.) पृष्ठे ८६

[४] तत्रैव. पृष्ठे ७४

[५] तत्रैव. पृष्ठे ८७

वाऽवैषम्यमिति ।"[१], सुगमत्वमिति पदस्यार्थः "सुखेन गम्यते ज्ञायते इत्यर्थः"[२] , काव्येऽस्मिन् सर्वे श्लोकार्थास्तु अनायासेनैवावगम्यन्ते अत एव अर्थसमता । काव्यस्यास्य षष्ठे श्लोके शब्दश्लेषो विद्यते, तत्श्लोको यथा –

"स जयतु हुतभुग्भृगुपतिनामा । हेतिप्रशमितनृपकुलधामा ॥६॥"[३]

-इत्यत्र पूर्वार्धे मसृणत्वमुपलभ्यते शब्दश्लेषस्य लक्षणविषये वामनेनोच्यते "मसृणत्वं श्लेषः ॥३/१/११॥"[४], मसृणत्वमिति पदेन एकाधिकानां पदानामेकवद्भासनमेव बुध्यते, तदुक्तं वृत्तौ "मसृणत्वं नाम तत्, यस्मिन् सति बहूनि अपि पदानि एकवद्भासन्ते ।"[५] इति । उपर्युक्ते श्लोके 'हुतभुग्भृगुपतिनामा' इति सन्धिनिष्पन्नं पदमिदं समासबद्धरूपेण एकवत् प्रतिभाति ।

अस्मिन् काव्यकृतौ अग्राम्यत्वाद् दृश्यते अर्थोदारता, तल्लक्षणं यथा "अग्राम्यत्वमुदारता ॥३/२/१२॥"[६] इति । न केवलमेतत्, पृथक्पदाधिक्यत्वादस्ति शब्दमाधुर्य्यम्[७] ; वस्तुस्वभावस्फुटत्वात्तथा झटित्यर्थप्रतिपत्तित्वाद् अत्र शब्दार्थयोः अर्थव्यक्तिरपि[८] दृश्यते । काव्यस्यास्य प्रायः सर्वत्र पारुष्याभावादर्थसौकुमार्य्यमपि दृश्यते । पुनः अर्थसौकुमार्य्यस्य विपर्य्यासोऽपि दृश्यते काव्यस्यास्य पञ्चमे श्लोके, यतः अपारुष्यमेव अर्थसौकुमार्यस्य मूलवैशिष्ट्यम् "अपारुष्यं सौकुमार्य्यम् ॥३/२/११॥"[९] इति लक्षणात्, परन्तु

परन्तु

"स जयतु कपटी वामनवेषः ।
प्रकटितवलिकमलाविद्वेषः ॥५॥"[१०]

-इत्यत्र पूर्वार्धे श्रीहरेः वामनावतारस्य विशेषणरूपेण 'कपटी'ति परुषपदस्य व्यवहारो दृश्यते, अतः अर्थसौकुमार्य्यस्य विपर्यासात् श्लोकोऽयम् 'अश्लीलत्वम्' इति दोषेण दुष्टो जातः, तदुक्तं कामधेनुटीकायाम् "अस्य गुणस्य विपर्य्ययोऽश्लीलत्वम्" ।[११] इति ।

---

[१] का.सू.वृ.(विद्याभूषण. विद्यारत्न.) पृष्ठे ८८

[२] तत्रैव. तत्पृष्ठे

[३] रुक्मिणी.ह.(द्वि.सं.) परिशिष्टे दश.स्तो. पृष्ठे १०८

[४] का.सू.वृ.(विद्याभूषण. विद्यारत्न.) पृष्ठे ७४

[५] तत्रैव. तत्पृष्ठे

[६] तत्रैव. पृष्ठे ९३

[७] तत्रैव. "पृथक्पदत्वं माधुर्य्यम् ॥३/१/२१॥" पृष्ठे ७९

[८] तत्रैव. "अर्थव्यक्तिहेतुत्वमर्थव्यक्तिः ॥३/१/२४॥" पृष्ठे ८० ; "वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः ॥३/२/१३॥" पृष्ठे ९४

[९] तत्रैव. पृष्ठे ९२

[१०] रुक्मिणी.ह.(द्वि.सं.) परिशिष्टे दश.स्तो. पृष्ठे १०८

[११] का.सू.वृ.(विद्याभूषण. विद्यारत्न.) पृष्ठे ९३

समग्रे काव्येऽस्मिन् अर्थसमाधिरेव सम्यग्रूपेणोपलभ्यते, यतोऽत्र अर्थदृष्टिर्भवति, तदुक्तं वामनेन "अर्थदृष्टिः समाधिः ॥३/२/६॥"[१] इति । यस्यार्थस्य दर्शनं समाधिः सोऽर्थो द्विविधः 'अयोनिः', 'अन्यच्छायायोनि'श्चेति[२] । काव्यमिदं जयदेवस्य दशावतारस्तोत्रम् अवलम्ब्य एव प्रणीतं हेमचन्द्रेण, एतेन काव्यस्यास्य सर्वेषु श्लोकार्थेषु जयदेवीयदशावतारस्तोत्रस्य छाया सम्यग्रूपेण दृश्यते । अतः काव्यस्यास्य यः अर्थः स अन्यच्छायायोनिः, तदुक्तं "अन्यस्य काव्यस्य छायाऽन्यच्छाया तद्योनिर्वा ।"[३] इति ।

यद्यपि काव्येस्मिन् गीतगोविन्दगतस्य दशावतारस्तोत्रस्य छाया दृश्यते तथापि अत्र बन्धविरचने औज्ज्वल्यम्, नवीनता, स्वकीयता वा दृश्यते एतेन काव्यमिदं गीतगोविन्दगताद् दशावतारस्तोत्राद् विशिष्यते, अतः अत्र शब्दकान्तिः दृश्यते, तल्लक्षणम् "औज्ज्वल्यं कान्तिः ॥३/१/२५॥"[४] इति; पुनः काव्येस्मिन् प्रायः सर्वैः श्लोकैः अवताराणां जगत्त्राणोत्साहस्य व्यञ्जनाद् यथा वीररस एव ध्वन्यते, तथा केवलम् अष्टमे श्लोके 'सचकितयमुनावारिविहारी' इति पदे सम्भोगश्रृङ्गारोऽपि ध्वन्यते ; अतो रसद्वयस्य दीप्तत्वाद् अत्र अर्थकान्तिरिति गुणोऽपि विद्यते तल्लक्षणम् "दीप्तरसत्वं कान्तिः ॥३/२/१४॥"[५] इति । यद्यपि काव्येऽस्मिन् शब्दमाधुर्यमस्ति तथापि नास्ति अर्थमाधुर्यम् उक्तिवैचित्र्याभावात्, अपि तु तद्विपर्यासरूपेण अस्ति एकार्थतादोषः[६], अस्माद् दोषवशाद् अत्र श्रुतेः वैरस्यमपि उपलभ्यते ।

## ➤ दण्डीदृशा

काव्येस्मिन् समासबाहुल्यादस्ति ओजो गुणः "ओजः समासभुयस्त्वम्..।॥१/८०॥"[७] इति, दण्डिनो मतानुसारेण गुणोऽयं गौडदेशीयानां पद्येषु एक एव अवलम्बनरूपेण प्रतिभाति "पद्येऽप्यदाक्षिणात्यानामिदमेकं पारायणम् ॥१/८०॥"[८] इति । पुनः अस्ति बुद्धावतारविषयके श्लोके संसारत्यागस्य व्यञ्जना –

---

[१] का.सू.वृ.(विद्याभूषण. विद्यारत्न.) पृष्ठे ८९

[२] तत्रैव. "अर्थो द्विविधः, अयोनिरन्यच्छायायोनिश्च ॥३/२/७॥" तत्पृष्ठे

[३] तत्रैव. तत्पृष्ठे

[४] तत्रैव. पृष्ठे ८०

[५] तत्रैव. पृष्ठे ९४

[६] तत्रैव. "अस्य गुणस्य विपर्य्ययो ह्येकस्यैवार्थस्य पुनः पुनः कथनमित्येकार्थत्वं, प्राय एकार्थश्रुतेर्वैरस्यात् कष्टत्वं वा ॥१७॥" पृष्ठे ९२

[७] काव्याद.(चट्टो.)(प्र.सं.) पृष्ठे १७९

[८] तत्रैव. तत्पृष्ठे

"स जयतु विश्रुतवर्त्मा बुद्धः।
प्राणिहिते हितसाधनशुद्धः ॥९॥"[१] इति ।

अतः अत्रास्ति उदारता इति गुणः, तल्लक्षणम् - "उत्कर्षवान् गुणः कश्चिद् यस्मिन्नुक्ते प्रतीयते । तदुदाराह्वयं तेन सनाथा काव्यपद्धतिः ॥ १/७६॥"[२] इति । पुनः समग्रे काव्ये एव कान्तिरपि विद्यते लौकिकार्थाणाम् अनतिक्रमात् अनतिक्रमात् "कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमात्।॥१/८५॥"[३] इति । वीर-श्रृङ्गारादीनां रसानां दीप्तत्वाद् अस्ति माधुर्य्यम्, तल्लक्षणम् – "मधुरं रसवद् वाचि वस्तुन्यपि रसस्थितिः॥१/५१॥"[४] इति ; प्रसिद्धार्थत्वयुक्तत्वात् प्रसादश्च विद्यते काव्येस्मिन् "प्रसादवत् प्रसिद्धार्थम्..॥१/४५॥"[५] इति ।

अतः कवेरियं रचनाशैली कैश्चिद् दोषैः दुष्टाऽपि प्रायः समस्तगुणोपेतत्वाद् वैदर्भीरीतेर्मध्ये एव आपतति, वामनमतानुसारेण "समग्रगुणोपेता वैदर्भी ॥१/२/११॥" [६] इति ।

## अलंकारविचारः

स्तोत्रकाव्येऽस्मिन् सर्वेषु श्लोकेषु अस्ति अन्त्यानुप्रासालंकारः, विशेषतोऽत्र पादान्तगतः अन्त्यानुप्रास एव विद्यते, परन्तु अयमनुप्रासः श्लोकस्य सर्वेषु पादेषु न दृश्यते केवलं द्वितीये चतुर्थे च पादे एव दृश्यते तदुदाहरणं यथा

"स जयतु मीनाकृतिरवतारः ।
प्रलयापदि कृतो वेदोद्धारः ॥१॥"[७]

- अस्मिन् श्लोके द्वितीये पादान्ते 'आरः'(अवतारः), पुनः चतुर्थे पादान्तेऽपि 'आरः'(उद्धारः) विद्यते अतः आद्येन स्वरेण सह यथावस्थितस्य व्यञ्जनस्य पुनरुच्चारणे अन्त्यानुप्रासालंकार एव, तल्लक्षणं यथा –

"व्यञ्जनञ्चेद् यथावस्थं सहाद्येन स्वरेण तु ।
आवर्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत् ॥१०/७॥"[८] इति।

---

[१] रुक्मिणी.ह.(द्वि.सं.) परिशिष्टे दश.स्तो. पृष्ठे १०८

[२] काव्याद.(चट्टो.) पृष्ठे १७४

[३] तत्रैव. पृष्ठे १८४

[४] तत्रैव. पृष्ठे १३१

[५] तत्रैव. पृष्ठे १२१

[६] का.सू.वृ.(विद्याभूषण. विद्यारत्न.) पृष्ठे १६

[७] रुक्मिणी.ह.(द्वि.सं.) परिशिष्टे दश.स्तो. पृष्ठे १०८

[८] सा.द.(हरिदास.) पृष्ठे ५६५

एतद्व्यतीत्य वृत्त्यनुप्रासोऽपि विद्यते प्रायः सर्वेषु श्लोकेषु । श्रुत्यनुप्रासो[१]ऽपि अत्रोपलभ्यते तदुदाहरणं यथा –

"स जयतु कल्पितकूर्म्मशरीरः ।
कर्म्मी क्षितिधरधारणधीरः ॥२॥"[२]

इत्यस्मिन् श्लोके 'त-ध'योः प्रयोगाधिक्यं दृश्यते, अपि च वर्णद्वयस्यास्य उच्चारणस्थानमपि एकमेव – 'दन्तः' – 'ळतुलसानां दन्ताः'[३] अत एव श्रुत्यनुप्रासः। एतान् शब्दालंकारान् व्यतिरीच्य काव्येऽस्मिन् अतिशयोक्तिरलंकारोऽपि ध्वन्यते रामावतारविषयके श्लोके –

"स जयतु दाशरथी रणकल्यः ।
स्वशरोद्धृतभुवनत्रयशल्यः ॥७॥"[४]

-इत्यत्र 'भुवनत्रयशल्यः' इति पदस्य लक्ष्यार्थेण (जगत्पीडकः) 'रावण' इति मुख्यार्थः निगीर्यते ; पुनः 'रावण' एव उपमेयः 'भुवनत्रयशल्यः' इत्येव तस्य उपमानम्, अत्र विषयस्य (रावणस्य शब्दतः) निगरणेन विषयिणः ('भुवनत्रयशल्यः') विषये (रावणे) अभेदप्रतिपत्तिर्भवति निश्चितभावेन, अतः भेदेऽभेदरूपः अतिशयोक्तिरलंकारः, तल्लक्षणं यथा –

"सिद्धत्वेऽध्यवसायस्य अतिशयोक्तिर्निगद्यते ॥१०/६४॥"[५] इति ।

विश्वनाथमतानुसारेण पूर्वोक्ते श्लोके साध्यावसानलक्षणा विद्यते, यत इयं लक्षणा एव अतिशयोक्तेर्वीजमिति, पुनः मम्मटमतेनात्र लक्षणलक्षणा एव विद्यते । काव्यस्यास्य चतुर्थश्लोकेऽपि विद्यते लक्षणलक्षणा, यतः अनया लक्षणया एव 'सुररिपुभूपः' इति पदस्य 'हिरण्यकशिपुरि'ति लक्ष्यार्थः प्राप्यते, तत्श्लोको यथा –

"स जयतु हरिरपि नरसिंहरूपः ।
कररुहदारितसुररिपुभूपः ॥४॥"[६] इति ।

---

[१] सा.द.(हरिदास.) उच्चार्यत्वाद् यदेकत्र स्थाने तालुरदादिके । सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते ॥१०/७॥, पृष्ठे ५६४

[२] रुक्मिणी.ह.(द्वि.सं.) परिशिष्टे दश.स्तो. पृष्ठे १०८

[३] Lahiri & Shastri ed., *'पाणिनीयम्' A Higher Sanskrit Grammar And Composition*, pg. 3

[४] रुक्मिणी.ह.(द्वि.सं.) परिशिष्टे दश.स्तो. पृष्ठे १०८

[५] सा.द.(हरिदास.) पृष्ठे ६६८

[६] रुक्मिणी.ह.(द्वि.सं.) परिशिष्टे दश.स्तो. पृष्ठे १०८

## रसालोचनम्

जयदेवीये दशावतारस्तोत्रे प्रत्येकस्यावतारस्य रसाधिष्ठातृत्वं प्रतिपादितं पूजारीगोस्वामिकृतायां 'बालबोधिनी' इति टीकायाम्, श्रीकुण्भनृपतिकृतायां 'रसिकप्रिया' इति टीकायाञ्च ; अधुना तदेव दृष्ट्वा हेमचन्द्रस्य दशावतारस्तोत्रे अवताराणां रसाधिष्ठातृत्वं विचार्यते । तत्र मत्स्यावतारस्य कृते वीरो रसः स्वीकृतः बालबोधिन्याम् "प्रलयक्क्षोशादपादित्यर्थः अनेनैव मीनस्य वीररसाधिष्ठातृत्वं विज्ञापितम्।"[१], पुनः रसिकप्रियायामपि "उत्साहस्थायिभावो वीरो रसः।"[२]। अधुना हेमचन्द्रीये दशावतारे अपि "प्रलयापदि कृतवेदोद्धारः"[३] इत्यंशे उत्साहस्य व्यञ्जकनत्वाद् वीर एवाभिव्यज्यते ।

ततः परं कुर्म्मावतारे विज्ञापितं अद्भुतरसाधिष्ठातृत्वम् पूजारीगोस्वामिना "तव पृष्ठे क्षितिस्तिष्ठति । ननु पञ्चाशत्कोटियोजनविस्तीर्णा कथं मम पृष्ठे स्थिता इत्याह। अतिशयने विपुलतरे पृथिव्यपेक्षयाप्यधिकविस्तीर्णे ।"[४] इत्यनेनैव प्रकारेण । "क्षितिधरधारणधीरः"[५] इति पदेन अद्भुतेन सह शान्तरसाधिष्ठातृत्वमपि द्योतितं हेमचन्द्रीये दशावतारे कुर्म्मावतारे ।

बालबोधिन्यां वराहदेवस्य भयानकरसाधिष्ठातृत्वमुल्लिखितमस्ति परन्तु हेमकवेर्वराहावतारे "समुचितकातरवसुधोद्वाहः"[६] इति अंशे हिरण्याक्षपीडितायाः कातरायाः वसुधायाः उद्धारे स्थायिभूतस्य वराहदेवस्य उत्साहस्य व्यञ्जनाद् वीर एवाङ्गिरसरूपेणाभिव्यज्यते ।

पुनः बालबोधिन्यानुसारेण, रसिकप्रियानुसारेण च जयदेवीयो नृसिंहावतारो यथाक्रमेण वात्सल्यरसाधिष्ठातृरूपेण "नात्मनः क्लेशसहनमात्रेण परपीडयापीत्याह।..अनेनैव श्रीनृसिंहस्य वत्सलरसाधिष्ठातृत्वं विज्ञापितम्।"[७], तथा अद्भुतरसाधिष्ठातृरूपेणापि "भृङ्गः किल कमलाग्रं विदारयति ; अत्र कमलाग्रेण भृङ्गविदारणमित्यद्भुतोत्पत्तिः।"[८] तिष्ठति । परन्तु हेमचन्द्रस्य काव्यकृतौ अस्यावतारस्य रौद्रवीभत्सयोः अधिष्ठातृत्वं प्रतिपद्यते "कररुहदारितसुररिपुभूपः॥"[९] इति पदेन ।

---

[१] गीत.गो.(कालिप्रसन्न.) बालबोधिनीटीका, पृष्ठे १०

[२] गीत.गो.(आचार्य्य.) रसिकप्रियाटीका, पृष्ठे ११

[३] रुक्मिणी.ह.(द्वि.सं.) परिशिष्टे दश.स्तो. पृष्ठे १०८

[४] गीत.गो.(कालिप्रसन्न.) बालबोधिनीटीका, पृष्ठे १२

[५] रुक्मिणी.ह.(द्वि.सं.) परिशिष्टे दश.स्तो. पृष्ठे १०८

[६] तत्रैव. तत्पृष्ठे

[७] गीत.गो.(कालिप्रसन्न.) बालबोधिनीटीका, पृष्ठे १३

[८] गीत.गो.(आचार्य्य.) रसिकप्रियाटीका, पृष्ठे १३

[९] रुक्मिणी.ह.(द्वि.सं.) परिशिष्टे दश.स्तो. पृष्ठे १०८

अनुरूपेणैव प्रकारेण हेमचन्द्रीये दशावतारे "हेतिप्रशमितनृपकुलधामा॥"[१] इति पदे अस्त्रेण नृपकुलानां प्रशमनोत्साहस्य व्यञ्जने स भृगुपतिः परशुरामो वीररसाधिष्ठातृत्वेन चित्रितः, न तु गीतगोविन्दगतं परशुराममिव रौद्रवीभत्सयोः अधिष्ठातारूपेण इति ।

हेमचन्द्रेण श्रीविष्णोः वामनावतारो राज्ञो बलेः राजलक्ष्म्याः विद्वेषकारी कपटीरूपेण उपस्थाप्यते –

"स जयतु कपटी वामनवेषः। प्रकटितबलिकमलाविद्वेषः॥५॥"[२]इति।

अवतारोऽयं गीतगोविन्दे अद्भुतरसस्य अधिष्ठातारूपेण स्वीक्रियते रसिकप्रियेति टीकायां - "अत्राद्भुतो रसः।"[३]इति । हेमचन्द्रस्य दशावतारे स्तोत्रेऽपि ससीमस्य पार्थिवजीवस्य असुराधिपस्य बलेः राजलक्ष्मीं प्रति अनन्तभूतस्य विष्णोरवतारस्य वामनस्य विद्वेषवर्णनं तु अद्भुतकथनमेव, एतेनैव सूच्यते हेमचन्द्रीये वामनावतारे अद्भुतरसाधिष्ठातृत्वमिति ।

तत्रत्ये जयदेवीये दशावतारे रामस्य करुणरसाधिष्ठातृत्वं प्रतिपादितं तेनैव टीकाकारेण पुजारीगोस्वामीति महाभागेन । अत्रत्ये हेमचन्द्रीये रामावतारे सीतापतिस्तु केवलं विभाति भुवनत्रातारूपेण न तु कारुण्यमुर्तिरूपेण, यतो जगतः पीडाहेतुभूताद् रावणाद् जगत्त्राणाय तस्योत्साह एवाभिव्यज्यते "स्वशरोद्धृतभुवनत्रयशल्यः"[४] इत्यंशे । अस्मिन्नंशे लङ्केश्वर एव भुवनत्रयस्य पीडाहेतुभूतेन शल्यरूपेणोपस्थापितः, यो रामेणोत्पाटितो जातः शराघातेन । एतेन भुवनस्य त्राणोत्साहे प्रकटिते रामावतारे वीरत्वमेव सूच्यते, नान्यम् । पुनः 'रणकल्यः' इति विशेषणपदेन दाशरथिनो रणौत्सुक्यता एव अभिव्यक्ता जाता । अतः समग्रे रामावतारविषयके श्लोके उत्साहाभिव्यञ्जनाद् वीर एव अङ्गी, नान्यो रसः । प्रतिपादितमेतेन रामस्य वीररसाधिष्ठातृत्वमिति ।

गीतगोविन्दस्य बालवोधिनीटीकायां पूजारीगोस्वामी हलधरावतारं प्रति हास्यरसाधिष्ठातृत्वं स्वीकरोति । परन्तु हेमचन्द्रोक्तेन "सचकितयमुनावारिविहारी"[५] इति पदेन हलधरः शृङ्गाररसाधिष्ठातृरूपेण विशेषतः सम्भोगशृङ्गाररसाधिष्ठातृरूपेण प्रतीयते । प्रसङ्गेऽस्मिन् उल्लेख्यं यद्, गीतगोविन्दस्य रसिकप्रियेति टीकायामपि स हलधरः शृङ्गारीनायकरूपेणैवोपस्थापितः "धवलमेचकसंगत्या प्रयागत्वे तन्मुर्तेः पापहारित्वं कामदत्वञ्च व्यञ्जितम् । वहसीत्यत्र धीरलोलितो नायकः।....अथवा शृङ्गारी नायकः।...."[६] इति ।

---

[१] रुक्मिणी.ह.(द्वि.सं.) परिशिष्टे दश.स्तो. पृष्ठे १०८

[२] तत्रैव. तत्पृष्ठे

[३] गीत.गो.(आचार्य्य.) रसिकप्रियाटीका, पृष्ठे १४

[४] रुक्मिणी.ह.(द्वि.सं.) परिशिष्टे दश.स्तो. पृष्ठे १०८

[५] तत्रैव. तत्पृष्ठे

[६] गीत.गो.(आचार्य्य.) रसिकप्रियाटीका, पृष्ठे १७

अथ नवमावतारस्य विषये दृश्यते यद्, जयदेवीये दशावतारे तथा हेमचन्द्रप्रणीते दशावतारे उभयत्रे बुद्धावतारस्तु शान्तरसाधिष्ठातृत्वेनैव चित्रितोऽस्तीति ।

हेमचन्द्रस्य लेखन्यां कल्क्यवतारः स्वयं कालरूपेण अर्थाद्, मृत्युरूपेणैव वर्णितः। कीदृशः स काल इति वर्णने कविः कथयति यत्, स कालः स्वकरधृतेन भीषणेन करवालेन सह शोभते "स्वकरकलितकरवालकरालः"[1] इति । एवमेव कल्किवेषधारिणः कालस्य करवालधृतस्य भीषणरूपस्याभिव्यञ्जनत्वाद् भयजनकत्वाच्च हेमचन्द्रस्य लेखन्यां कल्किनो भयानकरसाधिष्ठातृत्वमेव प्रकाशितमस्ति । न प्रकटितन्तु गीतगोविन्दमिव वीररसाधिष्ठातृत्वम्, तदुक्तं पुजारीगोस्वामिना तदीये बालवोधिन्यां "हे धृतकल्किशरीर ! त्वं म्लेच्छनिवहस्य नाशनिमित्तं करवालं खड्गं कलयसि,..करालं भयङ्करम् । कमिव ? धूमकेतुनामा या औत्पतिको ग्रहस्तमिव । अनेनैव कल्किनो वीररसाधिष्ठातृत्वं विज्ञापितम् ।"[2] इति ।

एवमेव अत्रैव दशावतारस्तोत्रविषयिणी इयं संक्षिप्ता चर्चा समाप्यते मया, एतेन अध्यायस्यास्य प्रथमो भागोऽपि समाप्यते इति शम् ।

[1] रुक्मिणी.ह.(द्वि.सं.) परिशिष्टे दश.स्तो. पृष्टे १०८


[2] गीत.गो.(कालिप्रसन्न.) बालबोधिनीटीका, पृष्टे १८

# ३.२. द्वितीयो भागः : संस्कृतानूदितं खण्डकाव्यम् : पतिदानव्रतम्

## भूमिका

एकस्या भाषायाः साहित्यस्य भावजातं सौन्दर्य्यञ्चाक्षुण्णं कृत्वा भाषान्तरे तस्यानुवादकरणं नातीव सुकरम् । अतश्चानुवादस्य साफल्यविधौ बहवः समीक्षकाः सन्देहपराः । तथापि एतदवश्यमेवाभ्युगन्तव्यं यद् विश्वसाहित्यसंसदि प्रवेशविधौ अनुवादस्योपयोगिता अवश्यमेव स्वीकर्तव्या । यतः अनुवादमन्तरेण व्यक्तिनिष्ठेन सीमितभाषाज्ञानेन विश्वसाहित्येन सह परिचयः कदापि कस्यापि न सम्भवेत् । पक्षान्तरे भाषान्तरीकरणमन्तरेण स्वभाषायाः सीमिते परिसरे विराजमानं किमपि साहित्यं न अवाप्नोति यथायोग्यं व्याप्तिमिति । एतदेव अनुवादसाहित्यस्योपयोगित्वमिति ।

अर्वाचीनसंस्कृतसाहित्यमिव संस्कृतानुवादसाहित्यधारायामपि वङ्गीयानामवदानमनस्वीकार्यम् । अत्र संस्कृतानुवादधारापि प्रथमतया द्विधा विभक्ता, यथा संस्कृतानूदितं भारतीयसाहित्यम्, संस्कृतानूदितं वैदेशिकसाहित्यञ्चेति । एतयोः प्रथमो विभागस्तु द्वैविध्यं धत्ते, यथा संस्कृतानूदितं रवीन्द्रसाहित्यम्, संस्कृतानूदितं रवीन्द्रेतरसाहित्यञ्चेति । संस्कृतानूदिता रवीन्द्रेतरसाहित्यधारा तु पुनः द्विविधा वङ्गभाषातोऽनूदिता, भाषान्तरेभ्योऽनूदिता चेति । प्रसङ्गतः उल्लेख्यं यद् अनेन विभागद्वयेन सह संस्कृतानूदितं वैदेशिकसाहित्यमपि दृश्यश्रव्यत्वभेदेन द्वैविध्यं धत्ते । समेषामेतेषां विभागानामालोचना त्वसम्भवपरा अप्रासङ्गिकाकारवैपुल्यभिया । अतः संस्कृतानूदितं रवीन्द्रेतरसाहित्यं तथा संस्कृतानूदितं वैदेशिकसाहित्यञ्चेति विभागद्वयस्य केवलं श्रव्यविभागस्यैव चर्चा अध्यायस्यास्य द्वितीये भागे अस्मिन् विधीयते ।




रेखचित्रम् ३.१ : संस्कृतानूदितसाहित्यविभागः

## संस्कृतानूदितं रवीन्द्रेतरसाहित्यम्[१]

संस्कृतभाषायां क्रियमाणे अनूदिते साहित्ये मूलतः अनूदितं रवीन्द्रसाहित्यमेव सर्वोत्तमम् स्थानमधिकृत्य देदीप्यते । तथापि रवीन्द्रेतराणां वङ्गभाषानिबद्धानां तथा भाषान्तरनिबद्धानां काव्यानां संस्कृतानुवादोऽपि अतीव रमणीयः । अनयोः विभागयोः प्रत्येकं तु पद्यगद्यत्वेन द्वैविध्यमेति पुनः । अतो यथाक्रमानुसारेण अधस्तादुदाहरणानि प्रदीयन्ते –

### *पद्यानि*

| क्र.सं. | वङ्गभाषातोऽनूदितानि रवीन्द्रेतराणि पद्यानि | अनुवादकः |
|---|---|---|
| १. | कविदाशरथिरायस्य 'सत्यभामार् व्रत पाँचाली' इति रचनायाः अनुवादः (१९३२ खृ.) | हेमचन्द्ररायकविभूषणः |
| २. | मधुसूदनस्य 'मेघनादवधम्' (महाकाव्यम् १९३३ – १९३५ खृ.) | नित्यगोपालविद्याविनोदशर्मा |
| ३. | चैतन्यचरितामृत | भास्करानन्दस्वामी |
| ४. | जीवनानन्ददासस्य 'वनलता सेन्' | सुरेन्द्रनाथदेवः |
| ५. | द्विजेन्द्रलालरायस्य गीतानि | दिलीपकुमाररायः |
| | | निखिलेशचक्रवर्ती |
| ६. | मधुसूदनस्य 'आत्मविलाप्' | सीतानाथाचार्यः |
| ७. | मधुसूदनस्य 'रसाल ओ स्वर्णलतिका' | |
| ८. | नज्रुलस्य 'काण्डारी हुँशियार्' | |
| ९. | सुकान्तभट्टाचार्य्यस्य 'लेनिन्' | |
| १०. | सुकुमाररायस्य 'हुँको मुखो ह्यांला' | देवार्चनासरकारः |
| ११. | वङ्किमचन्द्रचट्टोपाध्यायस्य 'वृष्टि' | सुदीप्तमुन्सी |

सारणी ३.८ : वङ्गभाषातोऽनूदितानि रवीन्द्रेतराणि पद्यानि

[१] आ.सं.का.बा.म.(चट्टो.) पृष्ठेषु १४८-२०३; संस्कृतसाहित्ये वङ्गीयानामवदानं विंशशताब्द्याः परिप्रेक्षे, पृष्ठेषु ६०-७२

| क्र.सं. | भाषान्तरेभ्योऽनूदितानि रवीन्द्रेतराणि पद्यानि | अनुवादकः |
|---|---|---|
| १. | मीर्-मुहम्मद्-तकि-मीरस्य ‘पत्ता पत्ता वुटा वुटा’ | सुदीप्तमुन्सी |

सारणी ३.९ : भाषान्तरेभ्योऽनूदितानि रवीन्द्रेतराणि पद्यानि

## *गद्यानि*

| क्र.सं. | वङ्गभाषातोऽनूदितानि रवीन्द्रेतराणि गद्यानि | अनुवादकः |
|---|---|---|
| १. | वङ्किमचन्द्रस्य ‘कपाल्-कुण्डला’ (उपन्यासः) | पण्डितहरिचरणविद्यारत्नेन |
| २. | वङ्किमचन्द्रस्य ‘कृष्णकान्तेर् उइल्’(उपन्यासः) | |
| ३. | वङ्किमचन्द्रस्य ‘रजनी’ (उपन्यासः) | वेणुदेवी |
| ४. | वङ्किमचन्द्रस्य ‘चन्द्रशेखर्’ (उपन्यासः) | योगेशचन्द्ररायविद्यानिधिः |
| ५. | वङ्किमचन्द्रस्य ‘दुर्गेशनन्दिनी’ (उपन्यासः) | जनार्दनकाव्यतीर्थः |
| | | क्षितीशचन्द्रचट्टोपाध्यायः |
| ६. | वङ्किमचन्द्रस्य ‘राधाराणी’ (उपन्यासः) | क्षितीशचन्द्रचट्टोपाध्यायः |
| ७. | वङ्किमचन्द्रस्य ‘कमलाकान्तेर् दप्तर्’(प्रबन्धः) | |
| ८. | शरत्चन्द्रचट्टोपाध्यायस्य ‘निष्कृति’ (उपन्यासः) | |
| ९. | शरत्चन्द्रस्य ‘दत्ता’ (उपन्यासः) | क्षितीशचन्द्रचट्टोपाध्यायः |
| | | उपेन्द्रमोहनः |
| १०. | द्विजेन्द्रलालरायस्य ‘भारतवर्ष’ (प्रबन्धः) | विष्णुपदभट्टाचार्यः |
| ११. | विवेकानन्दस्य ‘प्राच्य पाश्चात्य’ (प्रबन्धः) | यादवेन्द्रनाथरायन्यायतर्कतीर्थः (प्रच्यपाश्चात्ययोः संघर्षः) |
| | | ध्यानेशनारायणचक्रवर्ती(प्राच्यपाश्चात्यम्) |
| | | सीतानाथगोस्वामी |
| १२. | विवेकानन्दस्य ‘वर्तमान् भारत्’ (प्रबन्धः) | सीतानाथगोस्वामी |
| १३. | रामकृष्णकथामृत (प्रबन्धः) | स्वामिध्यानात्मानन्दः |

सारणी ३.१० : वङ्गभाषातोऽनूदितानि रवीन्द्रेतराणि गद्यानि

## संस्कृतानूदितं वैदेशिकसाहित्यम्[१]

संस्कृतानूदितेषु साहित्येषु वङ्गीयानामवदानप्रसङ्गे संस्कृतानूदितेषु वैदेशिकसाहित्येषु अपि तेषां कारयित्री प्रतिभा दरीदृष्टा । अस्मिन्नेव विभागे अपि पद्यगद्यत्वेनैव द्वैविध्यं दृश्यते । अत्र सेक्षपीवर-शेली-ओमरख्यैयामप्रमुखानां वैदेशिककवीनां काव्यानि अनूदितानि वङ्गीयैः पण्डितैः, अतो यथानुक्रमं दिङ्मात्राण्युदाहरणानि अधस्तादुपस्थाप्यन्ते –

### *पद्यानि*

| क्र.सं. | संस्कृतानूदितानि वैदेशिकपद्यानि | अनुवादकः |
|---|---|---|
| १. | शेलिनः To Night (विभावरीं प्रति) | श्रीजीवन्यायतीर्थः |
| २. | शेलिनः Loves of Philosophy (प्रेमतत्त्वम्) | |
| ३. | वर्डवर्थस्य By the Sea (सायं सिन्धुतटे) | |
| ४. | ओमरखैयामस्य रुवाइयात् (सचित्रम् ओमरखैयामम्) | वीरेन्द्रकुमारभट्टाचार्यः |
| ५. | ओमरवाणीमहिमा | ईश्वरचन्द्रगोस्वामी |
| ६. | ओमरकविता | हरिचरणविद्यारत्नः |
| ७. | रुवाइयात्-इ-ओमरखैयाम | दुर्गादासगोस्वामी |
| ८. | शेलिनः To the Skylark (स्काइलार्कं प्रति) | सीतानाथाचार्यः |
| ९. | सेक्षपीवरस्य सनेटाः (१० संख्यकाः) | सुदीप्तमुन्सी |

सारणी ३.११ : संस्कृतानूदितानि वैदेशिकपद्यानि

### *गद्यानि*

| क्र.सं. | संस्कृतानूदितानि वैदेशिकगद्यानि | अनुवादकः |
|---|---|---|
| १. | रोणाल्ड् से महाभागस्य<br>The Heart of Aryavarta<br>(आर्यावर्तहृदयम्, १९३६ खृ.) | विष्णुपदभट्टाचार्य्यः |

सारणी ३.१२ : संस्कृतानूदितानि वैदेशिकगद्यानि

---

[१] आ.सं.का.बा.म.(चट्टो.) पृष्ठेषु १४८-२०३; संस्कृतसाहित्ये वङ्गीयानामवदानं विंशशताब्द्याः परिप्रेक्षे, पृष्ठेषु ६०-७२

अत उपर्युक्तानि तथ्यानि अधिकृत्यैव एतत्तु वक्तुं शक्यते यत्, सम्भवतो वङ्गे प्राप्तेषु वङ्गाभाषातः संस्कृतानूदितेषु रवीन्द्रेतरेषु पद्यात्मकेषु काव्येषु प्रथमं निदर्शनमेव हेमचन्द्ररायकविभूषणस्य 'पतिदानव्रतम्' इति कविदाशरथिरायस्य "सत्यभामार् व्रत पाँचाली" इति रचनायाः स्वकीयतामण्डितः संक्षिप्तभावानुवादः (१९३२ खृ., हेमचन्द्रस्य सत्यभामापरिग्रहमिति खण्डकाव्यस्य द्वितीयसंस्करणस्य परिशिष्टे उपलभ्यते)।

# पतिदानव्रतम्

## संक्षिप्तपरिचयः

हेमचन्द्रस्य काव्यकृतिषु 'सत्यभामापरिग्रहमि'ति खण्डकाव्यस्य द्वितीये संस्करणे परिशिष्टे 'पतिदानव्रतमि'ति काव्यं संयोजितमस्ति । कौतुकावहे तथा शिक्षाप्रदे अस्मिन् काव्ये नवत्रिंशत्संख्यकाः श्लोकाः सन्ति, काव्यस्यास्य कौतुकावहत्वविषये कवेरस्य बङ्गभाषया उपनिबद्धा उक्तिरेव प्रमाणम् – "উপাখ্যানটি বিশেষ কৌতুকাবহ এবং শিক্ষাপ্রদ" [उपाख्यान्-टि विशेष् कौतुकावह एवं शिक्षाप्रद][१]। लिखितमिदं काव्यम् अनुष्टुबिति छन्दसा कविनामुना । काव्येऽस्मिन् शृङ्गारहास्यरसयोः अवस्थितिर्दृश्येते ।

## उत्सप्रसङ्गालोचनम्

माधवस्य अखण्डप्रेमलाभाय सत्यभामया नारदहस्ते श्रीकृष्णदानात् परं नारदात्तस्य निष्क्रय एव पतिदानव्रतमिति काव्यस्यास्य उपजीव्यमिति । सत्यभामापरिग्रहस्य द्वितीये संस्करणे "পরিশিষ্ট সম্বন্ধে প্রকাশকের নিবেদন" [परिशिष्ट सम्बन्धे प्रकाशकेर् निवेदन्][२] इत्यंशे काव्यस्यास्य उत्सविषये आलोचना क्रियते हेमचन्द्रेण । तत्र स कविः कथयति यत्, यद्यपि हरिवंशे तथा अन्यत्र पुण्यकव्रते दक्षिणारूपेण श्रीकृष्णदानस्य उल्लेखो दृश्यते, तथापि पतिदानव्रतस्यास्य वृत्तमिदम् अविकलतया न अन्येषु केषुचित् संस्कृतकाव्यग्रन्थेषु दृश्यते कविनामुना हेमचन्द्रेण। उपाख्यानमिदं केवलं प्रचलति वङ्गभूमिषु । वस्तुतः वङ्गीयकवेः काशीरामदासकृतस्य महाभारते, सुप्रसिद्धस्य पाँचालीरचयितुः सुकवेः दाशरथीरायस्य 'सत्यभामार् व्रत पाँचाली'ति वङ्गभाषानिबद्धे काव्ये एव विद्यते इदमुपाख्यानमिति आशयः । सर्वत्र प्रचाराय संस्कृतकाव्यभाषया उपनिबद्धमिदमुपाख्यानम् - इति काव्यस्यास्य प्रयोजनमपि उल्लिखितमस्ति अस्मिन्नंशे कविभूषणेनामुना । अपि च बहुकालात् पूर्वं कवेः पठद्दशायां घुघुडाङ्गा इति स्थाने तस्य पितृष्वसायाः श्रीयुक्तायाः कृष्णकामिनीचौधुराणीमहाशयायाः भवने जगद्धात्रीपूजोत्सवे प्रयातेन मतिलालरायेन स्वरचिते पारिजातहरणमिति यात्राभिनये 'पतिदानव्रतमि'ति अशांस्य अभिनयः कृतः । अभिनयकाले स

---

[१] सत्य.प.(द्वि.सं.) पृष्ठे ३

[२] तत्रैव. पृष्ठे ३-४

(मतिलालरायः) नारदचरित्रम् अभिनीतवान् । तस्मिन् समये मोहितेषु श्रोतृवर्गेषु बालकग्रन्थकारः कविभूषणो हेमचन्द्रोऽपि आसीदुपस्थितः, तदा स आसीद् विद्यालयस्य निम्नश्रेण्याः छात्रः । अतः शैशवस्मृतिरियमपि पतिदानव्रतमिति काव्यविरचने अभूत् काव्यकारस्य प्रेरणा – इति कविनामुना स्वयमेव स्वीक्रियते ।

## काव्यत्वविचारणम्

पतिदानव्रतमिति काव्यमिदमादौ श्रव्यकाव्यमध्ये आपतति श्रवणयोग्यत्वादेव , श्रव्यकाव्यस्य लक्षणं यथा - "श्रव्यं श्रोतव्यमात्रं तत् पद्यगद्यमयं द्विधा ।॥६/३००॥"[१] इति । पुनः छन्दोबद्धत्वादिदं काव्यं पद्यमयकाव्येषु आपतति, तल्लक्षणं यथा – "छन्दोबद्धपदं पद्यम्...॥६/३०१॥"[२] इति । काव्यस्यास्य सर्वे एव श्लोकाः मुक्तकात्मकाः,यतः प्रत्येकेन श्लोकेन सम्पूर्णस्वतन्त्रतया वाक्यार्थाः प्रकाश्यन्ते, निगदितञ्च विश्वनाथेन – "...तेनैकेन च मुक्तकम् ॥६/३०१॥"[३] इति । यद्यपि साहित्यदर्पणस्य प्रथमे परिच्छेदे काव्यस्य "वाक्यं रसात्मकं काव्यमि"[४]ति सामान्यलक्षणं विद्यते, तथापि काव्यस्यास्य स्वरूपोद्घाटनाय कस्यचन विशिष्टकाव्यलक्षणस्य आवश्यकता अस्ति, वस्तुतः काव्येऽस्मिन् साहित्यदर्पणीयं षष्ठपरिच्छेदगतं काव्यलक्षणमेव सम्यक्तया युज्यते इति मे आशयः, तल्लक्षणं यथा

"भाषाविभाषानियमात् काव्यं सर्गमुज्झितम् ॥
एकार्थप्रवणैः पद्यैः सन्धिसामग्र्यवर्जितम् ।॥६/३०६॥"[५]

अर्थात्, भाषाविभाषानियमात् कविना कृतं सर्गवर्जितम्, एकविषयप्रतिपादकैः पद्यैर्निबद्धम्, सन्धीनां समुदायेन वर्जितं सरसं वाक्यवृन्दं काव्यं स्यात् । प्रथमतः, पतिदानव्रतमिति काव्येऽस्मिन् भाषानियमस्यानुसरणं दृश्यते । भाषानियमविषये हरिदाससिद्धान्तवागीशेन निगदितम् – "भाषया संस्कृतेनारब्धे संस्कृतेनैव कर्त्तव्यम्"[६] इति, अत्रापि काव्यमिदं संस्कृतभाषया एव समारभ्य तेनैव समाप्यते । द्वितीयतः, काव्येऽस्मिन् नास्ति कोऽपि सर्गविभागः । तृतीयतः, काव्येऽस्मिन् नवत्रिंशत्संख्यकैः श्लोकैः नारदाय सत्यभामायाः पतिदानव्रताख्यानमिति एकविषय एव प्रतिपद्यते । चतुर्थतः, अत्र पञ्चकार्यावस्थाभावात्तथा पञ्चार्थप्रकृतेरभावादेव नोपलभ्यते पञ्चसन्धयः, अतः काव्यमिदं सन्धिवर्जितमिति ।

---

[१] सा.द.(हरिदास.) पृष्ठे ४२१

[२] तत्रैव. तत्पृष्ठे

[३] तत्रैव. तत्पृष्ठे

[४] तत्रैव. पृष्ठे १९

[५] तत्रैव. पृष्ठे ४२५

[६] सा.द.(हरिदास.) कुसुमप्रतिमाटीका, पृष्ठे ४२५

## खण्डकाव्यत्वविचारणम्

उपर्युक्तमालोचनं दृष्ट्वा एतत्तु वक्तुं शक्यते काव्यमिदं खण्डकाव्यमिति, तल्लक्षणं लक्षितं विश्वनाथेन – "खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च ॥"[१] इति। अस्मिन् लक्षणे चकारेण काव्यस्य इति पदस्य महाकाव्यमित्यर्थोऽपि बुध्यते – "अत्र चकारोपादानात् काव्यस्य पूर्वनिरुक्तस्य महाकाव्यस्येत्यर्थः...."[२] इति। काव्यमिदमपि महाकाव्यस्य एकांशानुरूपमिति ; यतः काव्येऽस्मिन् महाकाव्यवत् सर्गाः, पञ्चसन्धयः, धीरोदात्तगुणान्वितनायकः, नानावृत्तमयत्वञ्च नोपलभ्यन्ते इति। पुनः काव्येऽस्मिन् महाकाव्यस्य "आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ॥ क्वचिन्निन्दाखलादीनां सताञ्च गुणकीर्त्तनम्।"[३] इत्ययं नियमोऽपि नानुस्रियते कविनामुना हेमचन्द्रेण ; यतः काव्यस्यास्य अन्ते केवलमेव "इति शुभमस्तु"[४] इत्यनेनाशीर्वचनेन विधीयते मङ्गलाचरणम् । काव्यस्यास्य नामकरणविषये तु कविना विश्वनाथकृतविधेरन्तर्गतं द्वितीयविकल्पमेव अनुस्रियते, यतः अत्र वृत्तस्य नाम्ना विधीयते नामकरणम् । पुनः "चत्वारस्तस्य बर्गाः स्युस्तेष्वेकञ्च फलं भवेत् ।"[५] इति नियमानुसारेणात्र चतुर्बर्गाणां वर्णनमुपलभ्यते ; यथा – प्रथमश्लोकतः त्रयदशश्लोकपर्यन्तमस्ति कामस्य वर्णना, सप्तदशश्लोकतः एकत्रिंशत्तमं श्लोकपर्यन्तमस्ति अर्थस्य वर्णना, पतिदानव्रताख्यानमेव काव्यस्यास्य उपजीव्यम् अतः काव्यमिदं धर्मप्रधानम्, अपि च काव्यस्यान्ते तुलसीपत्रेण कृष्णनामाङ्कितेन पुनः पतिलाभादनन्तरं समाप्यते पतिदानाभिधं व्रतमिदम् ; अतः अत्र धर्म एव मुख्यप्रयोजनरूपेणोपस्थाप्यते कविनामुना हेमचन्द्रेण इति मे आशयः । अस्मिन् काव्ये त्रिंशत्श्लोकतः द्वात्रिंशत्संख्यकश्लोकमध्ये जागतिकपदार्थसमूहः कदापि परमब्रह्मणोऽवतारस्वरूपस्य माधवस्य तुल्यं न भवति, स स्वयमेव केवलं भवति स्वस्य तुल्यं समं वा – इति मोक्षशास्त्रस्य सारभूततत्त्वमिदमुद्घाट्यते सहृदयानां सकाशे, अतः अत्र मोक्षस्य वर्णनापि विहिता । पुनः सत्यभामायाः अखण्डपतिप्रेमलाभेच्छावशादत्र श्रृङ्गार एवाङ्गिरसरूपेण विद्यते, कौतुकावहत्वादत्र हास्यरसोऽपि विद्यते अङ्गरसरूपेण एतेन "श्रृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते॥"[६]– इति नियमस्तु नियमस्तु अनुस्रियते । एतद्व्यतीत्य सन्ध्यादीनां वर्णनासु केवलं मुनिमन्त्रयोः वर्णना एवोपलभ्यते अत्र, नारद एव काव्यस्यास्य एकमुख्यचरित्ररूपेण अवतिष्ठते अतः चरित्रस्यास्य वर्णना समग्रे काव्ये एव अस्ति । पुनः अष्टमश्लोकतः चतुर्दशसंख्यकश्लोकमध्ये नारदसत्यभामयोः पत्युरखण्डप्रेमलाभविषयकमन्त्रणा उपनिबद्धा कविनामुना ; अत एवमेव महाकाव्यस्य एकांशानुरूपत्वात् खण्डकाव्यत्वमवाप्नोतीति काव्यमिदं पतिदानव्रतमिति।

---

[१] सा.द.(हरिदास.) पृष्ठे ४२६

[२] तत्रैव. तत्पृष्ठे

[३] तत्रैव. पृष्ठे ४२३

[४] सत्य.प.(द्वि.सं.) परिशिष्टम्, पृष्ठे ४

[५] सा.द.(हरिदास.) पृष्ठे ४२३

[६] तत्रैव. तत्पृष्ठे

## नामकरणविचारणम्

काव्यस्य नामकरणविषये साधारणतया न कोऽपि सामान्यविधिर्दृश्यते अलंकारशास्त्रेषु, विशिष्टविधिस्तु दृश्यते महाकाव्यस्य नामकरणविषये, अतः अत्र तदेव विधानमनुसृत्य एव पतिदानव्रतमिति काव्यस्य नामकरणविचारणं क्रियते विश्वनाथस्य मतानुसारेण कवेर्नाम्ना, वृत्तस्य नाम्ना, नायकस्य नाम्ना, वेतरस्य नाम्ना नामकरणं भवेदिति "कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा।"[1] इति। काव्येऽस्मिन् पतिदानव्रतमिति वर्णनीयविषयम् अवलम्ब्य नामकरणस्य द्वितीयविकल्पेनुसारेण अर्थात् वृत्तस्य नाम्ना पतिदानव्रतमिति नामकरणं विधीयते। 'पतिदानव्रतम्' इति पदस्य व्युत्पत्तिर्यथा – पत्युः दानम् पतिदानमिति (षष्ठीतत्पुरुषः), तस्य (पतिदानस्य) व्रतः (षष्ठीतत्पुरुषः) इति। व्रत इति शब्दस्तु उभयलिङ्गशब्दः अतः पतिदानव्रतः, पतिदानव्रतम् चेति द्वयमेव विशुद्धरूपेण गण्यते, परन्तु अत्र काव्यमिति क्लीवलिङ्गपदस्य विशेषणत्वाद् पतिदानव्रतमिति क्लीवलिङ्गगतरूपमेव सम्यग्रूपेण परिगृह्यते ।

## काव्यवृत्तान्तकथनम्

एकदा सत्यभामायाः अनुरोधवशाद् हरिणा पारिजातः जह्रे पराजित्य पुरन्दरम् । तदनन्तरं सौभाग्यगर्व्वगर्व्वितायास्तस्या गर्व्वनाशाय देवर्षिनारदस्तस्या निकेतं प्राप कौतुकी । सत्यभामयास्पूजितो स महार्हं पीठमुपविश्य पप्रच्छ तस्याः कुशलम् –

"कच्चित् कुशलिनी वत्से वर्त्तसे स्वजनैः सह ।
कच्चित्ते दक्षिणो भर्त्ता सर्व्वं मे ब्रुहि तत्त्वतः॥ पतिदानव्रतम्/४॥"[2] इति ।

एवमेव पृष्टा सा सौभाग्यगर्व्विता प्रत्युवाच यत्, सा सर्व्वथा कुशलिनी एव, यतः माधवः सदैव तस्यानुकूलः। रुक्मिणी तु केवलं नामतो हरेः श्रेष्ठामहिषीरूपेणावतिष्ठते, यतः सा एव हरेः प्रेष्ठा इत्यतः पत्युः दाक्षिण्यविषये नास्ति कोऽपि सन्देहावसरः। एतच्छ्रुत्वा स नारदः स्माह तामभिमानिनीं यत्, सा मुग्धा न जानाति जगतो विजिह्मां गतिम् ; असीद् माधवो बाल्यादेव कपटी, अतः उपचारपदैर्नूनं सा मोहिता मुरारिणा । मधुसूदनस्य कापट्यं प्रतिपादनाय स मुनिरुवाच –

"पुष्पे पुष्पे चरन् भृङ्गो यथा नैकत्र तिष्ठति ।
कलत्रेषु तथा प्रेम पुरुषस्याव्यवस्थितम् ॥ पतिदानव्रतम्/९॥
द्यूतकारस्य यद्भाग्यं यौवनं यन्मृगीदृशः ।
पुरुषस्य च यत् प्रेम तत् सर्व्वं विद्धि चञ्चलम् ॥ पतिदानव्रतम्/१०॥"[3]

---

[1] सा.द.(हरिदास.) पृष्ठे ४२३

[2] सत्य.प.(द्वि.सं.) परिशिष्टम, पृष्ठे १

[3] तत्रैव. तत्पृष्ठे

अतः बहुपरिग्रहे पत्यौ सौभाग्यगर्व्वस्तु न कर्त्तव्यः, अपि तु केनोपायेन पत्युरखण्डप्रणयलाभो भवेत् इत्येव चिन्तनीयम्। अथ "केनोपायेन मे लभ्यं प्रेम भर्त्तुरखण्डितम् ॥पतिदानव्रतम्/१२॥"[१] इत्यस्य प्रश्नस्योत्तरे स देवर्षिः सत्यभामां जगाद

"...अस्ति पतिदानाभिधं व्रतम् ।
तच्चेच्चरसि कल्याणि स्थिरप्रेमा पतिस्त्वयि ॥पतिदानव्रतम्/१३॥"[२]

अस्मात् परं एकेनैव श्लोकेणोच्यते तेन व्रतविधिः, तद् यथा –

"सद्विप्राय पुरस्कृत्य प्रथमं दीयतां पतिः ।
तुलामारोप्य तं द्रव्यैः कल्प्यतामथ निष्क्रयः ॥ पतिदानव्रतम्/१४॥"[३] इति

ततः परं सा व्रतनियमानुसारेण नारदाय एव ददौ श्रीकृष्णम् । अथ यावत्तुलयितुं निष्क्रयेणोपचक्रमे तावत् स सर्व्वेभ्यो धनरत्नेभ्योऽभ्यधिकोऽभवत् । तद्दृष्ट्वा मुनिः स्माह यत्, यतः स एवाधुना माधवस्य प्रभूरतो माधवेनापि तस्यानुगमनं कर्त्तव्यमिति ; तदाकर्ण्य सत्रासा सा सत्राजित्तनया सपद्याकारयामास सपत्नीः रुक्मिणीं विना । विदितार्थाश्च ता मुग्धाः स्वगात्रेभ्यः स्वयमुन्मोचितैः भूषणैः कान्तं तुलयितुं मोघमुद्यममादधुः । सर्व्वमेतद्दृष्ट्वा - "एहि माधव गच्छावः कालक्षेपेण किं मुधा ॥ पतिदानव्रतम्/२४॥"[४] – इति मुनिवचनं च पुनः पुनः शृण्वन्ती सत्यभामाथ त्यक्ताभिमाना रुक्मिणीं प्रत्यपद्यत माधवोद्धाराय । सत्यभामासकाशात् सर्ब्वं विदित्वा सा माधवस्य तुल्यवस्तुरूपेण कृष्णनामाङ्कितततुलसीपत्रदानाय आदिदेश ; अथ तेन पत्रेणैव तुलिते हृषिकेशे सर्व्वैः सह स महर्षिरपि जहर्ष । नारदोऽपि तत्तुलसीदलमासज्य कर्णे –

"दृष्ट्वापि तुलसीपत्रमाहात्म्यं नावबुध्यसे ।
मां पुनर्मन्यसे मूढमहो मूढधियः स्त्रियः ॥ पतिदानव्रतम्/३५॥"[५]

- इत्युकत्वा हसन्नन्तर्दधे, माधवोऽपि प्रीताभिर्रामाभिः सह मुमुदे, इति शम् ।

---

[१] सत्य.प.(द्वि.सं.) परिशिष्टम्, पृष्ठे २

[२] तत्रैव. तत्पृष्ठे

[३] तत्रैव. तत्पृष्ठे

[४] तत्रैव. पृष्ठे ३

[५] तत्रैव. पृष्ठे ४

## अलंकारविमर्षः

पतिदानदानव्रतमिति काव्येस्मिन् स्वल्पसंख्यका अर्थालंकारा विद्यन्ते । अधस्तात् ते एव विचार्यन्ते सम्यग्रूपेण, यथा -

- *उपमालंकारः*

नवत्रिंशत्श्लोकात्मकस्यास्य काव्यस्य नवमे श्लोके अस्ति उपमालंकारः, तत्श्लोको यथा –

"पुष्पे पुष्पे चरन् भृङ्गो यथा नैकत्र तिष्ठति ।
कलत्रेषु तथा प्रेम पुरुषस्याव्यवस्थितम् ॥ पतिदानव्रतम्/९॥"[१]

इत्यत्र श्लोकस्य पूर्वार्धस्थितं वाक्यमुपमानवाक्यम्, उत्तरार्धन्तु उपमेयवाक्यमिति, श्लोकस्यास्य औपम्यवाचकशब्दद्वयं 'यथा..तथा' चेति । पुनः 'नैकत्र तिष्ठति', अव्यवस्थितम् चेति पदद्वयेन भृङ्गपुरुषयोः (उपमानोपमेययोः) चाञ्चल्यमिति साधारणधर्म एव बुध्यते । अतः अत्र उपमालंकारः, अपि च 'यथा', 'तथा' चेति औपम्यवाचकपदद्वयस्य अवस्थितिवशादत्र श्रौत्युपमालंकारः, पुनरुपमानोपमेयौपम्यवाचकशब्दान्वित-साधारणधर्माणामुपस्थितित्वादत्र पूर्णोपमालंकारः –

"सा पूर्णा यदि सामान्यधर्म औपम्यवाची च ।
उपमेयञ्चोपमानं भवेद् वाच्यम्- ॥१०/१८॥"[२]

पुनः एतदपि वक्तुं शक्यते यत्, श्लोकोऽयं उपमानवाक्येन, उपमेयवाक्येन, तयोः समर्थ्यसमर्थकभावेन तथा 'नैकत्र तिष्ठति', 'अव्यवस्थितम्' चेति भिन्नवाक्यांशद्वयेनोक्तेन चाञ्चल्यमिति साधारणधर्मेण दृष्टान्तालंकाराभिमुखं गच्छन् 'यथा', 'तथा' चेति औपम्यवाचकपदद्वयस्य प्रयोगाद् उपमालंकारत्वमवाप्नोतीति ।

- *मालोपमालंकारः*

"द्यूतकारस्य यद्भाग्यं यौवनं यन्मृगीदृशः ।
पुरुषस्य च यत् प्रेम तत् सर्व्वं विद्धि चञ्चलम् ॥ पतिदानव्रतम्/१०॥"[३]

---

[१] सत्य.प.(द्वि.सं.) परिशिष्टम्, पृष्ठे १

[२] सा.द.(हरिदास.) पृष्ठे ५१८

[३] सत्य.प.(द्वि.सं.) परिशिष्टम्, पृष्ठे १

इति दशमे श्लोके महर्षिनारदः पूर्वश्लोकवत् पुरुषस्य प्रेम्णः चाञ्चल्यत्वमेव प्रतिपादयति सत्यभामासकाशे । अतः "पुरुषस्य च यत् प्रेम तत् सर्व्वं विद्धि चञ्चलम् ॥ पतिदानव्रतम्/१०॥" – इति श्लोकस्यास्य उत्तरार्धगतं वाक्यमेव उपमेयवाक्यरूपेण प्रतीयते ; एतेन पूर्वार्धगतं "द्यूतकारस्य यद्भाग्यं यौवनं यन्मृगीदृशः।.. ॥पतिदानव्रतम्/१०॥" इति वाक्यमुपमानवाक्यरूपेण प्रतीयते । अतः चञ्चलता एव उपमानोपमेययोः साधारणधर्मः ; अपि तु 'पुरुषस्य प्रेम' इत्येकस्य उपमेयस्य कृते अत्रापि 'द्यूतकारस्य भाग्यम्', 'मृगीदृशः यौवनम्' चेति उपमानद्वयम्, अत एकैकस्योपमेयस्य बहूपमानत्वादत्र मालोपमालंकारः, तल्लक्षणं यथा - "मालोपमा यदेकस्योपमानं बहु दृश्यते।॥१०/३६॥"[1]। पुनः एषा मालोपमा श्रौती एव 'यत्', 'तत्' चेति सादृश्यवाचकपदद्वयस्य सन्निवेशत्वादिति ।

- *व्यतिरेकालंकारः*

काव्यस्यास्य एकत्रिंशत्संख्यकस्य श्लोकस्य उत्तरार्धे व्यतिरेकालंकारध्वनिरेव अनुभूयते, यतः "धनैस्तुलयितुं तुच्छैर्गुरुमेनं तदिच्छसि ॥पतिदानव्रतम्/३१॥"[2] इत्यत्र सत्यभामा धनेन माधवं तुलयितुमिच्छतीत्यर्थः, येन सह तुलना भवति तदुपमानरूपेण, यस्य च तुलना भवति तत्तूपमेयरूपेण गण्यते । यद्यपि उत्तरार्धगतस्य वाक्यस्यास्य वाच्यार्थे विधिरेव दृश्यते, तथापि वाक्यस्यास्य प्रतीयमानार्थे निषेध एवाभिव्यज्यते, यतः स प्रतीयमानार्थ ईदृशः - 'एनं गुरुं तुच्छैः धनैः तुलयितुं मा इच्छ' इति। अनेन प्रतीयमानार्थेन उपमानभूतेभ्यो धनेभ्य उपमेयभूतस्य माधवस्य गुरुत्वमुत्कर्षत्वं वाभिव्यज्यते। अतः "आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा । व्यतिरेकः........॥१०/७१॥"[3] इति विश्वनाथकृतेन व्यतिरेकालंकारलक्षणानुसारेणात्रोपमेयस्य उत्कर्षत्वे व्यतिरेकध्वनिः विद्यते, पुनः अत्र वस्तुध्वनिरप्यस्तीति मे आशयः।

प्रसङ्गत उल्लेख्यं यत्, काव्येऽस्मिन् अलंकाशास्त्रसम्मतेषु शब्दालंकारेषु विशेषतो वृत्त्यनुप्रासः, श्रुत्यनुप्रासः, छेकानुप्रासः, पदान्तगत-अन्त्यानुप्रासश्चेत्यादीनां शब्दालंकाराणामाधिक्यं दरीदृश्यते इति ।

---

[1] सा.द.(हरिदास.) पृष्ठे ६१५

[2] सत्य.प.(द्वि.सं.) परिशिष्टम्, पृष्ठे ४

[3] सा.द.(हरिदास.) पृष्ठे ६८७

## छन्दोविमर्शः

काव्यस्यास्य सर्वेषु श्लोकेषु अनुष्टुबिति अष्टाक्षरसमन्वितं वृत्तमुपलभ्यते, यतो वृत्तस्यास्य लक्षणानुसारेण सर्वेषु श्लोकेषु सर्वपादेषु पञ्चमाक्षराणि लघुरूपेण, षष्ठाक्षराणि गुरुरूपेण, द्वितीयेषु च चतुर्थेषु च पादेषु सप्तमाक्षराणि लघुरूपेणैवावतिष्ठन्ते ; अनुष्टुबिति वृत्तस्य लक्षणं लक्षितं आचार्यगङ्गादासेन –

"पञ्चमं लघुसर्वत्र सप्तमं द्विचतुर्थयोः ।
गुरुषष्ठञ्च पादानां शेषेष्वनियमो मतः ॥"[१] इति ।

## गुणदोषयोर्विमर्शः

नवत्रिंशत्श्लोकात्मके अस्मिन् काव्ये सर्वत्र वस्तुस्वभावस्फुटत्वात् शब्दार्थयोः अर्थव्यक्तिः दृश्यते, शब्दगतार्थव्यक्तेः लक्षणं यथा "अर्थव्यक्तिहेतुत्वमर्थव्यक्तिः॥३।१।२४॥"[२], पुनः अर्थगतार्थव्यक्तेः लक्षणं यथा "वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः॥३।२।१३॥"[३] । पुनः अर्थवैमल्याद् अर्थप्रसादोऽपि अस्ति तल्लक्षणं यथा "अर्थवैमल्यं प्रसादः॥३।२।३॥"[४] पदरचनाया नवीनत्वमपि अत्रोपलभ्यते यतः काव्यमिदं प्राचीनरचनायाः छायारूपेण न प्रतिभाति, अतोऽत्रास्ति शब्दकान्तिः, तल्लक्षणं यथा "औज्वल्यं कान्तिः॥३।१।२५॥"[५] । काव्यस्यास्य अङ्गी रसः श्रृङ्गारः अङ्गस्तु हास्यरसः, रसद्वयस्यास्य दीप्तत्वादत्र विद्यते अर्थकान्तिः "दीप्तरसत्वं कान्तिः॥३।२।१४॥"[६] ; पतिदानव्रतमिति काव्यमिदं पाँचालीप्रणेतुः दाशरथिरायप्रणीतं "सत्यभामार व्रत पाँचाली"[७] इति काव्यमवलम्ब्यैव रचितमस्ति, एतेन काव्यमिदम् अन्यच्छायायोनिरूपेण प्रतिभाति, अतोऽस्त्यत्रार्थसमाधिः, तल्लक्षणम् "अर्थदृष्टिः समाधिः॥३।२।६॥"[८] इति ; पुनरर्थप्रक्रमाभेदत्वात्तथा सुगमत्वादस्मिन् काव्ये अर्थसमतेति गुणोऽपि सहृदयानां नयनपथमुपैति, भणितञ्च वामनेनापि गुणस्यास्य लक्षणप्रसङ्गे "अवैषम्यं समता ॥३।२।५॥"[९] इति ; अस्मिन् काव्ये पदप्रतिपाद्यार्थबोधनाय विधियतेऽत्र वाक्यरचना, एतेन प्रथमप्रकारगतोऽर्थोज एव बुध्यते, तदुक्तं कविप्रियायाम् "पदार्थे वाक्यवचनम्"[१०] इति,

---

[१] छन्दो.म.(शिरोमणि.) पृष्ठे ११६

[२] का.सू.वृ.(विद्याभूषण. विद्यारत्न.) पृष्ठे ८०

[३] तत्रैव. पृष्ठे ९४

[४] तत्रैव. पृष्ठे ८६

[५] तत्रैव. पृष्ठे ८०

[६] तत्रैव. पृष्ठे ९४

[७] सत्य.प.(द्वि.सं.) पृष्ठे ३

[८] का.सू.वृ.(विद्याभूषण. विद्यारत्न.) पृष्ठे ८९

[९] तत्रैव. पृष्ठे ८७

[१०] तत्रैव. पृष्ठे ८३

अर्थौजस्य लक्षणं यथा "अर्थस्य प्रौढिरोजः॥३।२।२॥"[१] इति । पृथक्पदत्वमिति वैशिष्ट्यं तु समग्रे काव्यशरीरे एवोपलभ्यते अतः काव्यमिदं शब्दमाधुर्यान्वितमिति, तदुक्तं वामनेन "पृथक्पदत्वं माधुर्यम् ॥३।१।२१॥"[२] इति। पुनः काठिन्यवर्जितत्वात् शब्दसौकुमार्यम् [अजरठत्वं सौकुमार्यम् ॥३।१।२२॥][३], अग्राम्यत्वाच्च अर्थौदारता [अग्राम्यत्वमुदारता ॥३।२।१२॥][४] चेति गुणद्वयमपि विद्यतेऽस्मिन् काव्यकृतौ, अत्र प्रायः सर्वेषु श्लोकेषु पारुष्याभावादर्थसौकुमार्यञ्चोपलभ्यते, निगदितञ्च वामनाचार्य्येण "अपारुष्यं सौकुमार्यम् ॥३।२।११॥"[५] इति, परन्तु गुणस्यास्य विपर्यासोऽपि अस्माकं नयनपथमुपैति अष्टमे श्लोके, यतोऽस्मिन् श्लोके देवर्षिनारदः मुरारिं 'कपटी'ति परुषपदेन विशेषयति यथा –

"कपटी ते पतिर्बाले न च बुद्धिः पटीयसी।
उपचारपदैर्नूनं मोहितासि मुरारिणा ॥पतिदानव्रतम्/८॥"[६] इति।

अतः परुषपदसन्निवेशात् श्लोकोऽयम् अश्लीलत्वदोषेण दुष्टो जातः। दोषस्यास्य विषये उच्यते च कामधेनौ - "अस्य गुणस्य विपर्य्ययोऽश्लीलत्वम्।"[७] इति । एतद्व्यतीत्य समग्रेऽस्मिन् काव्ये प्रायः सर्वेषु श्लोकेषु उपलभ्यते शब्दसमता मार्गाभेदत्वात् [मार्गाभेदः समता ॥३।१।१२॥][८]; परन्तु काव्यस्यास्य तृतीये श्लोके मार्गभेदत्वाद् नास्ति शब्दसमता, यतः श्लोकोऽयं कर्मवाच्येन समारभ्य समाप्यते कर्तृवाच्येन –

"तया सम्पूजितो देव्या महार्हम्पीठमास्थितः।
पप्रच्छ कुशलं तस्याः प्रणतायास्तपोनिधिः ॥पतिदानव्रतम्/३॥"[९] इति।

---

[१] का.सू.वृ.(विद्याभूषण. विद्यारत्न.) पृष्ठे ८३

[२] तत्रैव. पृष्ठे ७९

[३] तत्रैव. पृष्ठे ७९

[४] तत्रैव. पृष्ठे ९३

[५] तत्रैव. पृष्ठे ९२

[६] सत्य.प.(द्वि.सं.) परिशिष्टम्, पृष्ठे १

[७] का.सू.वृ.(विद्याभूषण. विद्यारत्न.) पृष्ठे ९३

[८] तत्रैव. पृष्ठे ७४

[९] सत्य.प.(द्वि.सं.) परिशिष्टम्, पृष्ठे १

## सार्थकानुवादो वा न वा

पूर्वे उल्लिखितं यद्, दाशरथिरायस्य 'सत्यभामार् व्रत पाँचाली' एव काव्यस्यास्य मूलम्, तत्र मूलभूते सत्यभामायाः व्रते १२२ संख्यकाः श्लोकारूपाः स्तवकाः सन्ति परन्तु हेमचन्द्रप्रणीतेऽस्मिन् पतिदानव्रतमिति काव्ये सन्ति केवलं ३९ संख्यकाः श्लोकाः, अत एव काव्यमिदं मूलस्य संक्षिप्तभावानुवाद एव, अतोऽत्र मूलविषयवस्तुनः आनुषाङ्गिकमंशं परित्यज्य केवलं केन्द्रियांशमवलम्ब्य भावानुवादः क्रियते कविनामुना । 'सत्यभामार् व्रत पाँचाली' इति नाम्ना या मूलभूता रचना विद्यते तत्र कतिपयाः अंशाः सन्ति, यथा निर्दिश्यन्ते 'दाशरथिरायेर् पाँचाली' इति संकलनात्मके ग्रन्थे सम्पादकेन हरिपदचक्रवर्त्तिमहाभागैः –

सत्यभामायाः अभिमानस्य श्रीकृष्णद्वारा मानभञ्जनम्, सत्यभामां प्रति नारदेन पुण्यकव्रतस्य परामर्शदानम्, सत्यभामायाः पुण्यकव्रतस्य दक्षिणा, नारदेन श्रीकृष्णलाभः, कुवेरस्य धनागाराद् धनानयनस्य कृते यदुभिः दूतप्रेषणम्, कुवेरमुद्दिश्य यदुवंशीयानां युद्धयात्रा कुवेरस्य च महादेवसकाशे आश्रयलाभः, कुवेरस्य भाण्डागाराद् रत्नहरणम्, तुलमध्ये कृष्णनामाङ्किततुलसीपत्रप्रदानं रुक्मिणीद्वारेण, तुलसीमाहात्म्यकथनं नारदेन इति । एषु 'कुवेरस्य धनागाराद् धनानयनस्य कृते यदुभिः दूतप्रेषणम्', 'कुवेरमुद्दिश्य यदुवंशीयानां युद्धयात्रा कुवेरस्य च महादेवसकाशे आश्रयलाभः' चेति अंशद्वयं तथा 'कुवेरस्य भाण्डागाराद् रत्नहरणम्' इत्यंशस्य स्तवकाः चतुर्दशसंख्यकाः वर्जिताः कविभूषणेनामुना तदीये पतिदानव्रते काव्ये । अवशिष्टान् अंशानाधृत्य रमणीयो भावानुवाद उपलभ्यते पतिदानव्रते । अथ हेमचन्द्रस्य अनुवादनैपुण्यप्रदर्शनाय कतिपयानि उदाहरणानि सन्निवेशितानि वङ्गभाषानिबद्धेन मूलेन सह -

'सत्यभामार् व्रत पाँचाली' इति रचनायां श्रीकृष्णेन सत्यभामायाः मानभञ्जनम् इत्यंशे (१-१७ संख्यकस्तवकाः) दृश्यते यद्, 'नारदानीतेन पारिजातपुष्पेण श्रीकृष्णः रुक्मिण्याः केशपाशं सज्जितवान् । अयमेव विषयः सत्यभामासकाशे उपस्थाप्य स नारदः तां मानवतीं उत्साहितवान्, अथ तस्याः मानभञ्जनाय श्रीकृष्णः पुरन्दरं पराजित्य पारिजातवृक्षमेव आनीतवान्' – अयमेव वृत्तान्तस्य भावः कविभूषणेनामुना उपस्थाप्यते पतिदानव्रतस्य प्रथमे श्लोके –

"अभ्यर्थितेन हरिणा सत्राजित्सुतया पुरा ।
पारिजातः पुरीं जह्रे पराजित्य पुरन्दरम् ॥ पतिदानव्रतम्/१॥"[1] इति

सत्यभामां प्रति नारदेन पुण्यकव्रतस्य परामर्शदानम् इत्यंशस्य (१८-३१ संख्यकस्तवकाः) भावानुवादो दृश्यते पतिदानव्रतस्य द्वितीयश्लोकतः पञ्चदशश्लोकं यावत्, तदुदाहरणं यथा –

[1] सत्य.प.(द्वि.सं.) परिशिष्टम्, पृष्ठे १

| सत्यभामार् व्रत पाँचाली (दाशरथिरायस्य)[१] | पतिदानव्रतम् (हेमचन्द्ररायकविभूषणस्य)[२] |
|---|---|
| नेइ लेश् ममतार्, तोर् प्रति ताँर्,<br>भालोवासा भोजवाजी ॥२४<br>शुनि धनी कन्, दुखेते-चिकन्-<br>स्वरेते मन् विरसे ।<br>कह देखि मुनि ! पति चिन्तामणि,<br>किरूपे राखिव वशे ॥२६<br>मुनि कल शेष्, शुनह विशेष्,<br>कर्ते पार यदि द्रुत ।<br>आछे एक्टा रूप्, अति अपरूप्,<br>पुण्यक् नामेते व्रत ॥२७<br>से व्रतेर् विधि, लिखेछेन् विधि,<br>दक्षिणाय् पति-दान् ।<br>आछे व्यवस्थाय्, पुन लवे ताय्,<br>स्वर्णेते करि समान् ॥२८ | नूनं मुग्धे न जानासि विजिह्मां जगतो गतिम् ॥७॥<br>पुष्पे पुष्पे चरन् भृङ्गो यथा नैकत्र तिष्ठति ।<br>कलत्रेषु तथा प्रेम पुरुषस्याव्यवस्थितम् ॥९॥,<br>सत्यभामा जगादर्षिं भवान् मे वक्तुमर्हति ।<br>केनोपायेन मे लभ्यं प्रेम भर्त्तुरखण्डितम् ॥१२॥,<br>मुनिः प्रोवाच तामस्ति पतिदानाभिधं व्रतम्।<br>तच्चेचरसि कल्याणि स्थिरप्रेमा पतिस्त्वयि ॥१३॥,<br>सद्विप्राय पुरस्कृत्य प्रथमं दीयतां पतिः।<br>तुलामारोप्य तं द्रव्यैः कल्प्यतामथ निष्क्रयः ॥१४॥ |

सारणी ३.१३ : पतिदानव्रते भावानुवादस्य निदर्शनम्

सत्यभामायाः पुण्यकव्रतस्य दक्षिणा इत्यंशस्य (३२-४४ संख्यकस्तवकाः) यो भावः स उपलभ्यते पतिदानव्रते षोडशे सप्तदशे च श्लोके –

> "ततः सा पतिमाहूय पुरस्कृत्य च सस्मितम् ।
> सौभाग्यातिशये लुब्धा नारदायैव तं ददौ ॥ पतिदानव्रतम्/१६॥
> अथ यावत्तुलयितुं निष्क्रयेणोपचक्रमे ।
> सर्व्वेभ्यो धनरत्नेभ्यस्तावत् सोऽभ्यधिकोऽभवत् ॥ पतिदानव्रतम्/१७॥"[३] इति।

नारदेन श्रीकृष्णलाभः इत्यंशे नारदाद् माधवनिष्क्रयणे सत्यभामायाः अपारगत्वात् नारदः कृष्णं कथयति यद्, सोऽधुना तस्यैव, अतः द्वारकायां मुधा कालक्षेपेण न प्रयोजनम्, एतत् श्रुत्वा सत्यभामायाः क्रन्दनम्, अन्याभिः सपत्नीभिः

---

[१] दाश.पाँ.(चक्रवर्ती.) पृष्ठे २६०

[२] सत्य.प.(द्वि.सं.) परिशिष्टम्, पृष्ठे १, २ च

[३] तत्रैव. पृष्ठे २

तदाकर्ण्य सत्यभामानिन्दा माधववियोगविलापश्च इत्यादयः सन्ति ४५-५७ संख्यके स्तवकमध्ये । वृत्तांशस्यास्य संक्षिप्तो भावानुवादो उपस्थाप्यते श्लोकत्रितये (१८-२०) यथा –

| सत्यभामार् व्रत पाँचाली (दाशरथिरायप्रणीता)[१] | पतिदानव्रतम् (हेमचन्द्ररायप्रणीतम्)[२] |
|---|---|
| गा तोल् हे कृष्ण ! आर् केन तिष्ठ, | |
| कृष्ण प्राप्ति मोर् हलो ।..॥ | |
| ओहे जलद्-काया ! द्वारकार् माया, | |
| त्यज आर् मिछे काँद ।..॥ | तं प्रकाशं मुनिः स्माह यथाहे प्रभुरस्मि ते । |
| तखन् भूमे पड़ि रामा, काँदे सत्यभामा, | तथा विहाय स्वगृहान् मामन्वेहि विहायसे ॥१८॥ |
| बले, कि हलो रे हाय् ! | सा तदाकर्ण्य सत्रासा सत्राजित्तनया सती । |
| करि दक्षिणान्त, हइल सर्व्वस्वान्त, | सपद्याकारयामास सपत्नी रुक्मिणीं विना ॥१९॥ |
| कृष्ण लये मुनि याय़् ॥५२ | विदितार्थाश्च ता ऊचुः सामान्यः पतिरेष नः। |
| पड़िये भूतले, नयन् उथले, | सत्यभामा किमेकैनमन्यस्मै दातुमर्हति ॥२०॥ |
| केँदे बले यत रामा । | |
| छार् व्रत दाय़्, कार् धन् काय़्, | |
| दिलि तुइ सत्यभामा ॥५६ | |
| द्वारका-जीवन्, ए तिन् भुवन्,- | |
| जीवन् जगत्मय् । | |
| जगत् संसार्, जीवेर् अधिकार्, | |
| कृष्ण तोर् शुधु नय् ॥५७ | |

सारणी ३.१४ : पतिदानव्रते भावानुवादस्य निदर्शनम्

अथ सत्यभामया रुक्मिणीवन्दनम्, रुक्मिणिना कृष्णनामाङ्कितलुसीपत्रप्रदानं, बधुभिः नारदस्य परिहासः, तुलसीमाहात्म्यकथनं नारदेन चेति अंशत्रयस्य यत्किञ्चिद्रूपाक्षरिकानुवादोऽपि अस्माकं नयनपथमुपैति पतिदानव्रतमिति काव्ये । दिङ्मात्रमुदाहरणं यथा –

[१] दाश.पाँ.(चक्रवर्ती.) पृष्ठे २६२

[२] सत्य.प.(द्वि.सं.) परिशिष्टम्, पृष्ठे २, ३ च

| सत्यभामार् व्रत पाँचाली (दाशरथिरायप्रणीता)[१] | पतिदानव्रतम् (हेमचन्द्ररायप्रणीतम्)[२] |
|---|---|
| কৃষ্ণের রমণীমাত্র, লয়ে সেই তুলসীপত্র,<br>মুনিরে কহিছে ব্যঙ্গ-ছলে।<br>তোমার কৃষ্ণতুল্য ধন, এই লও হে তপোধন!<br>কাণে গুঁজে স্বস্থানে যাও চলে।।<br>কিছু বুদ্ধি নাইক ঘটে, দিদি! ওটা পাগলই বটে,<br>[कृष्णेर् रमणीमात्र, लये सेइ तुलसीपत्र,<br>मुनिरे कहिछे व्यङ्ग-छले ।<br>तोमार् कृष्णतुल्य धन, एइ लओ हे तपोधन् !<br>काणे गुँजे स्वस्थाने याओ चले ॥ १११<br>किछु बुद्धि नाइक घटे, दिदि ! ओटा पागलइ वटे,..। ॥ ११७] | तमात्त निष्क्रयं तुष्टं मुखरा काचीदब्रवीत् ।<br>इदं तद् – भागधेयस्य सदृशं यद् द्विजन्मनाम् ॥ ३४॥<br>रत्नराशीननादृत्य बुद्धिमान्द्यात्तपोनिधे ।<br>तुलसीदलमासज्य कर्णे यास्यसि साम्प्रतम् ॥ ३५॥ |

सारणी ३.१५ : पतिदानव्रते आक्षरिकानुवादस्य निदर्शनम्

## पाँचालीकविः हेमचन्द्ररायः

पाँचालीकाव्यं तु न दृश्यते संस्कृतसाहित्ये, हेमचन्द्रस्य काव्यमिदं 'सत्यभामार् व्रत पाँचाली' इति रचनायाः स्वकीयतामण्डितो भावानुवाद एव अत इदमपि 'पाँचाली' इत्यभिधया अभिहितुं शक्यते । अपि तु कस्मिंश्चित् पाँचालीकाव्ये यथा अन्तिमे पाँचालीगतस्य व्रतपाठस्य उपयोगिता उच्यते, तदुदाहरणं दृश्यते वङ्गभाषानिबद्धायां श्री-श्री-लक्ष्मीदेव्याः व्रतकथायाम्

| | |
|---|---|
| "মনে রেখ মর্ত্যধামে লক্ষ্মীব্রত সার ॥ | [ मने रेख मर्त्त्यधामे लक्ष्मीव्रत सार्॥ |
| এই ব্রত যে রমণী করে একমনে । | एइ व्रत ये रमणी करे एकमने । |
| লক্ষ্মীর কৃপায় সেই বারে ধনেজনে ॥ | लक्ष्मीर् कृपाय् से वारे धनेजने॥ |
| অপুত্রার পুত্র হয় নির্দ্ধনের ধন । | अपुत्रार् पुत्र हय् निर्द्धनेर् धन् । |
| ইহলোকে সুখ অন্তে স্বর্গেতে গমন ॥ | इहलोके सुख् अन्ते स्वर्गेते गमन्॥ |
| যেবা পড়ে যেবা শুনে যেবা রাখে ঘরে । | येवा पडे येवा शुने येवा राखे घरे । |
| লক্ষ্মীর বরেতে তার মনোবাঞ্ছা পুরে ॥"[३] | लक्ष्मीर् वरेते तार् मनोवाञ्छा पुरे॥ ] |

[१] दाश.पाँ.(चक्रवर्ती.) पृष्ठे २६६, २६७ च

[२] सत्य.प.(द्वि.सं.) परिशिष्टम्, पृष्ठ ४

[३] श्री-श्री-लक्ष्मीदेवीर् व्रतकथा ओ पाँचाली, पृष्ठे १५

दृश्यते च श्री-श्री-इतुपूजायाः व्रतकथायाम् –

| | |
|---|---|
| “সর্বকর্ম ত্যজি কর ইতুপূজা সার ॥ | [ सर्वकर्म त्यजि कर इतुपूजा सार्॥ |
| এই কথা শুনে যেবা একান্ত মনেতে । | एइ कथा शुने येवा एकान्त मनेते। |
| লক্ষ্মীর কৃপায় সেই থাকে দুধে-ভাতে ॥ | लक्ष्मीर् कृपाय् सेइ थाके दुधे-भाते॥ |
| অপুত্রের পুত্র হয় নির্ধনের ধন । | अपुत्रेर् पुत्र हय् निर्धनेर् धन् । |
| ইতু ব্রতকথা এবে হল সমাপন ॥”[१] | इतु व्रतकथा एवे हल समापन्॥ ] |

तथैव हेमचन्द्रस्य पतिदानव्रतेऽपि अन्तिमे श्लोकद्वये पतिदानव्रतपाठस्य तथा श्रवणस्य पूण्यजनकं फलमुदीरितं कविनामुना हेमचन्द्रेण –

“पतिदानव्रताख्यानमिदमाकर्ण्य कौतुकात् ।
नरः पुण्यमवाप्नोति स्त्रीणाञ्च भवति प्रियः ॥ पतिदानव्रतम्/३८ ॥
भक्त्या या श्रृणुयान्नारी सापि सौभाग्यमाप्नुयात् ।
आश्रवश्च पतिस्तस्या गृहकर्म्मकरो भवेत् ॥ पतिदानव्रतम्/३९ ॥”[२] इति।

यद्यपि अस्याः परम्परायाः अनुसरणं न दृश्यते दाशरथिरायविरचिते ‘सत्यभामार् व्रत पाँचाली’ति रचनायाम् । अत एतत्तु वक्तुं शक्यते यद् हेमचन्द्ररायकविभूषण एव सम्भवतः संस्कृतकविसंसदि प्रथम-पाँचालीकारः संस्कृतपाँचालीकाव्यस्य प्रवक्ता वेति । एवमेव अध्यायस्यास्य संक्षिप्तोऽयं द्वितीयो भागः समाप्यते अत्रैवेति शम् ।

****************

[१] श्री-श्री-इतु पूजार् व्रतकथा ओ पाँचाली, पृष्ठे १६

[२] सत्य.प.(द्वि.सं.) परिशिष्टम्, पृष्ठे ४

# ✠ चतुर्थोऽध्यायः ✠

## ॥ उपसंहृतिः ॥

प्रथमो भागः : हेमचन्द्रस्य काव्यकृतिषु मङ्गलाचरणविमर्षणम्

द्वितीयो भागः : हेमचन्द्रस्य काव्यकृतिषु सुप्राचीनानां कवीनां प्रभावः

तृतीयो भागः : समकालिकैः पण्डितवर्यैः विहिता हेमचन्द्रस्य काव्यकृतेः समालोचना

चतुर्थो भागः : ऐतिह्य-आधुनिकतयोः समन्वयः

## ४.१. प्रथमो भाग : हेमचन्द्रस्य काव्यकृतिषु मङ्गलाचरणविमर्षणम्

ऊनविंशशताब्द्यां वर्तमानस्य हेमचन्द्ररायकविभूषणस्य काव्येषु उल्लेखयोग्यानि महाकाव्यानि खण्डकाव्यानि यथा 'परशुपरामचरितम्', 'हैहयविजयम्', 'पाण्डवविजयम्' ; 'सत्यभामापरिग्रहम्' चेत्यादीनि । कविहेमचन्द्र आसीच्छंस्कृतकाव्यारम्भात् प्रागनुष्ठेयं सनातनमङ्गलाचरणं प्रत्यपि श्रद्धाशीलः। अतस्तेनापि कृतं मङ्गलाचरणम् । श्रेयःकर्मणि विविधा विघ्ना उत्पद्यन्ते, तेषां विघ्नानां नाश एव मङ्गलाचरणस्य फलरूपेण गण्यते । अर्थात् प्रारब्धकर्मणः परिसमापनात् प्राक् दुरदृष्टवशादेव ये विघ्नाः उत्पद्येरन्, तानेव विघ्नान् विनश्य कर्मसमाप्तेः पन्थानं यत् प्रशस्तयति तद् मङ्ग्लाचरणम् । केचन तु ग्रन्थसमाप्तिरपि मङ्गलाचरणस्य फलरूपेण गण्यते । परन्तु नव्यन्यायस्य मतानुसारेण ग्रन्थसमाप्तिं प्रति वुद्धिप्रयत्नप्रतिभादयः, विघ्नविध्वंसनं प्रति च मङ्गलाचरणमेव कारणत्वेन गृह्यते । तदुक्तं भाषापरिच्छेदे "विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः प्राञ्चः । नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलम्, समाप्तिस्तु वुद्धिप्रतिभादिकारणकलापात् ।"[१] इति ।

केषांचिद् जनानां सकाशे मङ्गलाचरणगतं दूरदृष्टजन्यविघ्नविनाशकत्वं तु शास्त्रविरुद्धरूपेणैव प्रतिभाति । यतः फलभोगं विहाय न कदापि कर्मणो विनाशो भवति इति । कर्मपदेनात्र कर्मजन्यमदृष्टमेव वुध्यते । शुभाशुभाख्यौ अस्य भेदावुभौ स्मृतौ । कर्मद्वयेऽस्मिन् नास्ति किञ्चित् स्थिरता, तज्जनकोऽदृष्टस्तु सुस्थिरः अविनाशी च । अतः जीवस्य कृते कर्मद्वयस्यास्य फलभोगं तु अवश्यम्भावी । अतः मङ्गलाचरणं न भवति विघ्नविनाशकम् । प्रसङ्गतः उल्लेख्यं यद् मङ्गलाचरणेन सह ग्रन्थसमाप्तेः नास्ति किमपि सम्बन्धः (कार्यकारणसम्बन्धः)। अतो यत्रैव मङ्गलाचरणस्य अनुष्ठानमस्ति तत्रैव ग्रन्थसमाप्तिः भविष्यति इति तु न निश्चितरूपेण वक्तुं शक्यते । यतः तस्य व्यतिक्रमोऽपि अस्ति, यथा- महाकविवाणभट्टेन प्रणीतस्य 'कादम्बरी'ति कथाकाव्ये मङ्गलाचरणं दृश्यते, परन्तु तन्न जगाम समाप्तिम् ; अन्यपक्षे नास्तिकप्रणीतेषु ग्रन्थेषु मङ्गलाचरणाभावादपि निर्विघ्नेनैव ग्रन्थसमापनं दृश्यते । मङ्गलाचरणं न विघ्नविनाशकं भवतीति आपत्तेरुत्तरे एतत्तु वक्तुं शक्यते यत् पूर्वोक्तस्मृतिः अवाधितकर्मणः कृते एव युज्यते । अर्थात् फलभोगं व्यतीत्य कर्मान्तरेण अवाधितकर्मणो विनाशो नैव सम्भवति । कर्मान्तरपक्षे तु न प्रयुज्यते एष नियमः । यतः फलभोगं विहाय कस्यचन कर्मणो न विनाशश्चेत् तर्हि श्रुतिस्मृतौ विहितस्य प्रायश्चित्तविधानस्य वैफल्यमुपजायते । परोक्षतो विघ्नापनोदनत्वात् यागादिरपि निरर्थको भविष्यति । अत एव उत्सर्गापवादन्यायेन पूर्वोक्तं मतम् अवाधितकर्ममात्रविषयकमिति मत्वा पूर्वोक्ताशङ्कां निवार्यते । अतो मङ्गलाचरणं न केवलं शिष्टाचारमात्रकम्, तत्तु सप्रयोजनार्थवत्वावच्छिन्नमिति सिद्धम् । अत्र स्वकीयेषु काव्यकृतिषु कविभूषणेनापि हेमचन्द्ररायेन आलंकारिकविधानम् आनुपूर्विकमनुसृत्य विहितं मङ्गलाचरणम् "मङ्गलाचरणम्"[२], "ग्रन्थकृतो मङ्गलाचरणमात्मनिवेदनञ्च"[३] चेत्यादिषु

---

[१] भाषापरिच्छेदः, मुक्तावली, पृष्ठे १५-१६

[२] परशु.च.(प्र.सं.), हैहय.वि.(प्र.सं.)

[३] रुक्मिणी.ह.(द्वि.सं.), पा.वि.(द्वि.सं.), सत्य.प.(द्वि.सं.)

नामाङ्कितेषु अंशेषु प्रायः श्लोकचतुष्टयेन वा श्लोकाष्टकेन वा श्लोकषट्केन वेति । हेमचन्द्रप्रणीतेषु काव्येषु मङ्गलाचरणस्य श्लोकसंख्या, तत्र प्रयुक्तानि वृत्तानि च अधो निर्दिश्यते –

<table>
<tr><th>काव्यानि</th><th colspan="2">श्लो.सं.</th><th colspan="2">वृत्तानि</th></tr>
<tr><td>परशुरामचरितम्</td><td colspan="2">८</td><td colspan="2">(श्लोकः १, ७) अनुष्टुप्, (श्लोकः २) रथोद्धता, (श्लोकः ३) उपजातिः, (श्लोकाः ४, ८) शार्दुलविक्रीडितम्, (श्लोकः ५) इन्द्रवज्रा, (श्लोकः ६) मालिनी च</td></tr>
<tr><td>हैहयविजयम्</td><td colspan="2">४</td><td colspan="2">(श्लोकाः १-३) अनुष्टुप्, (श्लोकः ४) शार्दुलविक्रीडितम्</td></tr>
<tr><td rowspan="2">रुक्मिणीहरणम्</td><td>प्र.सं.</td><td>द्वि.सं.</td><td>प्र.सं.</td><td>द्वि.सं.</td></tr>
<tr><td>६</td><td>१०</td><td>अनुष्टुप्(श्लोकाः१,५,६) वंशस्थविलम्(श्लोकः२), मालिनी (श्लोकः३), इन्द्रवज्रा (श्लोकः४)</td><td>अनुष्टुप् (श्लोकाः१-३; ६-१०), मालिनी (श्लोकः४), इन्द्रवज्रा (श्लोकः५)</td></tr>
<tr><td>पाण्डवविजयम्</td><td>६</td><td>८</td><td>अनुष्टुप् (श्लोकाः १-५), उद्गता (श्लोकः६)</td><td>अनुष्टुप्(श्लोकाः १-७), उद्गता (श्लोकः८)</td></tr>
<tr><td>सत्यभामापरिग्रहम्</td><td>५</td><td>६</td><td>अनुष्टुप्</td><td>अनुष्टुप्</td></tr>
</table>

सारणी ४.१ : हेमचन्द्ररायकृतेषु मङ्गलाचरणेषु श्लो.सं., वृत्तानि च

मङ्गलाचरणस्य वैशिष्ट्यप्रसङ्गे निगदितञ्च विश्वनाथकविराजेन साहित्यदर्पणस्य षष्ठे परिच्छेदे -

> “आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ॥
> क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्तनम् । ॥६/३०२॥”[1] इति।

अर्थात्, एतद्विधानानुसारेण महाकाव्यस्य आदौ एव नमस्क्रियाविधानम् आशीर्वादोल्लेखं वस्तुनिर्देशनं च कर्तव्यम् । क्वचित् खलादीनां निन्दा सताञ्च गुणकीर्तनमपि विधेयम् । एतेन परिस्फुट्यते यत्, मङ्गलाचरणे सन्ति चतुरङ्गानि - नमस्क्रिया आशीर्वा, वस्तुनिर्देशः, खलनिन्दा, सतां गुणकीर्तनम् च । अधुना हेमचन्द्रेण तदीये काव्यकृतिषु मङ्गलाचरणस्य वैशिष्ट्यचतुष्टयमिदमनुस्त्रियते न वेति विशदीक्रियते मया –

[1] सा.द.(हरिदास.) पृष्ठे ४२३

**(क) नमस्क्रियाशीर्वा**

- परशुरामचरितम्

मङ्गलाचरणस्यास्य प्रथमे श्लोके कविः वाग्देव्याः वन्दनं कृत्वा तामुद्दिश्य प्रणतिं ज्ञापयति । वन्दनाप्रसङ्गे तामुद्दिश्य संयोज्यते तेन विशेषणत्रयं ललितपदान्वितं तद्यथा 'वीणागानेन निःशेषाज्ञाननिद्रापनोदिनीम्', 'भद्राम्', 'शुचिस्मितमुखीम्' चेति ईदृशीं वाग्देवीं प्रति स प्रणति -

"वीणागानेन निःशेषाज्ञाननिद्रापनोदिनीम्।
भद्रां शुचिस्मितमुखीं प्रणमामि सरस्वतीम् ॥१॥"[1] इति।

श्लोकस्यास्य सकृदेव पुनरावृत्तिः दृश्यते हैहयविजयमिति द्वितीयमहाकाव्यस्य मङ्गलाचरणस्यादौ । द्वितीये श्लोके विद्यते हरेरवतारस्य भृगुपतेः परशुरामस्य वन्दनम् -

"आश्रमावनिरुहप्रभञ्जनं वीरकुञ्जरकुलञ्जघान यः।
तं समाश्रितमहेन्द्रभूधरं बन्द एष भृगुनन्दनं हरिम् ॥२॥"[2] इति।

ततः परं तृतीये श्लोके उत्तरार्धे स कविः महाभारतरूपं दिव्ययज्ञं प्रति तथा व्यासं प्रत्यपि सश्रद्धं प्रणतिं ज्ञापयति[3]।

- हैहयविजयम्

अत्र परशुरामचरितकाव्यान्तर्गतस्य मङ्गलाचरणस्य प्रथमश्लोकस्य पुङ्खानुपुङ्खतया पुनरावृत्तिरेव दृश्यते । अत्रापि कविना वाग्देवी एव वन्द्यते । अत्र संयोजितं ललितपदान्वितं वाग्देव्याः विशेषणत्रयं हि - 'वीणागानेन निःशेषाज्ञाननिद्रापनोदिनीम्', 'भद्राम्', 'शुचिस्मितमुखीम्' च । तथाहि -

"वीणागानेन निःशेषाज्ञाननिद्रापनोदिनीम्।
भद्रां शुचिस्मितमुखीं प्रणमामि सरस्वतीम् ॥१॥"[4] इति ।

- रुक्मिणीहरणम्

मङ्गलाचरणस्य प्रथमे तथा तृतीये श्लोके कविभूषणो हेमचन्द्रः पुराणकविभारतीस्वरूपिणीं कविवाणीस्वरूपिणीं वाग्देवीं वन्दयति -

---

[1] परशु.च.(प्र.सं.) पृष्ठे ५

[2] तत्रैव. तत्पृष्ठे

[3] तत्रैव. "मूर्त्ताय दिव्यमहसे नमो व्यासाय महामुनये ॥३॥" इति, तत्पृष्ठे

[4] हैहय.वि.(प्र.सं.) पृष्ठे ९

"भूमिकल्पलतां वन्दे पुराणकविभारतीम् ।
छाया यस्याः सदा सेव्या नव्यैः काव्यफलेप्सुभिः ॥ १ ॥ "[१] इति ।

द्वितीये श्लोके उपास्यदेवस्य माधवस्य माहात्म्यकीर्तनद्वारेण ईष्टदेवताबन्दमपि विधीयते तेन -

"कदा नु भेषजं स्वादु भजे भवगदापहम् ।
तपःफलपरिपाकं देवकीवसुदेवयोः ॥ २ ॥ "[२] इति ।

आशीर्वचनस्य प्रार्थना उपलभ्यते मङ्गलाचरणस्यास्य नवमे श्लोके, तत्र कविभूषणेनामुना प्राथ्यर्ते यत्, जन्मान्तरेऽपि कवेः भाषा एव तस्य कन्ठभूषणं भवतु, हृदये तिष्ठतु सुक्तिमुक्तासरः, शिरसि अस्तु सुमनसाम् आशीः –

"कण्ठे भूषा कवेर्भाषा सुक्तिमुक्तासरो हृदि ।
शिरस्याशीः सुमनसामस्तु जन्मान्तरेऽपि मे ॥ ९ ॥ "[३] इति ।

एवमेव विधीयेते नमस्क्रिया च आशीश्च ।

➢ पाण्डवविजयम्

मङ्गलाचरणस्य प्रारम्भे कवेः मतानुसारेण पुराणकविभारतीरूपा भूमिकल्पलता सदैव वन्दनीया । अपि च फलेप्सुभिः अर्थात् नव्यैः कविभिः यशोलाभाय, अर्थलाभाय, मङ्गललाभाय, व्यवहारविषये वैशारद्यलाभाय च तस्याः भारत्याः छाया सदैव सेव्या । अनुरूपो भावो दृश्यते मम्मटाचार्य्यप्रणीते काव्यप्रकाशे काव्यप्रयोजनवर्णनावसरे[४] ।

अथ द्वितीये श्लोके ईष्टदेवस्य श्रीकृष्णस्य माहात्म्यकीर्तनद्वारेण विहितं तेन ईष्टदेववन्दनम् । अत्र गदापशमकारिणा भेषजेन सह जगतः क्षयापहारिणः श्रीकृष्णस्य तुलनमपि दृश्यते । यथा परिपाकादनन्तरं भेषजो औषधत्वमाप्नोति तथैव देवकिवसुदेवयोः तपः फलपरिपाकद्वारेण भवति जगन्निवासस्य आविर्भावः-

"कदा नु भेषजं स्वादु भजे भवगदापहम्।
तपः फलपरिपाकं देवकीवसुदेवयोः ॥ २ ॥ "[५] इति।

---

[१] रुक्मिणी.ह.(द्वि.सं.) पृष्ठे ५

[२] तत्रैव. पृष्ठे ५

[३] तत्रैव. पृष्ठे ६

[४] काव्य.प्र.(बाल.) "काव्यं यशसेऽर्थकृते व्यवहारविधे शिवेतरक्षतये ।सद्यःपरनिर्वृत्तये कान्तासम्मिततयोपदेशयुजे ॥ १/२ ॥" इति, पृष्ठे २

[५] पा.वि.(द्वि.सं.)पृष्ठे ३

पुनः तृतीये श्लोके स व्यासदेवेन चित्रितं कृष्णार्जुनवर्णश्रीरञ्जितं महाभारतमिति महाकाव्यजगच्चित्रं प्रति नमश्चकार –

"सत्कृष्णार्जुनवर्णश्रीरञ्जितं नौमि तन्मुहुः ।
महाकाव्यजगच्चित्रं कल्पितं कृष्णशिल्पिना ॥३॥"[१] इति।

एवमेव प्रथमश्लोकत्रये विहितं तेन ईष्टदेववन्दनं नमस्क्रिया च ।

- सत्यभामापरिग्रहम्

हेमचन्द्रकृतस्य मङ्गलाचरणस्यास्य प्रथमे श्लोके अस्ति आशीः -

"देवीं गामुद्वहन् साक्षात् सत्यभामापरिग्रहे ।
पुमाञ्जयति वैदर्भ्या लक्ष्म्या सासूयमीक्षितः॥१॥"[२] इति ।

तृतीये चतुर्थे च श्लोके पुराणकविभारतीं तथा वाग्देवीं प्रति कवेः नमस्क्रिया एव विद्यते -

"भूमिकल्पलतां वन्दे पुराणकविभारतीम् ।
छाया यस्याः सदा सेव्या नव्यैः काव्यफलेप्सुभिः॥३॥
अर्चयन्तु गिरां देवीमन्ये शतदलस्रजा ॥४॥"[३] इति ।

**(ख) वस्तुनिर्देशः**

- परशुरामचरिते वस्तुनिर्देशः

तृतीये श्लोके पूर्वाधे विहितो महाकाव्यस्यास्य इङ्गिताकारो वस्तुनिर्देशः स्वयमेव कविनामुना । यतः कविरत्र महाभारतमेव स्वीकरोत्यस्य काव्यकृतेः उत्सत्वेन[४]। एतेन महाभारतीयपरशुरामाख्यानमेव महाकाव्यस्यास्य कथावस्तु इत्येव परोक्षत्वेनावगम्यते । अथ अन्तिमे श्लोके स कविः महाकाव्यस्यास्य नायकः, प्रतिनायकः, रसः, चतुर्वर्गफलं चेत्यादीन् विषयान् उपस्थापयति इत्यनेन प्रत्यक्षत्वेनैव विधीयते महाकाव्यस्यास्य वस्तुनिर्देशः - "नेता श्रीभृगुनन्दनो भगवतो नारायणस्यांशजस्तस्योत्कर्षकृतेऽनुवर्ण्यचरितो राजार्ज्जुनो हैहयः।.....वीरो मुख्यरसः कथा परिचिता भूभारमोक्षः फलम् ॥८॥"[५] इति ।

---

[१] पा.वि.(द्वि.सं.)पृष्ठे ३

[२] सत्य.प.(द्वि.सं.) पृष्ठे ३

[३] तत्रैव. तत्पृष्ठे

[४] परशु.च.(प्र.सं.) "काव्यानामुपजीव्यं महाभारतममृतं प्रवर्त्तयते ।॥३॥" इति, पृष्ठे ५

[५] तत्रैव. पृष्ठे ६

➢ हैहयविजये वस्तुनिर्देशः

मङ्गलाचरणेऽस्मिन् महाकाव्यस्य रस-प्रतिनायक-नायक-वृत्तान्तोत्सस्वरूप-चतुर्वर्गाणां वर्णनमपि उपस्थाप्यते हेमचन्द्ररायेण । अत्र तृतीये श्लोके स महाकविः उद्घाटयति तस्य काव्यकृतेः उपजीव्यं स्वरूपञ्च। श्लोकस्यास्य पूर्वार्धे रामायणीयमाख्यानमेव यथा काव्यस्यास्य उपजीव्यत्वेन सूच्यते[१] तथैव उत्तरार्धे महाकाव्यमिदमस्याख्यानस्य भाष्यरूपेणोपस्थाप्यते[२] ।

अथ अन्तिमे श्लोके सन्ति नायकप्रतिनायकवर्णनम्, अङ्गिरसवर्णनम्, चतुर्वर्गफलवर्णनम् चेत्यादयः। अत्र प्रथमे पादे स महाकविः हेमचन्द्रः कथयति यत्, चन्द्रकुलोद्भूतः कार्त्तवीर्य्यार्जुनः काव्यस्यास्य नायकः "नेता चन्द्रकुलोद्भवो नरपतिः श्रीकार्त्तवीर्य्यार्जुनः..। ॥४॥"[३] इति । ततः परं द्वितीये पादे कविनामुना लङ्केश्वरो रावण एव काव्यस्यास्य प्रतिनायकत्वेन उपस्थाप्यते ; न केवलमेतत् सोऽत्र रावणचरितोपस्थापनस्य उपयोगित्वमपि प्रकटयति 'तस्योत्कर्षकृतेऽनुवर्ण्यचरितो' इति पदे, अर्थात् सहस्रबाहोः चरितोत्कर्षख्यापनार्थमेव नायकचरितवर्णनादनन्तरं वर्णितमस्ति लङ्केश्वरचरितम्[४] । अथ अन्तिमे पादे महाकविः हेमचन्द्रः कथयति यदत्र वीर एव अङ्गी रसः, आख्यानं परिचितम् अर्थात् ख्यातम्, राक्षसान् पराजित्य क्षत्रीयानां प्रतिष्ठा एव महाकाव्यस्यास्य फलमिति "वीरो मुख्यरसः कथा परिचिता क्षत्रप्रतिष्ठा फलम् ॥४॥"[५] इति । अनेनैव प्रकारेण अतीव स्पष्टतया विधीयते महाकाव्यस्यास्य वस्तुनिर्देशः।

वस्तुनिर्देशः।

➢ रुक्मिणीहरणे वस्तुनिर्देशः

महाकाव्यस्यास्य मङ्गलाचरणगते षष्ठे तथा दशमे श्लोके विधीयते वस्तुनिर्देशः परोक्षत्वेन, प्रत्यक्षत्वेन च । तत्र षष्ठे श्लोके हरिचरितस्य आकर्षणी शक्तिविषये कथनप्रसङ्गे परोक्षतया एव ज्ञायते यत्, कविः श्रीहरेः चरितमवलम्ब्य कमपि काव्यं रचयितुमिच्छति -

"श्रीहरेश्चरिते कापि शक्तिराकर्षणी यथा ।
कृतार्थः स्यां कृती भूत्वा तथा सज्जनरञ्जने ॥६॥"[६] इति ।

---

[१] हैहय.वि.(प्र.सं.) "वृत्तसूत्रमुपन्यस्तं पुरा प्राचेतसेन यत् । ॥३॥" इति, पृष्ठे ९

[२] तत्रैव. "भाष्यभूततैव तस्येयं मदीयोक्तिः प्रवर्त्तताम् ॥३॥" इति, तत्पृष्ठे

[३] तत्रैव. तत्पृष्ठे

[४] तत्रैव. "तस्योत्कर्षकृतेऽनुवर्ण्यचरितो लङ्केश्वरो रावणः। ॥४॥" इति, तत्पृष्ठे

[५] तत्रैव. तत्पृष्ठे

[६] रुक्मिणी.ह.(द्वि.सं.) पृष्ठे ५

दशमे श्लोके रुक्मिणीहरणमिति महाकाव्यस्य नामोल्लेखेन स्पष्टतया वस्तुनिर्देशः प्राप्यते -

"रुक्मिणीहरणं काव्यमिदमासाद्य नूतनम् ।
सन्तु सन्तः सहृदयाः प्रमाणं गुणदोषयोः॥१०॥"[1] इति ।

➢ पाण्डवविजये वस्तुनिर्देशः

अन्येषां काव्यानामिव अस्मिन् महाकाव्ये सम्यग्रूपेणैव न दृश्यते वस्तुनिर्देशः परन्तु हेमचन्द्ररायेण अष्टमे श्लोके अत्यन्तविनयपुरःसरम् आत्मानं कविपद्धतीरनुगतेन तरुणपथिकरूपेण आख्यायित्वा पाण्डवविजयमिति स्वरचितमहाकाव्यस्य उल्लेखः क्रियते । न केवलमेतत्, तत्काव्यस्य कृते तेन तद्विदाह्लादजनकत्वमपि प्रार्थितम् "'पाण्डवविजय'मिति ग्रथितं मनसाम्मुदेऽस्तु पददाम तद्विदाम् ॥८॥"[2] इति । एवमेव सम्पद्यते वस्तुनिर्देशः। क्षेत्रेऽस्मिन् हेमचन्द्रस्य रचनाशैल्यां महाकविकालिदासस्य विशेषः प्रभावोऽपि परिलक्ष्यते । यतः अभिज्ञानशकुन्तलमिति नाटकस्य प्रारम्भे सूत्रधारमुखेन कवेस्तथा नाटकस्य नामोल्लेखो दृश्यते "अद्य खलु कालिदासग्रथितवस्तुना अभिज्ञानशकुन्तलनामधेयेन नवेन नाटकेनोपस्थातव्यमस्माभिः।"[3] इति । पुनः नट्या सह वाक्यालापावसरे काव्यस्य यत् साफल्यं तत् सहृदयानां हृदयाह्लादस्योपरि निर्भरतीति विषयोऽपि तेनैव प्रतिपादितः -

"आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
वलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥१/२॥"[4] इति।

➢ सत्यभामापरिग्रहे वस्तुनिर्देशः

खण्डकाव्येऽस्मिन् अतीव संक्षिप्तरूपेण परोक्षरूपेण च विधीयते वस्तुनिर्देशो महाकविना हेमचन्द्रेण तदीये मङ्गलाचरणे । तत्र द्वितीये श्लोके 'भागवतद्रुमम्' इति पदेन काव्यस्यास्य उत्सनिर्देशद्वारेण विधीयते कथावस्तुनः परोक्षनिर्देशोऽपि -

"पवित्राभिः पल्लवितं कथाभिः कमलापतेः ।
सम्भाव्यनिर्वृतिफलम्भजे भागवतद्रुमम् ॥२॥"[5] इति ।

---

[1] रुक्मिणी.ह.(द्वि.सं.) पृष्ठे ६

[2] पा.वि.(द्वि.सं.) पृष्ठे ३

[3] अभि.श.(हरिदास.) पृष्ठे ६

[4] तत्रैव. पृष्ठे ९

[5] सत्य.प.(द्वि.सं.) पृष्ठे ३

अथ षष्ठे श्लोके प्रथमार्धे सत्यभामापरिग्रहस्य नामोल्लेखः क्रियते कविना - "क्षुद्रे नवेऽपि काव्येऽस्मिन् सत्यभामापरिग्रहे ।..॥६॥"[1] इति एवमेव विधीयते वस्तुनिर्देशः।

### (ग) खलानां निन्दा

➢ परशुरामचरिते खलनिन्दा

हेमचन्द्ररायस्य आदिभूते काव्यद्वये (परशुरामचरितम्, हैहयविजयम्) तादृशी सुस्पष्टा खलनिन्दा नास्ति यादृशी विद्यते पाण्डवविजये, रुक्मिणीहरणे, सत्यभामापरिग्रहे च विद्यते तु परोक्षरूपेण ; तद् यथा - परशुरामचरिते नायकस्य परशुरामस्य चरितोत्कर्षख्यापनार्थमेव तस्य चरितवर्णनात् परं वर्णितमस्ति हैहयचरितम् -

"नेता श्रीभृगुनन्दनो भगवतो नारायणस्यांशज -
स्तस्योत्कर्षकृतेऽनुवर्ण्यचरितो राजार्ज्जुनो हैहयः।..॥८॥"[2] इति ।

➢ हैहयविजये खलनिन्दा

परशुरामचरितमिव हैहयेऽपि विद्यते परोक्षरूपा खलनिन्दा ; यतो नायकस्य सहस्रबाहोः चरितोत्कर्षख्यापनार्थमेव वर्णितमस्ति लङ्केश्वरचरितं नायकचरितवर्णनादनन्तरम् "स्तस्योत्कर्षकृतेऽनुवर्ण्यचरितो लङ्केश्वरो रावणः ।"[3] इति ।

➢ रुक्मिणीहरणे खलनिन्दा

सप्तमे श्लोके कविरयं नवोदितकविं प्रति तत्कालीनविद्वद्वर्गान्तर्गतस्य कस्यचन अंशस्य विमातृसुलभमनोभावो वर्णयति । इत्यवसरे स महाकविः कथयति यत्, स अन्यैः उत्पात इति अभिधया आख्यायितोऽपि, सूचितोऽभूत् तत्प्रतिभाया उदयः । यतः कविः केतुश्च सदैव कस्यचन जनस्य मनोमुकुरमवश्यमेव आह्लादयति -

"कोऽयमुत्पात इत्यन्यैराक्षिप्तोऽपि नवोदयः।
कविः केतुश्च कस्यापि कौतुकं कुरुतेतराम् ॥७॥"[4] इति ।

---

[1] सत्य.प.(द्वि.सं.) पृष्ठे ३

[2] परशु.च.(प्र.सं.) पृष्ठे ६

[3] हैहय.वि.(प्र.सं.) पृष्ठे ९

[4] रुक्मिणी.ह.(द्वि.सं.) पृष्ठे ६

पुनः अष्टमे श्लोके औपम्येन स दोषान्वेषणव्यग्रान् समत्सरान् समालोचकान् समत्सरेण उलूकवर्गेण सह तुलयति । कारणम्, ये एव जनाः केवलं दोषान्वेषणाय प्रवलोत्साहेन काव्यं पठन्ति, तेषां सकाशे भारवेरिव अर्थगौरवान्वितवाक्छटापि अधमतया प्रतिभाति -

"ये दोषान्वेषणव्यग्रा घूका इव समत्सराः।
वाक्छटापि रुजे तेषां सत्कवेर्भारवेरिव ॥८॥"[1] इति ।

➢ पाण्डवविजये खलनिन्दा

रुक्मिणीहरणमिव काव्यस्यास्य मङ्गलाचरणगते षष्ठे च सप्तमे श्लोके अपि केवलं दोषान्वेषणव्यग्राणां समत्सराणां समालोचकानां निन्दा दृश्यते एकप्रकारभूते श्लोके –

"ये दोषान्वेषणव्यग्रा घूका इव समत्सराः।
वाक्छटापि रुजे तेषां सत्कवेर्भारवेरिव ॥७॥"[2] इति ।

➢ सत्यभामापरिग्रहे खलनिन्दा

खण्डकाव्येऽस्मिन् पञ्चमे श्लोके परोक्षरूपेण विद्यते खलनिन्दा, इत्यवसरे स कविः कथयति यत्, स अन्यैः उत्पात इति अभिधया आख्यायितोऽपि, सूचितोऽभूत् तत्प्रतिभाया उदयः -

"कोऽयमुत्पात इत्यन्यैराक्षिप्तोऽपि नवोदयः।
कविः केतुश्च कस्यापि कौतुकं कुरुतेतराम् ॥५॥"[3] इति ।

**(घ) सतां गुणकीर्तनम्**

➢ परशुरामचरिते सतां गुणकीर्तनम्

चतुर्थे पञ्चमे च श्लोके अग्रजान् महाकवीन् प्रत्यपि कविरयं स्वविनयं प्रदर्शयति कालिदासमनुसृत्य, स पूर्वजानां काव्यकाराणां श्रेष्ठत्वं प्रतिपाद्य स्वकीयमधमत्वं व्यर्थत्वमपि उल्लिखति -

"चित्रा काव्यकलोपमा निरुपमा वाक् कालिदासे सुधा
गाम्भीर्येण च भारवेरविजितो वीरप्रधानो रसः।
कारुण्यं भवभूतिरेव तनुते विख्यातमेतत् पुन -

---

[1] रुक्मिणी.ह.(द्वि.सं.) पृष्ठे ६

[2] पा.वि.(द्वि.सं.) पृष्ठे ३

[3] सत्य.प.(द्वि.सं.) पृष्ठे ३

लौलित्ये जयदेव एव जयति व्यर्थः श्रमो मादृशाम् ॥४॥
पुंस्कोकिलः कूजति रक्तकण्ठः श्रुतिः श्रयत्युन्मदहंसनादम् ।
असौ नदत्यूर्द्धगतः शिखण्डी काके कदा कोऽपि ददाति कर्णम् ॥५॥"[1] इति ।

षष्ठे च श्लोके स कालिदासं शशिना सह, भारवीं च सूर्येण सह तुलयति खद्योतैश्चात्मानन्तुलयति -

"अमृतगुरिति लोके कालिदासः शशी वा विलसति विपुलौजा भारविर्वा रविर्वा।
विरमति न तथापि क्षामखद्योतवृत्तावविदुषि मयि काव्याकाशभासाभिलाषः॥६॥"[2] इति ।

एवमेव विधीयते सतां गुणकीर्तनम् ।

➢ हैहयविजये सतां गुणकीर्तनम्

मङ्गलाचरणस्य द्वितीये श्लोके रामायणकर्तारं वाल्मीकिं वन्दयति गुणकीर्तनञ्च करोति 'आदिकाव्यप्रणेतारम्', 'आदिज्योतिरिवाव्ययम्', 'जगदुद्भासकम्', 'ऋषिसत्तमम्' चेति विशेषणचतुष्टयेन -

"आदिकाव्यप्रणेतारमादिज्योतिरिवाव्ययम् ।
जगदुद्भासकं वन्दे वाल्मीकिमृषिसत्तमम् ॥२॥"[3] इति ।

➢ रुक्मिणीहरणे सतां गुणकीर्तनम्

परशुरामचरितस्य मङ्गलाचरणमिव अत्रापि चतुर्थे पञ्चमे च संख्यके श्लोके अग्रजान् महाकवीन् प्रत्यपि कविरयं स्वविनयं प्रदर्शयति कालिदासमनुसृत्य, स हेमचन्द्ररायः पूर्वजानां काव्यकाराणां श्रेष्ठत्वं प्रतिपाद्य स्वकीयमधमत्वं सूचयति अनेन प्रकारेण, यथा स चतुर्थे श्लोके कालिदासं शशिना सह भारवीं च सूर्येण सह तुलयति खद्योतैश्चात्मानन्तुलयति -

"अमृतगुरिति लोके कालिदासः शशी वा विलसति विपुलौजा भारविर्वा रविर्वा।
मम पुनरिह काव्यव्योमनि द्योतमाने प्रसरति विजिहीर्षाद्यापि खद्योतवृत्तेः॥४॥"[4] इति।

पञ्चमे च श्लोके स महाकविः पूर्वजानां कवीनां काव्यकृतीन् पुंस्कोकिलकूजनेन, हंसनादेन, शिखण्डीरवेणापि सह तुलयति, काकस्वरेण तु स्वकीयां कृतिं तुलयति -

---

[1] परशु.च.(प्र.सं.) पृष्ठे ५

[2] तत्रैव. पृष्ठे ६

[3] हैहय.वि.(प्र.सं.) पृष्ठे ९

[4] रुक्मिणी.ह.(द्वि.सं.) पृष्ठे ५

"पुंस्कोकिलः कूजति रक्तकण्ठः श्रुतिः श्रयत्युन्मदहंसनादम्।
असौ नदत्यूर्द्धमुखः शिखण्डी काकस्वरे को नु ददातु कर्णम् ॥५॥"[1] इति।

एवमेव विधीयते सतां गुणकीर्तनम् ।

➢ पाण्डवविजये सतां गुणकीर्तनम्

स कविः आलंकारिकविधानानुसारेण चर्तुथे पञ्चमे च श्लोके भारविकालिदासमाघश्रीहर्षादीनां संस्कृतसाहित्याङ्गनस्थितानां प्रतिभान्वितानां कवीनां प्रशंसयन्नाह यत्, भारविः कालिदासश्च प्रसादगुणान्वितं वाणीमाश्रित्यैव सूर्याचन्द्रमसाविव यथाक्रमेण दीप्त्या कान्त्या च विरेजे । परवर्तिश्लोके ज्योतिष्केण सह माघादीनां तुलनमपि दृश्यते –

"श्रितौ प्रसादभाजं गां दीप्त्या कान्त्या च जागृतः।
भारविः कालिदासश्च सूर्याचन्द्रमसाविव ॥४
ज्योतींषि पुनरन्यानि साहित्यगगनाङ्गने ।
माघश्रीहर्षमुख्यानि वृहन्ति च लघूनि च ॥५"[2] इति ।

➢ सत्यभामापरिग्रहे गुणकीर्तनम्

षष्ठे श्लोके सहृदयानां गुणकीर्तनेन सतां गुणकीर्तनमेव क्रियते कविभूषणेनामुना -

"क्षुद्रे नवेऽपि काव्येऽस्मिन् सत्यभामापरिग्रहे ।
सन्तु सन्तः सहृदयाः प्रमाणं गुणदोषयोः॥६॥"[3] इति ।

प्रसङ्गतः उल्लेख्यं यद्, हेमचन्द्ररायः केवलं मङ्गलाचरणमिति शिरोनाम्ना चिह्निते अंशे एव चकार मङ्गलाचरणम्, तत्तु न। स तस्य महाकाव्येषु खण्डकाव्येषु यथा आदौ मङ्गलाचरणं करोति तथैव मध्ये शेषे चापि मङ्गलं विदधाति, शास्त्रेषु अपि उपलभ्यते 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि कर्त्तव्यानि' इति ।

'मङ्गलादीनि' इति अंशस्य आलोचना पूर्वे एव विधीयते विस्तरसः, अधुना कविभूषणो हेमचन्द्रः तस्य काव्यकृतिषु केन प्रकारेण मध्ये तथान्ते मङ्गलाचरणं चकार तदेवालोच्यते -

---

[1] रुक्मिणी.ह.(द्वि.सं.) पृष्ठे ५

[2] पा.वि.(द्वि.सं.) पृष्ठे ३

[3] सत्य.प.(द्वि.सं.) पृष्ठे ३

## मङ्गलमध्यानि

### परशुरामचरिते

प्रायः प्रत्येकसर्गस्य प्रथमे अन्तिमे च श्लोके मङ्गलवाचकशब्देन, अवतारवाचकपदेन, देवतावाचकपदेन च विहितं तेन मङ्गलम् । तदुदाहरणं यथा -

प्रथमः सर्गः> श्रियः; शेशवान्ताहितश्रीः।

द्वितीयः सर्गः> श्रिया; पुराग्निश्रीः।

तृतीयः सर्गः> अथ (इति ब्रह्मवाचकशब्दः अ) ; जयश्रियम्।

चतुर्थः सर्गः> सूर्य्यवत्; श्रियम्।

पञ्चमः सर्गः> धेनोः; ब्रह्मश्रियम्।

षष्ठः सर्गः> जामदग्न्यम्; श्रीः।

सप्तमः सर्गः> मुखश्रीः (अन्ते केवलम्) ।

अष्टमः सर्गः> उ इति शिववाचकशब्दः; श्रियम् ।

नवमः सर्गः> अथ (ब्रह्मवाचकः अ); श्रियम्, इन्द्रादयः।

दशमः सर्गः> भृगुनन्दनः, अनलः; श्रीः।

### हैहयविजये

अत्र तृतीयसर्गं व्यतिरिच्य प्रथमसर्गाद् नवमसर्गं यावत् प्रथमे अन्तिमे च श्लोके मङ्गलवाचकशब्देन, देवतावाचकपदेन, ब्रह्मवाचकशब्देन, श्रीरिति पदेन, पुण्यवाचकेन अव्ययपदेन च विहितं मङ्गलम् । तृतीये सर्गे केवलमन्तिमे श्लोके श्रीशब्दस्य तृतीयाविभक्त्यन्तेन रूपेण विहितं मङ्गलम्, तद्यथा -

प्रथमे सर्गे > श्रियः; श्रीः ।

द्वितीये सर्गे > इत्थम् (इ-कारेण कामदेवो बुध्यते); जयश्रीः ।

तृतीये सर्गे > श्रिया (अन्तिमे श्लोके)।

चतुर्थे सर्गे > त; श्रीमन्तम् ।

पञ्चमे सर्गे > नर्म्मदा; जयश्रीः ।

षष्ठे सर्गे > अथ; श्रीः ।

सप्तमे सर्गे > हेमाङ्ग; अथ, श्रिया ।

अष्टमे सर्गे > क्ष (नृसिंहवाचकं वर्णम्); श्रीः ।

नवमे सर्गे > अथ; लक्ष्मी, वासवी, श्रीः ।

**रुक्मिणीहरणे**

रुक्मिणीहरणस्य प्रथमसर्गादारभ्य द्वादशसर्गं यावद् प्रत्येकसर्गस्य आदिभूते श्लोके तथान्तिमे श्लोके श्रीरिति शब्दस्य रूपैः, कृष्णवाचकपदैः प्रभृतिभिः विहितं मङ्गलाचरणम्, तदुदाहरणं यथा -

प्रथमे सर्गे > श्रियः; श्रीः।

द्वितीये सर्गे > श्रीः, शौरिः; श्रीः, यदुपतिः।

तृतीये सर्गे > अच्युतम्; श्रीः, हरिः।

चतुर्थे सर्गे > अथ; श्रीनिवासः।

पञ्चमे सर्गे > अथ; श्रियः।

षष्ठे सर्गे > रुक्मिणी (लक्ष्मीस्वरूपा अतएव माङ्गलिकी); श्रीनिवासः।

सप्तमे सर्गे > हरिः, सतीम्; श्रीः।

अष्टमे सर्गे > श्रीहरौ; विदर्भराजमुखश्रीः।

नवमे सर्गे > विप्रः/अथ; विष्णोः।

दशमे सर्गे > ततः; जयश्रीः, यदुपतेः।

एकादशे सर्गे > वसुदेवसुतेन; मुकुन्दः(माधववाचकं पदम्), जयश्रीः।

द्वादशे सर्गे > हरिणा; श्रीमतः।

**पाण्डवविजये**

पाण्डवविजयस्य प्रथमसर्गात् पञ्चमसर्गपर्यन्तं तथा सप्तमसर्गस्य प्रथमे अन्तिमे च श्लोके मङ्गलवाचकशब्देन, देवतावाचकपदेन च विहितं तेन मङ्गलम् । अवशिष्टेषु सर्गेषु देवतावाचकशब्देन, श्रीरिति पदेन च दृश्यते मङ्गलाचरणं केवलमन्तिमश्लोकेषु । यथा –

प्रथमे सर्गे > श्रीः; श्रीनिवासश्च ।

द्वितीये सर्गे > हरिः; शौरिश्च ।

तृतीये सर्गे > यदुवरः; श्रीपतिश्च ।

चतुर्थे सर्गे > कृष्णः; श्रीश्च ।

पञ्चमे सर्गे >अच्युतः; श्रीपतिश्च ।

षष्ठे सर्गे > अच्युतः(अन्तिमे श्लोके)।

सप्तमे सर्गे > अच्युतः; जयश्रीश्च ।

अष्टमे सर्गे > भाग्यश्रीः(अन्तिमे श्लोके)।

नवमे सर्गे > श्रीः(अन्तिमे श्लोके)।

दशमे सर्गे > श्रीः(अन्तिमे श्लोके)।

एकादशे सर्गे > श्रीः, हरिहरश्च(अन्तिमे श्लोके)।

द्वादशे सर्गे > जयश्रीः(अन्तिमे श्लोके)।

**सत्यभामापरिग्रहे**

सत्यभामापरिग्रहस्य प्रथमसर्गादारभ्य चतुर्थसर्गं यावत् प्रथमे अन्तिमे च श्लोके मङ्गलवाचकशब्देन, माधववाचकपदेन, देवतावाचकपदेन, ब्रह्मवाचकशब्देन, श्रीरिति पदेन, मङ्गलवाचकवर्णेन च विहितं मङ्गलम् तद् यथा -

प्रथमे सर्गे > श्रियः; श्रीपतिश्च ।

द्वितीये सर्गे > अथ, पुरुषोत्तमः; श्रियम्, माधवश्च ।

तृतीये सर्गे > क (अत्र आत्मावाचकेन ब्रह्मावाचकेन विष्णुवाचकेन क-कारेण मङ्गलं विधीयते); अथ, अधिश्रीश्च ।

चतुर्थे सर्गे > म (अत्र शिववाचकेन, चन्द्रवाचकेन, यमवाचकेन, ब्रह्मावाचकेन, विष्णुवाचकेन म-कारेण मङ्गलं विधीयते); वासुदेवः, श्रीविशेषश्च ।

## मङ्गलान्तानि

हेमचन्द्ररायस्य प्रायः सर्वेषु काव्येषु अन्ते मङ्गलाचरणं दृश्यते । परन्तु अन्ते कृतं मङ्गलाचरणं द्वैविध्येन विहितं महाकविनामुना, यथा - सर्गान्तमङ्गलाचरणम्, काव्यान्तमङ्गलाचरणञ्चेति ।

### सर्गान्तमङ्गलाचरणम्

हेमचन्द्रप्रणीतेषु परशुरामचरितम्, हैहयविजयम्, रुक्मिणीहरणम्, पाण्डवविजयम् इत्यादिषु महाकाव्येषु प्रतिसर्गस्य समाप्तौ "इति श्रीपरशुरामचरिते काव्ये...नाम...सर्गः ।, इति श्रीहैहयविजये काव्ये... नाम...सर्गः ।, इति श्रीरुक्मिणीहरणे काव्ये... नाम...सर्गः ।, इति श्रीपाण्डवविजये काव्ये... नाम...सर्गः ।"[1] इत्यादिषु वाक्यांशेषु श्री'शब्देन मङ्गलाचरणं विधीयते । एतद्यतीत्य खण्डकाव्यस्य सत्यभामापरिग्रहस्य

[1] परशु.च.(प्र.सं.), हैहय.वि.(प्र.सं.), रुक्मिणी.ह.(द्वि.सं.), पा.वि.(द्वि.सं.)

केवलं प्रथमे संस्करणे प्रत्येकसर्गस्यान्ते "इति श्रीसत्यभामापरिग्रहे काव्ये..."[१] इति वाक्यांशे श्री'शब्देन मङ्गलाचरणं दृश्यते ।

**काव्यान्तमङ्गलाचरणम्**

आसीद् हेमचन्द्ररायो माधवभक्तो यतः पाण्डवविजयस्य तथा रुक्मिणीहरणस्य समापनादनन्तरं स महाकाव्यद्वयमिदम् अर्पितवान् श्रीकृष्णस्य चरणकमले ; पाण्डवविजये यथा –

"पूर्णमिदं पाण्डवविजयाभिधं महाकाव्यं
भगवति पाण्डवसखे वासुदेवेऽर्पितमस्तु ।"[२],

रुक्मिणीहरणे यथा "पूर्णमिदं रुक्मिणीहरणाभिधं महाकाव्यं भगवति श्रीकृष्णेऽर्पितमस्तु।"[३] चेति। पुनः कृष्णचरिताख्यानाश्रितस्य खण्डकाव्यस्य सत्यभामापरिग्रहस्यान्तेऽपि माधवस्य चरणे काव्यस्यास्य समर्पणं दृश्यते "काव्यमिदं भगवत्यर्पितमस्तु।"[४] इति वाक्ये ।

अतः एतत्तु वक्तुं शक्यते यत्, हेमचन्द्रेण पुङ्खानुपुङ्खतया "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि कर्तव्यानि" - इति शास्त्रवचनमिदमनुस्रियते । हेमचन्द्रस्य काव्यानां मङ्गलाचरणविषये आलोचनाप्रसङ्गे विषयमेकं नयनपथमुपैति यद्, हेमचन्द्ररायः प्रायः तदीये सर्वेषु काव्यकृतिषु मङ्गलाचरणेषु पूर्वपूर्वकाव्येभ्यो उत्तरोत्तरकाव्येषु मङ्गलाचरणान्तर्गतानां श्लोकानां पुनरावृत्तिर्विदधाति । सा पुनरावृत्तिः क्वचित् आंशिकी क्वचिच्च सम्पूर्णा । यथा - पाण्डवविजयमिति महाकाव्यस्य १मसंस्करणस्य द्वितीयश्लोकस्य केवलं पदविन्यासगतपरिवर्तनं दृश्यते २यसंस्करणे, न तु अर्थगतपरिवर्तनमिति,

| १मे संस्करणे यथा - | २ये संस्करणे श्लोकोऽयं तृतीयश्लोकरूपेण तिष्ठति - |
|---|---|
| "स्फुटकृष्णार्ज्जुनद्वैतवर्णमद्वैतनिर्मलम्। | "सत्कृष्णार्ज्जुनवर्णश्रीरञ्जितं नौमि तन्मुहुः। |
| कृष्णकारुकृतं नौमि महाकाव्यजगत्पटम् ॥२॥"[५], | महाकाव्यजगच्चित्रं कल्पितं कृष्णशिल्पिना ॥३॥"[६] चेति। |

अधुना अधः सारणीद्वारेण निर्दिश्यते सैव पुनरावृत्तिः -

---

[१] सत्य.प.(प्र.सं.)

[२] पा.वि.(द्वि.सं.)पृष्ठे ११४

[३] रुक्मिणी.ह.(द्वि.सं.) पृष्ठे १०७

[४] सत्य.प.(द्वि.सं.) पृष्ठे ३२

[५] पा.वि.(प्र.सं.) पृष्ठे ३

[६] पा.वि.(द्वि.सं.) पृष्ठे ३

| मङ्गलाचरणेषु श्लोकानां पुनरावृत्तिः | | | | |
|---|---|---|---|---|
| **परशुरामचरितम्** | **हैहयविजयम्** | **रुक्मिणीहरणम्** | **पाण्डवविजयम्** | **सत्यभामापरिग्रहम्** |
| वीणागानेन निःशेषा ज्ञाननिद्रापनोदिनीम् ।<br>भद्रां शुचिस्मितमुखीं प्रणमामि सरस्वतीम् ॥१<br>आश्रमावनिरुहप्रभञ्जनं वीर-कुञ्जरकुलञ्जघान यः।<br>तं समाश्रितमहेन्द्रभूधरं वन्द एष भृगुनन्दनं हरिम् ॥२<br>काव्यानामुपजीव्यं महाभारतममृतं प्रवर्त्तयते ।<br>मूर्ताय दिव्यमहसे नमो व्यासाय महामुनये ॥३<br>चित्रा काव्यकलोपमा निरुपमा वाक् कालिदासे सुधा<br>गाम्भीर्य्येण च भारवेरविजितो वीरप्रधानो रसः।<br>कारुण्यं भवभूतिरेव तनुते विख्यातमेतत् पुन-<br>र्लालित्ये जयदेव एव जयति व्यर्थः श्रमो मादृशाम् ॥४<br>पुंस्कोकिलः कूजति रक्तकण्ठः<br>श्रुतिः श्रयत्युन्मदहंसनादम् ।<br>असौ नदत्युर्द्धगतः शिखण्डी<br>काके कदा कोऽपि ददाति कर्णम् ॥५<br>अमृतगुरिति लोके कालिदासः शशी वा<br>विलसति विपुलौजा भारविर्वा रविर्वा।<br>विरमति न तथापि क्षामखद्योतवृत्ता-<br>वविदुषि मयि काव्याकाशभासाभिलाषः ॥६<br>तथापि बलवत्येषा प्रयासैकफला स्पृहा ।<br>श्रीहरेश्चरिते नूनं शक्तिराकर्षणीदृशी ॥७<br>नेता श्रीभृगुनन्दनो भगवतो नारायणस्यांशज-<br>स्तस्योत्कर्षकृतेऽनुवर्ण्यचरितो राजार्जुनो हैहयः।<br>काव्येऽस्मिन्नपकृष्टलेखककृतौ दीनोचिता-लंकृतौ<br>वीरो मुख्यरसः कथा परिचिता भूभारमोक्षः फलम् ॥८ | वीणागानेन निःशेषा ज्ञाननिद्रापनोदिनीम् ।<br>भद्रां शुचिस्मितमुखीं प्रणमामि सरस्वतीम् ॥१<br><br>आदिकाव्यप्रणेतारमादिज्योतिरिवाव्ययम् ।<br>जगदुद्भासकं वन्दे वाल्मीकिमृषिसत्तमम् ॥२<br><br>वृत्तसूत्रमुपन्यस्तं पुरा प्राचेतसेन यत् ।<br>भाष्यभूतैव तस्येयं मदीयोक्तिः प्रवर्तताम् ॥३<br><br>नेता चन्द्रकुलोद्भवो नरपतिः श्रीकार्त्तवीर्य्यार्ज्जुन -<br>स्तस्योत्कर्षकृतेऽनुवर्ण्यचरितो लङ्केश्वरो रावणः।<br>काव्येऽस्मिन्नवहीनशक्तिजनिते दीनोचितालंकृतौ<br>वीरो मुख्यरसः कथा परिचिता क्षत्रप्रतिष्ठा फलम् ॥४ | भूमिकल्पलतां वन्दे पुराणकविभारतीम् ।<br>छाया यस्याः सदा सेव्या नव्यैः काव्यफलेप्सुभिः॥१<br>कदा नु भेषजं स्वादु भजे भवगदापहम् ।<br>तपःफलपरिपाकं देवकीवसुदेवयोः ॥२<br>कविर्जयति यस्यास्यसरोरुहविहारिणी ।<br>हारिण्यर्थवती पुण्या कृतार्था वाण्यलंकृता ॥३<br>अमृतगुरिति लोके कालिदासः शशी वा<br>विलसति विपुलौजा भारविर्वा रविर्वा।<br>मम पुनरिह काव्यव्योमनि द्योतमाने<br>प्रसरति विजिहीर्षाद्यापि खद्योतवृत्तेः ॥४<br>पुंस्कोकिलः कूजति रक्तकण्ठः<br>श्रुतिः श्रयत्युन्मदहंसनादम्।<br>असौ नदत्यूर्द्धमुखः शिखण्डी<br>काकस्वरे को नु ददातु कर्णम् ॥५<br>श्रीहरेश्चरिते कापि शक्तिराकर्षणी यथा ।<br>कृतार्थः स्यां कृती भूत्वा तथा सज्जनरञ्जने॥६<br>कोऽयमुत्पात इत्यन्यैराक्षिप्तोऽपि नवोदयः।<br>कविः केतुश्च कस्यापि कौतुकं कुरुतेतराम् ॥७<br>ये दोषान्वेषणव्यग्रा घूका इव समत्सराः ।<br>वाक्छटापि रुजे तेषां सत्कवेर्भारवेरिव ॥८<br>कण्ठे भूषा कवेर्भाषा सूक्तिमुक्तासरो हृदि ।<br>शिरस्याशीः सुमनसामस्तु जन्मान्तरेऽपि ॥९<br>रुक्मिणीहरणं काव्यमिदमासाद्य नूतनम् ।<br>सन्तु सन्तः सहृदयाः प्रमाणं गुणदोषयोः ॥१० | भूमिकल्पलतां वन्दे<br>पुराणकविभारतीम् ।<br>छाया यस्याः सदा सेव्या<br>नव्यैः काव्यफलेप्सुभिः॥१<br><br>कदा नु भेषजं स्वादु भजे भवगदापहम् ।<br>तपःफलपरिपाकं देवकीवसुदेवयोः ॥२<br><br>सत्कृषणार्ज्जुनवर्णश्रीरञ्जितं नौमि तन्मुहुः।<br>महाकाव्यजगच्चित्रं कल्पितं कृष्णशिल्पिना ॥३<br><br>श्रितौ प्रसादभाजं गां दीप्त्या कान्त्या च जागृतः।<br>भारविः कालिदासश्च सूर्य्याचन्द्रमसाविव ॥४<br><br>ज्योतींषि पुनरन्यानि साहित्यगगनाङ्गने ।<br>माघश्रीहर्षमुख्यानि वृहन्ति च लघुनि च ॥५<br><br>कोऽयमुत्पात इत्यन्यैराक्षिप्तोऽपि नवोदयः।<br>कविः केतुश्च कस्यापि कौतुकं कुरुतेतराम् ॥६<br><br>ये दोषान्वेषणव्यग्रा घूका इव समत्सराः ।<br>वाक्छटापि रुजे तेषां सत्कवेर्भारवेरिव ॥७<br><br>कविपद्धतिरनुगतेन<br>तरुणपथिकेन केनचित्।<br>पाण्डवविजयमिति ग्रथितं<br>मनसाम्मुदेऽस्तु पददाम तद्विदाम् ॥८ | देवीं गामुद्वहन् साक्षात् सत्यभामापरिग्रहे।<br>पुमाञ्जयति वैदर्भ्या लक्ष्म्या सासूयमीक्षितः॥१<br><br>पवित्राभिः पल्लवितं कथाभिः कथाभिः कमलापतेः।<br>सम्भाव्यनिर्वृतिफलम्भजे भागवतद्रुमम् ॥२<br><br>भूमिकल्पलतां वन्दे<br>पुराणकविभारतीम् ।<br>छाया यस्याः सदा सेव्या<br>नव्यैः काव्यफलेप्सुभिः॥३<br><br>अर्चयन्तु गिरां देवीमन्ये शतदलस्रजा।<br>कृतार्थम्मन्य एवायमर्चन् यूथिकयापि ताम् ॥४<br><br>कोऽयमुत्पात इत्यनैराक्षिप्तोऽपि नवोदयः।<br>कविः केतुश्च कस्यापि कौतुकं कुरुतेतराम् ॥५<br><br>क्षुद्रे नवेऽपि काव्येऽस्मिन् सत्यभामापरिग्रहे ।<br>सन्तु सन्तः सहृदयाः प्रमाणं गुणदोषयोः॥६ |

सारणी ४.२ : हेमचन्द्रकृतेषु मङ्गलाचरणेषु श्लोकानां पुनरावृत्तिः

## ४.२. द्वितीयो भागः : हेमचन्द्रस्य काव्यकृतिषु सुप्राचीनानां कवीनां प्रभावः

"इदं कविवरैः सर्वैराख्यानमुपजीव्यते । उदयप्रेप्सुभिर्भृत्यैरभिजात इवेश्वरः॥"[१]

अर्थाद् उन्नतिकामिनो भृत्याः सदैव अभिजातप्रभुमाश्रयन्ति । यथा युगे युगे प्राचीनाः साहित्यिकाः तथा अर्वाचीना अपि रामायण-महाभारत-पुराणाख्यानानि उपजीव्य तेषां काव्यानि अरचयन् । एतानवलम्ब्य भास-कालिदास-भारवि-माघ-श्रीहर्ष-वासुदेव-क्षेमेन्द्र-भट्टनारायण-प्रमुखैः कविभिः दृश्यकाव्यानि, महाकाव्यानि च रचितानि ; अस्मिन् प्रसङ्गे कविभूषणस्य हेमचन्द्ररायस्य काव्यकृतिष्वपि नास्ति कश्चिद् व्यतिक्रमः। तदीयेषु काव्यकृतिषु स कविः छन्दोऽनुवर्तनेषु, पदविन्यासेषु, चरित्रचित्रणेषु, गुर्व्वर्थप्रतिपादकवाक्यपरम्परारचनासु च भारविं ; प्रसादगुणेन च कालिदासमपि काममनुहरति । इत्थं प्रथितयशसः पुराणकविद्वयस्य शैलीं युगपदनुवर्तमानस्तयोरुभयोरेव कविवृन्दारकयोः सम्पद्विशेषाणां भूयसां सङ्कलनं समन्वयञ्च कुर्व्वन् कविः हेमचन्द्रः कयाप्यभिनवाभिख्यया सुतरां सम्भावयति कवितालक्ष्मीम् । प्रसङ्गेऽस्मिन् भवविभुतिविद्याभूषणेनोक्तम् -

"भारविः कालिदासश्च सूर्य्याचन्द्रमसाविव ।
तयोर्दीप्तिश्च कान्तिश्च हेमचन्द्रं समं श्रिते ॥"[२] इति।

न केवलं भारवेः, कालिदासस्य च ; अपि तु भास-माघ-श्रीहर्षादीनां प्रभावोऽपि दृश्यते कवेरस्य काव्यकृतिषु । अधुना महाकाव्यत्रयं तथा 'सत्यभामापरिग्रहमि'ति खण्डकाव्यम् आधारीकृत्य प्रसङ्गेऽस्मिन् दिङ्मात्राणि उदाहरणानि अधःस्तात् सन्निवेशितानि -

### परशुरामचरिते

अत्रत्ये चतुर्थे सर्गे एके एव श्लोके मृगयाशीलस्य हैहयस्य जमदग्नेराश्रमाभिगमने शाकुन्तले चित्रितस्य मृगयाविहारिणो दुष्यन्तस्य आश्रमप्रवेशस्य भाव एव द्योतितमस्ति, परन्तु पूर्वोक्ते श्लोके पदविन्यासः विरचनकौशलञ्च रघुवंशे वर्णितं समहिष्या दिलीपेन वशिष्ठाश्रमाभिगमनमेव स्मारयति -

| परशुरामचरिते | रघुवंशे |
|---|---|
| अथ हैहयवंशदीपकः स कदाचिन्मृगयाचरो नृपः।<br>चतुरङ्गबलान्वितः क्रमाज्जमदग्नेर्गत आश्रमं मुनेः॥४/१९॥[३] | अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया।<br>तौ दम्पती वशिष्ठस्य गुरोर्जग्मतुराश्रमम्॥१/३५॥[४] |

सारणी ४.३ : सादृश्यम् (परशु.च., रघु. चेत्यनयोः)

---

[१] महा.आदि.(हरिदास.) १/२/३९९, पृष्ठे १८९

[२] पा.वि.(द्वि. सं.) समा. पृष्ठे ११८

[३] परशु.च.(प्र.सं.) पृष्ठे ३१

[४] रघु.(पाण्डुरङ्ग.) पृष्ठे १३

अथ अस्मिन्नेव सर्गे कविना जमदग्नेः आश्रमवर्णने रघुवंशस्य वशिष्ठाश्रमवर्णनम्, स्वप्नवासवदत्तस्य तपोवनवर्णनम्, शाकुन्तलस्य कण्वाश्रमवर्णनमित्यादीनां छायैवानुभूयते –

| **परशुरामचरितम्** | **रघुवंशम्**[१] |
|---|---|
| चिरसम्भृतहोमपावकं<br>प्रचुराज्याहुतिधूमगन्धिनम्।<br>नियमैकधनैरधिष्ठितं<br>निचितं शान्तिरतैः शकुन्तिभिः॥<br>मुनिवृत्त्युपदेशकैः स्थिरै-<br>रभिलीनं तरुभिः समन्ततः।<br>अविरोधपरैर्मृगैः स्फुटं<br>तपसां सूचितपुण्यवैभवम्॥[२] | आतपात्ययसंक्षिप्तनीवारासु निषादिभिः।<br>मृगैर्वर्त्तितरोमन्थमुटजाङ्गनभूमिषु॥<br>अभ्युत्थिताग्निपिशुनरतिथिनाश्रमोन्मुखान्।<br>पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः॥ |
| | **स्वप्नवासवदत्तम्**[३] |
| | विश्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्यया<br>वृक्षाः पुष्पफलैः समृद्धिविभवाः सर्वे दयारक्षिताः।<br>भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो<br>निःसन्दिग्धमिदं तपोवनमयं धूमो हि वह्न्याश्रयः॥ |
| | **अभिज्ञानशकुन्तलम्** |
| | नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरुणामधः<br>प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।<br>विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-<br>स्तोयाधारपथाश्च वल्कलशिखानिस्यन्दरेखाङ्किताः॥[४] |

सारणी ४.४ : सादृश्यम् (परशु.च. इत्यनेन सह रघु., स्वप्न., अभि.श. चेत्येतेषाम्)

पुनः हैहयेन यज्ञमण्डपे रेणुकया सह जमदग्नेर्दर्शनवर्णनं रघुवंशे प्रथमे सर्गे दिलीपेन अरुन्धत्या सह वशिष्ठदर्शनस्य वर्णनमेव पाठकान् स्मारयति ।

---

[१] रघु.(पाण्डुरङ्ग.) १/५२, ५३. पृष्ठे १७, १८ च

[२] परशु.च.(प्र. सं.) ४/२०, २१. पृष्ठे ३२

[३] स्वप्न.(गणपति.) १/१२. पृष्ठे १०

[४] अभि.श. (हरिदास.) १/१४. पृष्ठे ३०

## हैहयविजये

अत्रत्य 'रेवाविहारः' इत्याख्येन द्वितीयेन सर्गेण शिशुपालवधे माघेनोपन्यस्तो 'जलविहारः' इत्याख्यः अष्टमः सर्ग एव स्मर्यते ; पुनः महाकाव्येऽस्मिन् नवमे सर्गे श्लोकेनैकेन माहिष्मत्यां सभामध्ये पुलस्त्यमुनेरवतरणवर्णनं शिशुपालवधे द्वारकेशसकाशे नारदावतरणमेव स्मारयति । ततःपरं हैहयपुलस्त्ययोः वार्तालापे यादृशी उक्तिपरम्परा दृश्यते तया माघोपन्यस्तं कृष्णनारदसम्भाषणमेव स्मृतिपथमायाति । परन्तु हेमचन्द्रस्य रचनायां माघसदृशं सातिशयं वागाडम्बरं नोपैति नयनपथमित्याशयो मे ।

## पाण्डवविजये

महाकाव्यस्यास्य प्रथमसर्गे दौत्यग्रहणाय श्रीकृष्णं प्रति युधिष्ठिरस्यानुरोधे तथा कुरुसभायां सभ्यान् प्रति दूतरूपमाधवस्य आचारः कीदृशो भवेदित्युपदेशे कविरत्र कालिदासकृतस्य मेघदूतस्य पूर्वमेघवृत्तान्तं मां स्मारयति; केवलं तत्रासीद् यक्षः प्रकृतिकृपणो नात्र युधिष्ठिरस्तु तादृशः प्रकृतिकृपणः पक्षान्तरे युक्तिवादी एव । पुनः द्वितीये सर्गे श्रीकृष्णेन सह पाण्डवजायायाः द्रौपद्याः कथोपकथने द्रौपदीमुखनिःसृताः दुःखव्यञ्जकतेजोविजृम्भिताः श्लोकाः किरातार्जुनीयस्य प्रथमसर्गगतान् द्रौपदीमुखनिःसृतान् श्लोकानेव स्मारयन्ति, दिङ्मात्रमुदाहरणमस्य यथा –

| पाण्डवविजये | किरातार्जुनीये |
|---|---|
| अवमानमजातशत्रुणा<br>निखिलं सोढवता विमूढवत् ।<br>सति च प्रतिकारपाटवे<br>तुलितं नाङ्गुलिमात्रमप्यहो॥ २/७॥ [१] | भवन्तमेतर्हि मनस्विगर्हिते<br>विवर्तमानं नरदेव वर्त्मनि।<br>कथं न मन्युर्ज्वलयत्युदीरितः<br>शमीतरुं शुष्कमिवाग्निरुच्छिखः॥ १/३२॥ [२] |

सारणी ४.५ : सादृश्यम् (पा.वि., किरात. चेत्यनयोः)

पाण्डवविजयस्य शब्दसौष्ठवम् अर्थगरिमा च द्वयमतीव रमणीयम्, तदुदाहरणतया तृतीयसर्गस्य हस्तिनापुरविवरणात् श्लोकोऽयम् उद्धृतः –

"स्वच्छमम्बु युवतीः श्लथाम्बरा यत्र कृत्रिमसरस्यलज्जयत् ।
साश्वरेणु गजमज्जनाकुलं तज्जलं भजति कज्जलश्रियम् ॥ ३/९॥ "[३] इति ।

---

[१] पा.वि.(द्वि.सं.) पृष्ठे १५

[२] किरात.(विद्यानिधि.) पृष्ठे ७६

[३] पा.वि.(द्वि.सं.) पृष्ठे २३

## सत्यभामापरिग्रहे

अत्रत्ये प्रथमे सर्गे आदिभूते श्लोके काव्यस्यास्य यादृशीसूचना दृश्यते तया किरातार्जुनीयस्य प्रथमः श्लोक एव स्मर्यते, पुनः हेमचन्द्रप्रणीतस्य श्लोकस्यास्य पूर्वार्धे पदविन्यासपरम्परा शिशुपालवधस्य प्रथमश्लोकस्य पूर्वार्धमपि स्मारयति –

<table>
<tr><th>सत्यभामापरिग्रहम्</th><th>किरातार्जुनीयम्</th></tr>
<tr><td rowspan="3">श्रियस्पतिर्द्वारवतीमधिश्री-<br>रधिष्ठितोऽनुष्ठितराजवृत्तः।<br>यशोधनः पौरवचःप्रवृत्तिं<br>चारं स्वचारित्रगतामापृच्छत्॥१/१॥[1]</td><td>श्रियष्कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।<br>स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः॥१/१॥[2]</td></tr>
<tr><th>शिशुपालवधम्</th></tr>
<tr><td>श्रियस्पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।॥१/१॥[3]</td></tr>
</table>

सारणी ४.६ : सादृश्यम् (सत्य.प. इत्यनेन सह किरात., शिशु.व. चेत्यनयोः)

पुनः सर्गस्यास्य द्वितीये श्लोके चारवचनस्य सूचना अस्मान् किरातार्जुनीये प्रथमे सर्गगते द्वितीये श्लोके एव सन्निवेशितां वनेचरवचनस्य सूचनामेव स्मारयति –

| सत्यभामापरिग्रहम् | किरातार्जुनीयम् |
|---|---|
| कृतप्रणामः प्रभवे विधिज्ञः<br>प्रियं स साधुः प्रथमं निवेद्य।<br>तथ्यं क्रमादप्रियमप्यशंसद्<br>यथावदाख्यानपरो हि चारः॥१/२॥[4] | कृतप्रणामस्य महीं महीभुजे<br>जितां सपत्नेन निवेदयिष्यतः।<br>न विव्यथे तस्य मनो न हि प्रियं<br>प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥१/२॥[5] |

सारणी ४.७ : सादृश्यम् (सत्य.प., किरात. चेत्यनयोः)

पुनः अत्रत्ये चारवचने अन्तिमोक्तौ किरातार्जुनीयगतायाः वनेचरोक्तेः छाया एव दृश्यते –

---

[1] सत्य.प.(द्वि.सं.) पृष्ठे ५

[2] किरात.(भट्टाचार्य्य.) पृष्ठे ३, ४ च

[3] शिशु.व.(दुर्गाप्रसाद., शिवदत्त.) पृष्ठे २

[4] सत्य.प.(द्वि.सं.) पृष्ठे ५

[5] किरात.(भट्टाचार्य्य.) पृष्ठे ५, ६ च

| सत्यभामापरिग्रहम् | किरातार्ज्जुनीयम् |
|---|---|
| कार्य्योपदेशस्त्वयि यादवेन्द्र<br>न युज्यते यद्यपि मद्विधानाम् ।<br>तथापि ते नाथ यशोविताने<br>मालीन्यमादर्श इवानभीष्टम्॥ १/२१॥ [1] | तदाशु कर्तुं त्वयि जिह्ममुद्यते<br>विधीयतां तत्र विधेयमुत्तरम्।<br>परप्रणीतानि वचांसि चिन्वतां<br>प्रवृत्तिसाराः खलु मादृशां गिरः॥ १/२५॥ [2] |

सारणी ४.८ : सादृश्यम् (सत्य.प., किरात. चेत्यनयोः)

प्रसङ्गत उल्लेख्यं यत्, सत्यभामापरिग्रहस्य प्रथमसर्गस्यास्य चारवचनस्य आकृतिं दृष्ट्वापि किरातार्ज्जुनीयस्य वनेचरवचनमेव स्मर्य्यते यतः सत्यभामायां चारवचने सन्ति ऊनविंशतिः श्लोकाः, किराते वनेचरवचने सन्ति द्वाविंशतिः श्लोकाः।

अथ सत्यभामापरिग्रहे द्वितीये सर्गे राजपथि माधवेन सह सत्यभामायाः क्षणभूतात् साक्षात्कारादनन्तरं श्रीकृष्णस्य द्वारिकात्यागदर्शने सत्यभामायाः मानसिकावस्थायाः या वर्णना दृश्यते तया शाकुन्तले प्रथमाङ्कान्ते गमनोद्यतस्य दुष्यन्तस्य उक्तेर्भाव एव स्मृतपथमायाति मे –

| सत्यभामापरिग्रहम् | अभिज्ञानशकुन्तलम् |
|---|---|
| आदृष्टिपथमालोक्य सत्यभामाथ वल्लभम्।<br>मनसा चानुगच्छन्ती देहेनाववृते गृहम्॥ २/१८॥ [3] | गच्छति पुरः शरीरं पश्चादसंस्थितं चेतः।<br>चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥ १/३१॥ [4] |

सारणी ४.९ : सादृश्यम् (सत्य.प., अभि.श. चेत्यनयोः)

एवमेव समाप्यते अयमंशः ।

---


[1] सत्य.प.(द्वि.सं.) पृष्ठे ९

[2] किरात.(भट्टाचार्य्य.) पृष्ठे २५

[3] सत्य.प.(द्वि.सं.) पृष्ठे १३

[4] अभि.श.(हरिदास.) पृष्ठे १०३

## ४.३. तृतीयो भागः : समकालिकैः पण्डितवर्यैः विहिता हेमचन्द्रस्य काव्यकृतेः समालोचना




चित्रम् ४.१ : कार्ल् स्किमथ् महोदयस्य उक्तिः[१]

- इति कार्ल् स्किमथ् महोदयस्य उक्तिरियं कविनां कृतेऽपि प्रयुज्यते । यतः कस्यचन कवेः कविकृतिः कीदृशी सा तु तस्य समालोचकेभ्य एव सम्यग् ज्ञायते, पक्षपाताभावत्वात् । अतः कवेरस्य हेमचन्द्ररायस्य कारयित्री प्रतिभा कीदृशी आसीदिति सम्यग्रूपेण उपस्थापनप्रसङ्गे तस्य समालोचकैः विहितेषु समालोचनेषु कतिपयानि समालोचनानि अत्रत्ये अंशे उपस्थापितानि ।

कवेरस्य हेमचन्द्ररायकविभूषणस्य काव्यकृतिः तत्कालीने विद्वत्संसदि सादरेणैव गृहीता अभूदिति मे आशयः। यतः बहुषु सर्वभारतीयपत्रिकासु, पण्डितैः प्रेरितेषु पत्रेषु तद्रचितानां काव्यानां सप्रशंसम् अभिमतमेव दृश्यते, यत् तेनैव उद्धृतं स्वकीयकाव्यग्रन्थानाम् अन्तिमे ।

प्रसङ्गत उल्लेख्यं यत् प्रायः अधिकांशेषु पत्रेषु ग्रन्थप्राप्तेः स्वीकारोक्तिः, ग्रन्थपठनादनन्तरम् आनन्दप्राप्तेः कथनम्, कविं हेमचन्द्रं प्रति आशिर्वादप्रदानम्, कवेः कृते दीर्घायोः प्रार्थना, शुभाशंसा इत्यादयो विषया एव प्राधान्येन प्राप्यन्ते । परन्तु हेमचन्द्रस्य काव्यानां समीक्षणं तथा तस्य रचनशैलीविषये आलोचनं तु दृश्यते केवलं कतिपयेषु पत्रेषु। अतः अधः प्रत्येकस्य काव्यस्य समालेचकानां नामानि सन्निविश्य केवलं येषां समालोचकानां समीक्षणान्वितं समालोचनं प्राप्यते तेषां सामालोचनान्येव उद्धृतानि । यथा -

(क) परशुरामचरितमिति महाकाव्यविषये श्रीयुक्तो गुरुदासवन्द्योपाध्यायः, सारदाचरणमित्रमहोदयः, बोलपुरस्थितस्य ब्रह्मविद्यालयस्य अध्यापकः श्रीयुक्तो विधुशेखरशास्त्री च प्रमुखैः पण्डितैः अनुकूलाभिमतानि

[१] https://www.azquotes.com/author/17743-Carl_Schimtt, Schmitt, Carl. *"Theory of the Partisan: Intermediate Commentary on the Concept of the Political"*. Candor (New York): Telos Press Publishing, 2007, page 85.

अभिव्यक्तानि तदीयेषु प्रेरितपत्रेषु ।[१] तेषु गुरुदासमहाभागस्याभिमतमनुसन्धेयम् - "Your lines are generally mellifluous, and some of them are truly poetical."[२]

(ख) संस्कृतकलेज् इति महाविद्यालयस्याध्यापकः प्रमथनाथतर्कभूषणः, रङ्गपुरस्य पण्डितो मम.यादवेश्वरतर्करत्नः, वोलपुरब्रह्मविद्यालयस्याध्यापकः विधुशेखरशास्त्री, कलिकाता सिटिकलेज् इति महाविद्यालयस्य संस्कृताध्यापक उपेन्द्रनाथरायविद्याभूषणः च 'हैहयविजयमि'ति काव्यस्य समीक्षणं चक्रुः तदीयपत्रेषु ।[३]

तत्र केवलं यादवेश्वरतर्करत्नस्य तथा उपेन्द्रनाथरायस्य समालोचने एव हेमचन्द्रस्य रचनशैल्याः गभीरं समीक्षणं दृश्यते । तयोः समीक्षणाद् हेमचन्द्रस्य रचनासु भाषागतं सारल्यम् ; संस्कृतेन मनोभावप्रकाशे सामर्थ्यम् ; रचनासु गीतिमयत्वं, सावलीलत्वम्, शब्दप्रयोगौचित्यं तथा ख्यातैर्कविप्रवरैः रचनैः सह तस्य रचनायाः समकक्षत्वमित्यदयो विषयाः अवगम्यन्ते । अतः पण्डितद्वयस्यास्य अभिमतद्वयमत्र उद्धियते, यथा -

मम. यादवेश्वरतर्करत्नः -

"हैहय-विजय् पाइयाछि । आपनार् पुस्तक् सुन्दर् हइयाछे । आपनार् संस्कृते लिखिवार् शक्ति आछे, - संस्कृते मनोभाव् व्यक्त करिवार् आपनार् विलक्षण् अधिकार् आछे । एक्षणे याँहारा वाङ्गाला भाषाय् कविता लिखिया थाकेन्, दुःखेर् विषय् ताँहादिगेर् मध्ये अनेकेइ वाङ्गालाय् पर्य्यन्त मनोभाव् व्यक्त करिते पारेन् ना, आपनि एइ दोषेर् हस्त हइते सर्व्वतोभावे उन्मुक्त ।"[४]

उपेन्द्रनाथरायविद्याभूषणः -

"Dear Sir,

With great pleasure I read your poem, Haihaya Vijaya. You are really a gem of our University. The poem evinces your wonderful command over the Sanskrit language in the composition of verses in all the intricate metres. Your style is elegant, flowing & melodious, & your diction is lucid & natural. Some of the stanzas in the poem are genuine, inspired effusions and can favourably compare with those of the master-poets of antiquity."[५]

---

[१] रुक्मिणी.ह.(प्र.सं.) पृष्ठे ७३

[२] तत्रैव.

[३] तत्रैव. पृष्ठे ७४, ७५ च

[४] तत्रैव. पृष्ठे ७४

[५] तत्रैव. पृष्ठे ७५

(ग) 'रुक्मिणीहरणम्'इति महाकाव्यस्य विषये मम.प्रमथनाथतर्कभूषणः, मम.पञ्चाननतर्करत्नः, ढाकामहाविद्यालयस्य अध्यापको विधुभूषणगोस्वामीमहोदयः, कविराजोपाधिना भूषितो गणनाथसेनविद्यासागरसरस्वती (एम्.ए, एल्.एम्.एस्) प्रमुखैः विहितानि समालोचनानि उल्लिखितानि महाकविनामुना ।[१]

पुनः मम. दुर्गाचरणसांख्यवेदान्ततीर्थः, काशीनिवासी पण्डितताराचरणसाहित्योपाध्यायः, कलिकाता संस्कृतमहाविद्यालयस्य भूतपूर्वाध्यापको वनमालिवेदान्ततीर्थः, मम. ड. गङ्गानाथझा (उपाचार्यः, इलाहावाद्-विश्वविद्यालयः), काशी-हिन्दुविश्वविद्यालयाध्यापकः पण्डितो वटुकनाथशर्मासाहित्योपाध्यायः (M. R. A. S.) प्रमुखानामभिमतान्यप्युल्लिखितानि महाकविनामुना ।[२] तत्रतः अभिमतमेकमुद्धृतमस्ति, यथा-

वटुकनाथशर्मासाहित्योपाध्यायस्य पत्रम् -

"Kindly allow me to thank you most heartily for remembering me again and sending me your beautiful रुक्मिणीहरणम्. Seeing you treading the वैदर्भमार्गः with such an innate facility I do realise once again that poet a nascitur non fit."[३]

(घ) सत्यभामापरिग्रहमिति काव्यग्रन्थस्य 'समालोचना' इति अंशानुसारेण महामान्यस्य उच्चविचारालयस्य भूतपूर्वविचारपतिः सुपण्डितः स्यार् गुरुदासवन्द्योपाद्यायः (के.टि, एम्.ए, डि.एल्, पि एइच्.डि), 'कलिकातासिटिकलेज्' इति महाविद्यालयस्य संस्कृताध्यापकः उपेन्द्रनाथरायः (एम्.ए, विद्याभूषणः), काशीधामस्य पण्डितः अन्नदाचरणतर्कचूडामणिः, नवद्वीपधामनिवासी पूज्यपादपण्डितः अजितनाथन्यायरत्नः, 'कलिकातासंस्कृतकलेज्' इति महाविद्यालयस्य अध्यापको राजेन्द्रनाथविद्याभूषणः, 'कलिकातामेट्रोपलिटानिस्टिटिउशन्' इत्यस्य अध्यक्षः पण्डितः श्रीयुक्तः सारदारञ्जनरायविद्याविनोदः, पण्डितो गणनाथसेनः, श्रीफणिभूषणतर्कवागीशश्च प्रशंसापत्रयोगेन सुभद्राहरणमिति काव्यस्य सप्रशंसं समालोचनं चकार । एतद्व्यतीत्य यशोहरस्य सुप्रसिद्धहिन्दुपत्रिकायाः १३२० वङ्गाब्दस्य ज्यैष्ठसंख्यायाम्, जगत्पुरस्य 'आर्यप्रभा' इति संस्कृतपत्रिकायाः चतुर्थवर्षस्य ६ष्ठसंख्यायाम्, भट्टपल्ल्याः 'विद्योदयः' इति संस्कृतपत्रिकायाः १३१९ वङ्गाब्दस्य माघसंख्यातः आरभ्य चैत्रसंख्यां यावत् **सुभद्राहरणकाव्यविषये**

---

[१] रुक्मिणी.ह.(द्वि.सं.) पृष्ठेषु १०९ - १११

[२] सत्य.प.(द्वि.सं.) पृष्ठेषु ii-v

[३] तत्रैव. पृष्ठे iv

अनुकूलसमालोचनमेव प्रकाशितम् अभूत्।[१] एतेषु केवलं फणिभूषणतर्कवागीशकृतस्य समालोचनस्य अंशविशेषम् उदाहरणतया उद्ध्रियते –

"कविभूषण् 'रुक्मिणीहरणेर्' परे एवार् सुभद्राहरणे अनेक् नूतनभावेर् कृतित्व देखाइयाछेन्।...। एखन्कार् नवीन्-रुचि नवीन् कविगण् काव्यरचनाय् प्रायइ प्राचीन् महाकविदिगेर् आदर्श धरिते चान् ना । किन्तु याँहारा प्राचीनेर् भाव् प्राचीनेर् रीति, प्राचीनेर् रुचि नवीने देखिते चान् – नवीनेओ प्राचीनत्व देखिया विस्मित ओ मुग्ध हइते चान् – ताँहारा एइ काव्य पाठ् करिले सफलकाम् हइवेन्, इहा आमार् स्थिर् विश्वास् । परन्तु याँहारा प्राचीन् संस्कृतकाव्यकाननेर् सौन्दर्य्य देखिते उत्कन्ठित, किन्तु ऐ महाकाननेर् दुर्गमतावशतः एकटु अग्रसर् हइयाइ फिरिया आसेन्, ताँहारा एइ नवसर्ग नवीन्-काव्योद्याने सरल्पथे निर्भये प्रवेश् करुन्, सहजेइ आशा मिटिवे । इहाते 'मधुर्ध्वनि' शुनिते पाइवेन्, अलङ्कारे 'हेमचन्द्रेर्' पूर्णप्रभा देखिते पाइवेन् । आमि साहस् करिया वलिते पारि आमार् न्याय् दोषान्वेषी व्यक्तिओ ये काव्येर् 'गुणे' मुग्ध हइयाछे, गुणग्राही सूधीसमाज् ताहार् गुणे बद्ध हइया पडिवेन् ।"[२]

(ङ) 'सत्यभामापरिग्रहम्' इति खण्डकाव्यस्योपरि मम. प्रमथनाथतर्कभूषणः, काशीनिवासी अन्नदाचरणतर्कचूडामणिः, वोलपुरावस्थितो विधुशेखरशास्त्री, कविराजोपाधिभूषितो मम. गणनाथसेनसरस्वती, भवानीपुर-भागवतचतुष्पाठ्याः पण्डितो मम. दुर्गाचरणसांख्यवेदान्ततीर्थः प्रमुखैः प्रेरितानि अभिमतानि उद्धृतानि कविना हेमचन्द्रेण ।[३]

एषु केवलं प्रमथनाथ-विधुशेखर-दुर्गाचरणादीनां पण्डितत्रयाणाम् अभिमतादेवावगम्यन्ते महाकवेर्हेमचन्द्रस्य रचनायाः विवर्तनम्, परिपक्कत्वप्राप्तिः, सज्जनानां हृदयाह्लादजनकत्वं तथा रचनासु शब्दसौष्ठवेन सह भावगाम्भीर्य्यस्य युगपदवस्थानं चेत्यादयो विषयाः । अतः पण्डितत्रयस्याभिमतम् अधस्तादुद्धृतमस्ति, यथा -

मम. प्रमथनाथतर्कभूषणः -

"प्रिय हेमचन्द्र !

तोमार् नवरचित खण्डकाव्य 'सत्यभामापरिग्रह' समग्र पाठ् करिया परम् परितोष् लाभ् करिलाम्। वर्त्तमान् समये एरूप् सरल्, सुविशुद्ध ओ सुललीत संस्कृतकाव्य लेखा वड़ सामान्य कृतित्वेर् परिचायक्

---

[१] सत्य.प.(प्र.सं.) पृष्ठेषु ३२ - ३६

[२] तत्रैव. तेषु पृष्ठेषु

[३] पा.वि.(प्र.सं.) पृष्ठेषु १०१ - १०२, सत्य.प.(द्वि.सं.) पृष्ठेषु i - v

नहे । तोमार् हैहयविजय्, रुक्मिणीहरण् ओ सुभद्राहरण् काव्यनिर्माणे ये कवित्वशक्तिर् परिचय् पाइयाछि, सत्यभामापरिग्रह ताहार्-इ सुपरिणतिर् साक्ष्यप्रदान् करितेछे ।..”[१]

विधुशेखरशास्त्री –

“सादरं निरवशेषमेव संस्वादिता तव कवे कृतिर्नवा ।
स्पर्धिनी सततमेव सज्जनाराधने स्फुरति ते सरस्वती॥”[२]

मम. दुर्गाचरणसांख्यवेदान्ततीर्थः –

“आपनार् लिखनप्रणाली अतुलनीय । एरूप् शब्दशौष्ठव् ओ भावगाम्भीर्य्य संरक्षणपूर्व्वक् काव्य रचना करा अनेकेर् भाग्येइ घटे ना ।”[३]

(च) काञ्चीति नगर्याः प्रकाशितायां प्रतिवादिभयङ्करपण्डितप्रवरेण सम्पादितायां ‘मञ्जुभाषिणी’ति पत्रिकायाम् (भल्.१८,नम्.१३), भट्टपल्ल्याः प्रकाशितायां विद्योदयपत्रे (१३२३, माघाच्चैत्रसङ्ख्यापर्यन्तम्), अर्च्चनापत्रिकायाम् (१३२४, श्रावणसंख्या) च दृश्यते पाण्डवविजयमिति महाकाव्यस्य प्रथमसंस्करणस्य समालोचना ।[४]

पुनः सत्यभामापरिग्रहे तथा रुक्मिणीहरणे द्वितीये संस्करणे अन्तिमे पाण्डवविजयप्रसङ्गे कलिकाता-संस्कृतमहाविद्यालयाध्यापको नारायणचन्द्रस्मृतितीर्थः, वनमालिवेदान्ततीर्थः; वेलुडमठस्य दर्शनाध्यापको मम. रामकृष्णतर्कतीर्थः; ताराचरणसाहित्योपाध्यायः; मम. गणनाथसेनसरस्वती तथा कलिकाता-सिटिकलेज् इत्यस्य संस्कृताध्यापक उपेन्द्रनाथरायविद्याभूषणः प्रमुखैर्महाभागैः प्रेरितानि पत्राण्युल्लिखितानि महाकविनामुना ।[५]

एतेषु अर्च्चनापत्रिकायां काशी-हिन्दुविश्वविद्यालयाध्यापको हरिहरशास्त्रिणोऽभिमतं तथा नारायणचन्द्रस्य, उपेन्द्रनाथरायस्य च अभिमतान्येव अनुसन्धेयानि सुचिन्तितसमीक्षणान्वितत्वादिति । एषां समीक्षणे हेमचन्द्रस्य रचनासु इतिवृत्तकथननैपुण्यम्, तस्य काव्यगुणैः प्रथितयशसां भारव्यादीनां कवीनां स्मारणम्, तस्य रचनशैल्यां रसगुणभावानां सम्यगभिव्यक्तिवशाद् हृदयाह्लादजनकत्वं प्राणस्पर्शीत्वं चेत्यादीनां विषयानामालोचनमेव अस्माकं नयनपथमुपैति । अतोऽत्रैव उद्धृतानि तेषामभिमतानि, यथा –

---

[१] सत्य.प.(द्वि.सं.) पृष्ठे i

[२] तत्रैव. पृष्ठे ii

[३] तत्रैव. तत्पृष्ठे

[४] पा.वि.(द्वि.सं.) पृष्ठेषु ११५-१२०

[५] सत्य.प.(द्वि.सं.) पृष्ठेषु ii – v, रुक्मिणी.ह.(द्वि.सं.) पृष्ठेषु ११० – १११

हरिहरशास्त्रिणोऽभिमतम् -

"अल्पदिन् हइल ईँहार् रचित 'पाण्डवविजय्' नामक् महाकाव्य प्रकाशित हइयाछे। आमरा एइ काव्य पाठ् करिया कविर् रचनासौन्दर्य्यै मुग्ध हइयाछि। कुरुक्षेत्रमहायुद्धेर् आंशिक् इतिवृत्त अति निपुणतार् सहित संक्षेपे एइ काव्ये वर्णित हइयाछे। एइ काव्य पाठ् करिवार् समये महाकवि भारविर् रचनाशैली स्मृतिपथे आरुढ हय्, इहा नवीन् कविर् सामान्य कृतित्वेर् परिचय् नहे। द्वितीये सर्गे द्रौपदीर् उक्ति...देखिले 'भारवि'र् प्रथम् सर्गेर् द्रौपदीर् उक्ति मने पडिया याय्। शब्दसौष्ठवे ओ अर्थसम्पदे एइ पाण्डवविजय् काव्य सहृदयगणेर् चित्त सत्यइ आकृष्ट करिया तुले।......। एइ नवीन् कवि हेमचन्द्र येरूप् समादर् पाइवार् योग्य, देशे एखनओ तिनि ततदूर् समादर् पान् नाइ। एकजन् प्राचीन् कवि सत्यइ आक्षेप् करिया वलियाछेन् - 'गुणिनो बहवः सन्ति गुणग्राही तु दुल्लर्भः।' वाङ्गालाय् धनवानेर् अभाव् नाइ। आमरा अचिरे कि एइ प्रतिभाशाली कविर यथोचित समादर् देखिते पाइव ना ? कलिकातार् संस्कृतपरीक्षासमिति, यदि एइ 'पाण्डवविजय्' काव्य 'काव्यतीर्थ' परीक्षाय् पाठ्यरूपे निर्व्वाचित करेन्, ताहा हइले एइ उदीयमान् कवि यथेष्ट उत्साह पाइवेन् एवं उत्तरोत्तर् नूतन् नूतन् सुन्दर् संस्कृत काव्य रचना करिया गीर्व्वाणवाणीर् समृद्धिसाधन करिते पारिवेन्।....."[१]

नारायणचन्द्रस्याभिमतम् -

"आपनार् लिखित 'पाण्डवविजयम्' नामक् ग्रन्थखानि पाइया उहा समग्र पाठे परितृप्त हइलाम्। आपनाते कविभूषण् उपाधिइ भूषित हइयाछे।..."[२]

उपेन्द्रनाथरायविद्याभूषणस्याभिमतम् -

"पाण्डवविजय् द्वितीयसंस्करण् पडिते आरम्भ करियाछि। भवदीय मङ्गलाचरण् ओ कविकृत आत्मनिवेदन् पड़िया मुग्ध हइया गिया आमादेर् अनार् श्रेणीर् छात्रदेर् मुखस्थ कराइया दिलाम्। प्रथम् ओ द्वितीयसर्ग पाठेइ आपनि कीदृश प्राण् ढालिया काव्यखानि रचना करियाछेन्, ताहा पाठकमात्रेरइ हृदयङ्गम् हइया याय्। रस्, गुण् ओ भावेर् पूर्णविवृति सर्वत्र विद्यमान्। भाषार् लालित्ये काव्यखानि संस्कृतानुरागी व्यक्ति मात्रेरइ ये प्राणस्पर्शी इहाते अणुमात्र सन्देह नाइ।..."[३]

एवमेव अस्मिन् अंशे कविभूषणस्यास्य हेमचन्द्रस्य आसीत् कीदृशी कारयित्री प्रतिभा सैव प्रकटिता समकालिकैः पण्डितवर्यैः वचनैः।

---

[१] पा.वि.(द्वि.सं.) पृष्ठेषु ११५ - ११६

[२] सत्य.प.(द्वि.सं.) पृष्ठेषु ii- v

[३] रुक्मिणी.ह.(द्वि.सं.) पृष्ठे ११० - १११

## ४.४. चतुर्थो भागः : ऐतिह्य-आधुनिकतयोः समन्वयः

कविभूषणस्य हेमचन्द्रस्य काव्यकृतयः विंशशताब्द्याम् आपतन्ति, अतः तस्य काव्यकृतिषु सुप्राचीनैतिह्येन सह आधुनिकतायाः समन्वयस्य प्रसङ्गोऽपि आयाति स्वाभाविकतयैव । अनेनैव कारणेन जागर्ति खलु कश्चित्प्रश्नो यत्किमिदं आधुनिकत्वम् नाम ? प्रसङ्गेऽस्मिन् विश्वकविना रवीन्द्रनाथठाकुरेण 'आधुनिक् काव्य' इति प्रबन्धे 'साहित्येर् पथे' इत्यंशे समभ्यधायि – "नदी सामनेर् दिके सोजा चल्ते चल्ते हठात् वाँक् फेरे । साहित्यओ तेमनि वरावर् सिधे पथे चले ना । यखन् से वाँक् नेय् तखन् सेइ वाँक्टाकेइ बल्ते हबे मडार्न् । बांलाय् बला याय् आधुनिक् ।"[1] अर्थात्, स्रोतस्विनी यथा क्वचित् सहसा गतिं वक्रयति, तथैव साहित्यमपि काले काले दिशं परिवर्तते । सैव वक्रता (दिक्परिवर्तनम्) ह्याधुनिकी (तत्कालोचिता) मन्यते । वस्तुतः स्रोतस्विनीव साहित्यसुधाधारापि अविच्छिन्नत्वेन विज्ञानप्रयुक्तिपरिस्फुर्तिक-मनुजसभ्यतायाः तथा मानविकबोधस्य अपक्षयात् स्खलद्गतिसमाजस्य च विवर्तनेन समं गतिविपर्यासान्विता सन् आधुनिकतामेति । तथाहि शेलि-कीट्स-रवीन्द्रनाथ-मधुसूदनादिभिः कविभिस्तदीये काले यथार्वाचीनत्वमितं तथैव कालिदासोऽपि स्वके युगे आसीदाधुनिक इति । एतेन आधुनिकतायास्तत्त्वमिदं नितरामेवापेक्षिकत्वं निश्चिनोतीत्येवाशयः । एतेन प्रतीयते यद्, आधुनिकताया एषा धारणा निसर्गत एव गतिमती । एवं सदा गतिमती प्रत्नमार्गत्यागिनी सा साहित्यधारा पौनःपुन्येन नवीनं नवीनं मार्गमाश्रयते, स्वीक्रियते च रम्यत्वमिति । अत आधुनिकसंस्कृतसाहित्ये स्थितानां विरचनानामाधुनिकत्वं तु स्पष्टमेव । अतो वक्तुं शक्यते यदाधुनिकत्वमिदं न कालगतमपि त्ववश्यमेव मनोभावगतमिति । आधुनिकतायाः बहुन्येव लक्षणानि बहुभिर्पण्डितवर्यैः निर्देशितानि, तेषु ड. राधावल्लभत्रिपाठिना आधुनिकताया निम्नोक्तानि प्रेरकतत्त्वान्यङ्गीकृतानि[2] -

१. राजनैतिकी पार्श्वभूमिः,
२. राष्ट्रवादित्वम्,
३. गान्धिवादस्य प्रभावः,
४. नवचेतना,
५. विषयनावीन्यम्,
६. समकालिकता,
७. व्यङ्ग्यप्रधानाभिव्यक्तिः,
८. सामाजिकी चेतना,
९. यथार्थबोधः,
१०. राष्ट्रवादस्य सातत्यम्,

---

[1] रवि. रचना., 'आधुनिक काव्य', पृष्ठानि ४९७ - ४९८

[2] संस्कृतसाहित्य : बीसवीं शताब्दी, पृष्ठानि ९-७५

११. नूत्नविधत्वम् अभिनवत्वं वेति,

१२. परम्पराधुनिकतयोः सहावस्थानम्,

१३. व्यक्तिवादस्योदयः,

१४. परम्पराधुनिकतयोर्द्वन्द्वम्,

१५. नवार्थसन्धानञ्चेति ।

एतेषु 'विषयनावीन्यम्', 'सामाजिकी चेतना' चेति वैशिष्ट्यद्वयं हेमचन्द्रस्य काव्यकृतिषु दृश्यते । एतद्व्यतीत्य 'शृङ्गारितभावनायाः ह्रासः', 'विप्रतीकस्य नायकस्य अर्थात् प्रतिनायकस्य प्रावल्येन चित्रणम्', 'नैराश्यस्य चित्रणम्', 'नवीनविषयानां सर्जनं संयोजनं वा', 'प्रयोगधर्मिता' चेतीत्यादीनि वैशिष्ट्यान्यपि[1] नयनपथमुपयन्ति आलोच्यभूतेषु तदीयेषु काव्यकृतिषु । एतान्येवावलम्ब्य अधुना हेमचन्द्रस्य काव्येषु ऐतिह्येन सह आधुनिकतायाः समन्वयस्तु अधस्तात्प्रतिपद्यते –

कवेरस्य काव्यकृतिषु केवलं पतिदानव्रतं व्यतिरिच्य प्रायः महाकाव्येषु, खण्डकाव्येषु च कुत्रापि शृङ्गारस्तु अङ्गित्वेन न प्रकटितः, दृश्यते तु अङ्गरसरूपेणैव । अपि तु, कस्मिन्चन काव्ये स्त्रीचरित्रे उपस्थापिते अपि शृङ्गारस्य लेशो न दृश्यते, यथा – पाण्डवविजये नायिका खलु 'द्रौपदी', तया सह नवोद्वाहा अभिमन्युभार्या 'उत्तरा'पि चित्रिता ; इमे चरित्रयुगले अस्ति केवलं करुणस्याभिव्यक्तिः, न तु शृङ्गारस्य । शृङ्गारस्तु मुख्याङ्गरसरूपेणापि न दृश्यते, तस्योपस्थितिः मूलतो गौणभूते सम्भोगशृङ्गारस्य वर्णने एव दृश्यते, यथा – परशुरामचरिते गन्धर्वराजस्य जलकेलिवर्णने, हैहयविजये बधूसहस्रेण सह सहस्रबाहोः जलक्रीडावर्णने । न केवलमेतद्, हैहयविजये जलकेलिवर्णनं विहाय समग्रे महाकाव्ये नास्ति कमपि मुख्यभूतं नारीचरित्रमपीति । केवलं खण्डकाव्यभूते सत्यभामापरिग्रहे मुख्याङ्गरसत्वमेति शृङ्गारः, अपि तु काव्येस्मिन् मुख्यगौणत्वेनोपलभ्यते नायिकात्रयम् – 'सत्यभामा', 'रुक्मिणी', 'जाम्बवती' चेति ; तासु परोक्षत्वेन प्रत्यक्षत्वेन च शृङ्गारस्य अवस्थितिः दृश्यते । पूर्वालोचितेषु हेमचन्द्रस्य काव्येषु 'दशावतारस्तोत्रम्', 'पतिदानव्रतमि'ति काव्यद्वयं विहाय शेषेषु काव्येषु प्रतिनायकचरित्राणां वर्णनप्रावल्यं दरीदृश्यते, यथा – दशसर्गात्मके परशुरामचरिते प्रथमसर्गाद् अष्टमसर्गं यावत् प्रतिनायकस्य कार्त्तवीर्य्यस्य चित्रणं, द्वादशसर्गात्मके पाण्डवविजये पञ्चमसर्गात् सप्तमं यावत्, पुनः दशमे एकादशे च सर्गे चित्रितमस्ति दुर्य्योधनचरित्रम्, सर्गचतुष्टयात्मके सत्यभामापरिग्रहे प्रथमे सर्गे चारवचने परोक्षतया, चतुर्थे सर्गे प्रत्यक्षतयैवोपलभ्यते प्रतिनायकस्य नायकापभाषिणः सत्राजिच्चरित्रस्य वर्णनमिति । अथ नवसर्गात्मके हैहयविजये तृतीयसर्गतः अष्टमसर्गं यावद् रावणचरित्रस्य विविधावस्थायाः सुचारुचित्रणमेव काव्यपाठकान् नितरामेवाह्लादयतीति । प्रसङ्गतः उल्लेख्यं यद्, हैहयविजये चित्रितं मुख्यं चरित्रद्वयमेव रामायण-महाभारत-पुराणादिषु अधर्माचारिरूपेण प्रतिनायकरूपेण च परिचीयते जनमानसे । एतेन महाकाव्यमिदं हैहयविजयं

---

[1] भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गमदृष्ट्या परिशीलनम्, प्रथमोऽध्यायः, पृष्ठे ७

प्रतिनायकमूलकेन महाकाव्यरूपेण प्रतिभाति मच्छकाशे, यतः अत्र प्रसिद्धभूतः प्रतिनायको रावणो यथा प्रतिनायकत्वेन चित्रितः तथैव प्रतिनायकरूपेण प्रसिद्धः कार्त्तवीर्य्यार्ज्जुनस्तु नायकत्वेनैव चित्रितो जातः ।

अथ आयाति नैराश्यस्य चित्रणम् ; अस्योदाहरणं दृश्यते पाण्डवविजये प्रथमे सर्गे श्रीकृष्णं प्रति युधिष्ठिरोक्तिषु तथा अर्ज्जुनोक्तिषु, एकादशे सर्गे दुर्य्योधनस्य विलापे च । हेमचन्द्रस्य काव्यानि रामायण-महाभारत-पुराणात्मकानि परन्तु, तत्र तेषां वृत्तान्तविन्यासे दृश्यन्ते कविना सन्निवेशितानि नूतनानि संयोजनानि । येन तेषु काव्यकृतिषु नवीनविषयानां सर्जनरूपं वैशिष्ट्यमेवास्माकं नयनपथमुपैति । हेमचन्द्रप्रणीते पतिदानव्रते पुण्यकव्रतस्य आख्यानमेव उपजीव्यत्वेन स्वीकृतमस्ति, आख्यानमिदं केवलमुपलभ्यते वङ्गभूमेः प्रख्यातपाँचालीकारस्य दाशरथिरायस्य "सत्यभामार व्रत पाँचाली" इति रचनायाम् । आख्यानमिदं यथा संस्कृतसाहित्ये अनुरूपेणैव प्रकारेण कुत्रापि सन्निवेशितं न दृश्यते कविना, तथैव वङ्गभूमौ वङ्गीये साहित्ये प्रचलितमिदमाख्यानमवलम्ब्य संस्कृतसाहित्ये स्वतन्त्रं काव्यमपि नोपलभ्यते हेमचन्द्रस्य पतिदानव्रतं व्यतिरिच्य । अतः स्पष्टमेव विषयनावीन्यमिति वैशिष्ट्यमस्मिन् पतिदानव्रतमिति काव्ये ।

हेमचन्द्रस्य काव्यकृतिषु पाण्डवविजये द्वितीये सर्गे माधवेन सह द्रौपद्याः कथोपकथने, द्वादशे सर्गे पुत्रहन्तारमश्वत्थामानं दृष्ट्वा तस्या आचरणे ; परशुरामचरिते गृहागतं परशुरामं प्रति मातुः रेणुकायाः उक्तिषु, तथा परशुरामेण सह पुनर्युद्धस्यारम्भे महिष्या सह कार्त्तवीर्य्यस्य वार्तालापे इत्यादिषु स्थलेषु नारीणां मुखरताया वर्णने तथा अर्ज्जुनेन विचाराय अश्वत्थामानं द्रौपद्याः सकाशे आनयने कवेः नारीणां स्वतन्त्रता तथा सशक्तिकरणरूपा नूतना सामाजिकी चेतना परोक्षत्वेनैव प्रकाशितेति ।

एतद्व्यतीत्य दृश्यते यद्, हेमचन्द्रेण महाकाव्यानां खण्डकाव्यानां च विरचने काले यथा आलंकारिकनियमाः अनुस्रियन्ते तथा तेषां नियमानामुल्लङ्घनमपि क्रियते । प्रसङ्गेऽस्मिन् दिङ्मात्रममुदाहरणं यथा –

(क) आलंकारिकनियमानुसारेण शृङ्गार-वीर-करुण-शान्तादिषु रसेषु एक एव अङ्गित्वेन स्वीक्रियते महाकाव्यखण्डकाव्ययोः कृते परन्तु पाण्डवविजये महाकाव्ये हेमचन्द्रेण वीरः, करुणश्चेति रसद्वयमेव अङ्गित्वेन अङ्गीक्रियते ।

(ख) पुनः महाकाव्यानां कृते छन्दोवैचित्र्यान्वितस्य सर्गस्यैकस्य विधानं दृश्यते परन्तु हेमचन्द्रकृतेषु महाकाव्येषु छन्दोवैचित्र्यान्वितानामेकाधिकानां सर्गाणां सन्निवेशनं दरीदृश्यते ।

अनेनैव प्रकारेण एतदेव वक्तुं शक्यते यद्, हेमचन्द्रस्य समग्रेषु काव्यकृतिषु परम्पराधुनिकतयोः सहावस्थानं तु सम्यग्रूपेणैव प्रतीयते मत्सकाशे इति । अतो दृश्यते यत्, सनातनानां रामायण-महाभारत-पुराणानां वृत्तानि अद्यापि कविप्रतिभया नवीनत्वमुपयन्ति सहृदयहृदयानि आह्लादयन्तीति, परम्परेयं भविष्यत्कालेऽपि द्रक्ष्यन्ति । परन्तु

तत्सत्त्वेऽपि एते सनातनवृत्तान्ताः न कदापि जीर्णत्वमुपयन्ति नव नव रसपरिग्रहादेव । अतः ध्वनिकारस्य सुविख्याता उक्तिरियं मूल्यायनत्वेन परिगृह्यते –

"दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् ।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः ॥४/४॥"[१]

एवमेवात्रैव उपसंह्रियते शोधप्रबन्धोऽयम् इति शम् ।

******************

[१] ध्वन्या.(मूर्थि) पृष्ठे २७०

# ✠ परिशिष्टम् ✠

(क) पाण्डवविजयम् [क्षितीशचन्द्रचट्टोपाध्यायकृतं समीक्षणम्] आलोकचित्रसहयोगेनैव सन्निवेशितम्

(ख) हेमचन्द्ररायप्रणीतेषु काव्येषु सुभाषितानि


# (क)

# ‘पाण्डवविजयम्’


## [क्षितीशचन्द्रचट्टोपाध्यायकृतं समीक्षणम्]

## (आलोकचित्रसहयोगेनैव सन्निवेशितम्)

हेमचन्द्ररायस्य काव्यकृतिषु सम्भवतः केवलं **‘पाण्डवविजयमि’ति** द्वादशसर्गात्मकं वीरकरुणरसप्रधानं महाकाव्यमधिकृत्यैव संस्कृतसाहित्यपरिषदो मासिके मुखपत्रे त्रयदशवर्षस्य दशम-संख्यायाम् (Vol. XIII, 1930-31) विद्यते पञ्चपृष्ठान्वितमेकं समालोचनम् ; तत्तु मुखपत्रस्यास्य सम्पादकेन श्रीक्षितीशचन्द्रचट्टोपाध्यायेनैव ग्रथितम् । अस्मिन् समीक्षणे यथा हेमचन्द्रस्य निन्दा दृश्यते तथैव प्रशंसाऽपि दृश्यते एतदेव समीक्षणस्यास्य मूलवैशिष्ट्यम् । क्षितीशचन्द्राचार्यस्य समीक्षणस्यास्य आलोकचित्राणि अधोऽधः प्रदीयन्ते प्रमाणप्रदर्शनत्वादिति –





चित्रम् परि.१ : आख्यापत्रम् (सं.सा.प.प. Vol. XIII)



१०


| निबन्धनाम | निबन्धकनाम | | पत्राङ्कम् |
|---|---|---|---|
| | [ स ] | | |
| सत्सङ्गाष्टकम् .. | श्रीहरिपद-काव्यस्मृतिमीमांसातीर्थः | ... | १२० |
| सप्रमोदमङ्गीकारः | ( सम्पादकः ) | ... | ३९ |
| समस्याहितयम् ... | ... | ... | ४०४ |
| समालोचना— | | | |
| अक्षपादगौतमः | सम्पादकः | ... | १०४ |
| अद्वैतमार्त्तण्डः | ,, | ... | २३४ |
| अभङ्गरसवाहिनी | ,, | ... | २५९ |
| चातुर्वर्ण्य शिक्षा | ,, | ... | ६९ |
| पाण्डवविजयम् | ,, | ... | २२५ |
| पिकोच्छ्वासः | श्रीउपेन्द्रमोहन-साङ्ख्यतीर्थः | ... | १०८ |
| प्रबन्धमञ्जरी | सम्पादकः | ... | ३७ |
| संस्कृतज्ञानेश्वरी | श्रीजानकीनाथ-साहित्याचार्य्यः | ... | ८३ |
| साङ्ख्यसारः | सम्पादकः | ... | ३४० |
| सर्व्वप्रत्ययमाला | श्रीशङ्कराय्यैः | | ५३-१२४-२४१-२५५ |
| सायणं प्रति मैग्डानल् | ( "उद्यानपत्रिका" ) | ... | ३१२ |
| सारस्वतोपहारपरीक्षा | श्रीउपेन्द्रमोहनसाङ्ख्यतीर्थः | ... | ३९७ |
| सिद्धानां कपिलो मुनिः | कुमारी सुरमामित्रा एम्. ए. | ... | ३०२ |


चित्रम् परि.२ : सूचीपत्रम् (सं.सा.प.प. Vol. XIII)



समालोचनम् ३३५


...णा।
मिदं पुस्तकं दर्शनवरशिकानाम्। जिज्ञासुभिः पण्डितवरं म. म.
...भाषाध्यापको Lecturer, Calcutta University इत्यत्र
...मिति शिवम्।

---

पाण्डवविजयम्—एम ए कविभूषणोपाधिना श्रीहेमचन्द्र-
...विरचितम्। पावना हेमकुटीभवनात् ("Hemkuti,"
Pabna, Bengal) ग्रन्थकारेण प्रकाशितम्। मूल्यं रूप्यकमात्रम्।
...किल: महात्मभिराङ्गलादिभाषान्तरे व्युत्पत्तिमधिगम्यापि
...भाषाया एव सेवायां नियोजित आत्मा तेष्वेवायमन्यतमः श्रीमान्
हेमचन्द्ररायमहोदयः। एतद्विरचितं च पाण्डवविजयाख्यं "वीर-
...रसाश्रितं महाकाव्यं" समालोचनार्थमुपगतं मण्डयति नो
ग्रन्थागारम्। अत्र महाकविभारविप्रणीतकिरातार्जुनीयाभिधानस्य
काव्यरत्नस्य छायामुपजीव्य पाण्डवकृतदूतप्रेषणोपक्रमादारभ्य अभि-
मन्युशासनान्तो वृत्तान्तो द्वादशभिः सर्गैः समुपवर्णितः। अन्ते च
"अथ मर्मोद्घाटनम्" इति शीर्षकैः पद्यजालैराविष्कृतानि स्वीयमर्म-
स्थानानि ग्रन्थकारेण। न जानीमः किमित्यात्मनो दम्भस्य पैशुन्यस्य
...वीथीषु विकीर्य नीत आक्षेपकोशपात्रतां विवेकिनां महामतिना-
...नेन। शारदसुधाकरसमुज्ज्वलयशसां दासीकृतसरस्वतीकानां भवभूति-
जगन्नाथप्रभृतीनामलौकिकप्रतिभावतां कविप्रजापतीनामपि दम्भः
समुद्वेजयतितमां स्वान्तानि सहृदयानां, का कथा कवित्वाम्बुधेः कण-
मात्रं संस्पृष्टवतां ग्रन्थकारसदृशानां घटानां निर्मातॄणाम्।
दृश्यतां तावद् ग्रन्थकारस्य दम्भः स्वयमेव सहृदयैः—

निन्दन्तु मन्दाः परमत्र दूये
सन्तोऽप्यनेके यदुदासतेऽस्मिन्।

चित्रम् परि.३ : सं.सा.प.प. १३'शाब्दस्य १०म-संख्यायाम् पत्राङ्कम् ३३५





ध्वानः सुधांशावुदिते भपन्तु
शोच्या—न या जाग्रति पङ्कजाक्ष्यः ॥

क्लिष्टत्वादिविविधदोषदूषितेऽस्मिञ्श्लोके स्फोयं काव्यं सुधांशुना तत्र दोषमाविष्कुर्वाणाय स्वभिरूपमभिमानिनाविष्कृता श्लोका गगन-स्पर्धिनो स्पर्धा कविकुञ्जरेणामुना। पद्यस्यास्य चतुर्थचरणस्यार्थं कवि-रेव विजानाति न वेत्यत्र गरीयान् वर्त्तते संशयोऽस्माकम्। अपि नाम विस्मृतमनेन महाभागेन यत् क्षेमेन्द्रादिभिः स्वयमेव निरूपिताः स्वकाव्यगता दोषाः। सर्व्वथा पद्यपाठोऽयं स्मारयति भवभूतेः श्लोका-ग्रम्—"कोऽप्येष सम्प्रति नवः पुरुषावतारः" इति।

अनन्तरञ्च पद्यमिदमुपयाति दृष्टिपथम्—


विद्वत्सु ये चापि कुतोऽप्यनास्था-
स्तन्वन्ति मातङ्गनिमीलितानि ।
ते वञ्चिताः पुष्पितमेव चूतं
भृङ्गा रसज्ञाः कति न स्तुवन्ति ॥

अत्र पृच्छामस्तावत् पद्यनिर्मातारमिमम्, किमिति वा जाग्रत्-स्वेव कालिदास-भारव्यादिप्रबन्धेष्वापादचूडं तच्छायावलम्बिनि दोष-शतशबलिते दम्भपैशुन्यादिकलुषिते काव्येऽस्मिन् भावं बध्नीयुर्विद्वांसः ? न हि गगनतलमलंकुर्वति भगवति सहस्रांशौ तदीयेनैव ज्योतिषा ज्योतिष्मन्तं कलङ्किनं शशाङ्कं समाद्रियते कोऽपि। न वा तरङ्गित-सौरभस्य सहकारस्योपरि संस्थापितां पर्युषितां चूतमञ्जरीं कदापि समभिनन्दति मिलिन्दः।

आशास्महे च पुनर्मुद्रणावसरे सुदूरं समुत्सारयेत् कवयिता पैशु-न्यमात्रावबोधकौ क्लिष्टत्वादिदोषदूषितौ श्लोकावेताविति।

इदानीं काव्यस्य गुणदोषौ विचार्य्येते। तत्र गुणेषु प्रायेण प्रति-पद्यमेव समुल्लासमानोऽनुपमः प्रसादो हरति मनो वाचकस्य। सामा-न्यता भाषायाः सारल्यं कल्पनाया अक्लिष्टत्वम् अश्लीलत्वादिदोषाणा-

चित्रम् परि.४ : सं.सा.प.प. १३'शाब्दस्य १०म-संख्यायाम् पत्राङ्कम् ३३६


समालोचनम्

[१०म-संख्या] ३३७

समाधोऽन्तरान्तरा च समुपनिबद्धो मनोहरोऽर्थालङ्कारः पुष्णन्ति चारुत्वं काव्यस्य।

द्वीपेषु पुनः प्रथममेवामूलान्तमन्यच्छायोपजीवित्वं प्रतीतिपथमवतरति। तथाहि—

यः क्षयोपचयस्थानान्यात्मनश्च परस्य च।

विभज्य श्रयते बुद्ध्या षड् गुणान् स प्रियः श्रिय.॥

इति पद्यम्

वृद्धिक्षयस्थानगतामजस्र

वृत्तिं जिगीषुः प्रसमीक्षमाणः।

घटेत सन्ध्यादिषु यो गुणेषु

लक्ष्मीर्न तं मुञ्चति चञ्चलापि॥

इति सुप्रसिद्धस्य भट्टिपद्यस्य छायामुपजीवति। एवं बहुत्रैव। भारवेस्तु भावो भाषा च प्रायेणापादचूडमेवानुकृतौ ग्रन्थकारेण।

"श्रयन्त्व संश्रय्य युधिष्ठिरो यथा

सदैव कृष्ण त्वयि तिष्ठते जनः।"

इति पद्यार्धं, भारवीयं "संश्रय्य कर्णादिषु तिष्ठते यः" इति श्लोकपादं स्मारयति। "द्विषज्जनस्रोतसि दूरमग्नं" इति च "मग्नां द्विषच्छद्मनि पङ्कभूते" इति चरणस्यानुकरोति।

वैधव्यदग्धारिवधूजनास्रा·

सारैरजस्रं गलितैरिदानीम्।

तत्तन्निकारस्मरणेन्धनैर्मे

सन्धुक्षितः शाम्यतु मन्युदावः॥


इत्यपि—

ज्वलतस्तव जातवेदसः सततं वैरकृतस्य चेतसि।

विदधातु शमं शिवेतरा रिपुनारीनयनाम्बुसन्ततिः॥

५

चित्रम् परि.५ : सं.सा.प.प. १३’शाब्दस्य १०म-संख्यायाम् पत्राङ्कम् ३३७



२३८ संस्कृत-साहित्य-परिषत् [ वर्षोद्भाव

उत्सृष्टमयशःपङ्कमिच्छेयं छद्मना कृतम् ।
वैधव्यतापितारातिवनितालोचनाम्बुभिः ॥

इति भारवीयं पद्यद्वितयमनुस्मारयति ।

भारविमनुसरतानेन कविना द्वितीयसर्गे वियोगिनोच्छन्दसा समुपनिबद्धं कृष्णं प्रति द्रौपदीवचनं तेजोगन्धविवर्जितं प्राकृतनारीसुलभसानुनासिकक्रन्दनसोदरं कविकुलचूडामणेः कालिदासस्य रतिविलापमेव स्मारयति ।


वद कृष्ण कुलाङ्गना पुरा
ननु कान्याहमिवावमन्यते ।
परतो निकृताप्युपेष्यते
पतिभिः का प्रतिकारनिस्पृहैः ॥

इति पद्ये पुराशब्दस्य सार्थक्यं कविरेव जानाति । न च "स्यात् प्रबन्धे चिरातीते निकटागामिके पुरा" इत्यमरवचनाच्चिरातीते पुराशब्दः प्रयुक्त इति वक्तव्यम्, तथात्वे लट्प्रयोगानुपपत्तेः । न च "यावत्पुरानिपातयोर्लट्" इति सूत्रेण पुराशब्दयोगेऽतीते लट् इति प्रलपितव्यम्, "भविष्यति गम्यादयः" इति सूत्रात् 'भविष्यति' इत्यनुवृत्तेः सूत्रस्यास्य भविष्यत्कालविषयकत्वस्य व्याख्यातृसम्प्रदायसिद्धत्वात् । द्वितीयार्धे पतिभिरित्यत्र बहुवचनं का इत्यत्रैकवचनं चान्यासामपि नारीणां बहुपतिकत्वं द्योतयतो वैरस्यमेव जनयतो मानसेषु सहृदयानाम् ।

"दूत्यकर्मणि परस्य च स्थितेः" (३।२३) इत्यत्र दूत्येनैव दूतकर्मण उक्तत्वात् कर्मपदस्य पौनरुक्त्यं स्फुटमेव ।

विहाय लक्ष्मीं बहुमन्यसे किं
क्रुदाम्बुगर्भे वसतिं जघन्याम् ।
विनाश्य वा बन्धुयशःशरीरं
जुगुप्सितं भौतिकपिण्डमात्रम् ॥

चित्रम् परि.६ : सं.सा.प.प. १३'शाब्दस्य १०म-संख्यायाम् पत्राङ्कम् २३८



१०म-संख्या ]                    समालोचनम्                    ३३९

पद्यमिदं कालिदासस्य "पिण्डेष्वनास्था खलु भौतिकेषु" इति अवारयदपि द्वितीयार्धे क्रियाया अध्याहारस्यावश्यकत्वाद् रसप्रतीति-व्यवहितत्वात् प्रतिहन्तीव काव्यसौन्दर्यम्।

किम्भूयसोक्तेन गृहाण शस्त्रं
युध्यस्व केनापि यदृच्छया नः।
हन्यास्व यद्येकतरं हतो त्वं
जीवन् पुनर्भुङ्क्ष्व सुखेन राज्यम्॥

अत्र पद्ये तु यस्य कस्यापि निर्देशस्यावश्यकत्वेन एकतममित्येव युज्यते प्रवक्तुं न त्वेकतरमिति।

"न तद्विधेः पुत्रवधोऽपमृष्यते" (११।१८)—अपमार्ष्टेः प्रसिद्धत्वेऽपि तिङन्तस्यापमृष्यतेरतथात्वादत्र "न तद्विधेः पुत्रवधो हि मृष्यते" इति पठनीयमिति प्रतिभाति।


उपेत्य भीमः प्रथमं शरैरमुं
तथा ततक्षैव यथा सशोणितः।
वहन्नसौ पुष्पितकिंशुकश्रियं
शिलीमुखैरेनमविध्यदात्मनः॥

इत्यत्रैवकारस्य पूरणैकप्रयोजनत्वं स्फुटमेव।

"मा गाः शुचं 'किञ्च' धृतिं बधान" (१२।४५) इत्यत्र 'किन्तु' इति युक्तम्।

अवन्त्यानां वीराणामुक्तयो रणवर्णनाश्च वैदर्भ्या एव रीत्या विनिबद्धा दुर्गतगृहगता इव दीपशिखा निच्छायत्वमेव सुतरां पुष्णन्ति। न चास्य कवेस्तथाविधो वाग्विभवस्तादृशो वा प्रतिभा येन रीति-मनपेक्ष्यैवार्थप्रौढ्या रसस्याभिव्यक्तिः स्यात्। वस्तुतः कविरेतस्य वीर-रसोपवर्णने नांशतोऽपि शक्तिरस्तीत्युक्तिरपि नातिशयोक्तिकोटिमाटीकते।

चित्रम् परि.७ : सं.सा.प.प. १३'शाब्दस्य १०म-संख्यायाम् पत्राङ्कम् ३३९





यद्यप्येतस्य ग्रन्थकृतो लेशतोऽपि कवित्वशक्तिर्नास्ति तथापि पद्यनिर्मातृत्वेन ( as a mechanical versifier ) एतस्य नैपुण्य-मवश्यमेवाभ्युपगन्तव्यम्। साभिनिवेशं समनुशीलितपूर्वकविप्रबन्धोऽयं कविः—

न विद्यते यद्यपि पूर्ववासना
गुणानुबन्धि प्रतिभानमद्भुतम्।
श्रुतेन यत्नेन च वागुपासिता
ध्रुवं करोत्येव कमप्यनुग्रहम्॥

इति दण्ड्याचार्य्यवचनस्य सत्यतायां प्रकृष्टतमं निदर्शनम्।

अतिमात्रसरलभाषया संग्रथितत्वात् प्रायेण च च्युतसंस्कृतिदोष-शून्यत्वात्, विमोढ-निर्वण-व्यटोपि-प्रभृतिविचित्रपदबहुलत्वात् सर्वथा मुक्तत्वाच्चाश्लीलत्वदोषेण काव्यमिदं व्युत्पित्सूनां बालानां परमोप-कारकमपि, आमूलान्तमन्यच्छायायोनित्वाद् रसानुगुणशब्दादीना-मभावाद् निरर्थकपूरणैकप्रयोजनपदबाहुल्याच्च पदे पदे कवेः काव्य-सामग्रीदारिद्र्यस्य प्रत्यायकत्वात् समुद्वेजकत्वाकिञ्चित्करत्वं व्युत्पन्नानां पिपठिषूणामिति शिवम्।

——

चित्रम् परि.८ : सं.सा.प.प. १३'शाब्दस्य १०म-संख्यायाम् पत्राङ्कम् ३४०

# (ख)

## हेमचन्द्रस्य काव्यकृतिषु सुभाषितानि

| क्र.सं. | सुभाषितानि | का.कृ. | श्लो.सं. | स.सं. |
|---|---|---|---|---|
| क) | नूनं भानौ तपति कृशतां याति तेजः कृशानोः॥ | पर.च. | २३ | १ |
| ख) | क्रिया हि संस्कारवशान्न वंशात् ॥ | पर.च. | ४ | २ |
| ग) | ..मोहं विधत्ते प्रभुताभिमानः॥ | पर.च. | १५ | २ |
| घ) | बभार गुढां मनसि प्रतिज्ञां<br>शमीतरुर्वह्निशिखामिवान्तः।<br>आसीदशान्तः क्षमताभिलाषी<br>तेजस्विनामेष खलु स्वभावः॥ | पर.च. | १७ | २ |
| ङ) | कुतूहलं नाम रिपुर्बधूनाम् ॥ | पर.च. | ४ | ३ |
| च) | आज्ञा गुरूणां ह्यविचारणीया॥ | पर.च. | १८ | ३ |
| छ) | वीरस्य धर्म्मो न हि दस्युवृत्तिः..॥ | पर.च. | १४ | ६ |
| ज) | दत्ता भूमिर्न भोग्या..॥ | पर.च. | ४१ | १० |
| झ) | ...ननु दुस्त्यज एव धर्म्मः॥ | है.वि. | १६ | ३ |
| ञ) | वीरप्रिया न हि पुनः सुलभा जयश्रीः॥ | है.वि. | २८ | ५ |
| ट) | स्वतो हि कल्याणकरः सुहृज्जनः..॥ | पा.वि. | १३ | १ |
| ठ) | निष्किञ्चने हि भगवान् रमते स्वभक्ते..॥ | पा.वि. | ३५ | ३ |
| ड) | श्रेयो हि प्रेयसो वरम् ॥ | पा.वि. | ७ | ५ |

| | | | | |
|---|---|---|---|---|
| ढ) | संहतौ हि परा शक्तिः पृथक्त्वे तद्विपर्ययः॥ | पा.वि. | १२ | ५ |
| ण) | अकालवर्षी पर्जन्यः फलाय प्रभवेत् कथम्॥ | पा.वि. | २० | ६ |
| त) | प्रायः पुत्रवशं याता वृद्धा मुह्यन्ति तादृशाः॥ | पा.वि. | ४३ | ६ |
| थ) | अल्पोऽप्युल्वणतामेति दोषः पुंसि गुणोत्तरे ।<br>पटेऽञ्जनस्य गोविन्द शुक्ले विन्दुरपि स्फुटः॥ | पा.वि. | ६५ | ६ |
| द) | कीर्तिर्लोके ध्रुवा लक्ष्मीरकीर्तिर्हि दरिद्रता।<br>कीर्तिरेका स्थिरा ज्योत्स्ना तमिस्त्रं तद्विपर्ययः॥ | पा.वि. | ७१ | ६ |
| ध) | शिक्षाविशेषं गुणसम्पदं वा<br>नापेक्षते दैवहता जयश्रीः॥ | पा.वि. | ३९ | ९ |
| न) | यथावदाख्यानपरो हि चारः॥ | सत्य.प. | २ | १ |
| ऩ) | ...कष्टः खलु भृत्यभावः॥ | सत्य.प. | १३ | १ |
| प) | ......स्वार्थपरो हि लोकः॥ | सत्य.प. | १९ | १ |
| फ) | अनुत्तीर्णप्रतिज्ञस्य कुतः शान्तिर्मनस्विनः॥ | सत्य.प. | ४३ | २ |
| ब) | वीर्य्यातिशयः पदं श्रियः॥ | सत्य.प. | १७ | ३ |
| भ) | प्रणतस्य न भङ्गमर्हति ॥ | सत्य.प. | ३३ | ३ |
| म) | बहिरप्रकटा हि शोभते प्रणयार्त्तिः<br>कुलकन्यकाहृदि।..॥ | सत्य.प. | २४ | ४ |
| य) | द्यूतकारस्य यद्भाग्यं यौवनं यन्मृगीदृशः।<br>पुरुषस्य च यत् प्रेम तत् सर्व्वं विद्धि चञ्चलम्॥ | पति.व्र. | १० | - |

# ✠ परिशीलिता ग्रन्थानुक्रमणी ✠

## (क) हेमचन्द्ररायकविभूषणस्य मौलिकग्रन्थाः


- *परशुरामचरितम्* - कविभूषणो हेमचन्द्ररायः, हेमकुटी, पावना, १९०४ खृ. (प्रथमसंस्करणम्)।
- *पाण्डवविजयम्* - कविभूषणो हेमचन्द्ररायः, हेमकुटी, पावना, १९१६ खृ. (प्रथमसंस्करणम्), १९३० खृ. (द्वितीयसंस्करणम्)।
- *रुक्मिणीहरणम्* - कविभूषणो हेमचन्द्ररायः, हेमकुटी, पावना, १९१० खृ. (प्रथमसंस्करणम्), श्रावणमासि १३३७ वङ्गाब्दः (द्वितीयसंस्करणम्)।
- *रुक्मिणीहरणम्* - कविभूषणो हेमचन्द्ररायः, परिशिष्टम् : दशावतारस्तोत्रम्, हेमकुटी, पावना, श्रावणमासि १३३७ वङ्गाब्दः (द्वितीयसंस्करणम्)।
- *सत्यभामापरिग्रहम्* - कविभूषणो हेमचन्द्ररायः, हेमकुटी, पावना, १९१३ खृ. (प्रथमसंस्करणम्), १९३२ खृ. (द्वितीयसंस्करणम्)।
- *सत्यभामापरिग्रहम्* - कविभूषणो हेमचन्द्ररायः, परिशिष्टम् : पतिदानव्रतम्, हेमकुटी, पावना, १९३२ खृ. (द्वितीयसंस्करणम्)।
- *हैहयविजयम्* - कविभूषणो हेमचन्द्ररायः, हेमकुटी, पावना, १९०९ खृ. (प्रथमसंस्करणम्)।


## (ख) आकराः संस्कृतग्रन्थग्रामाः


- *अग्निपुराणम्* (कृष्णद्वैपायनवेदव्यासप्रणीतम्) - सम्पा. पञ्चाननतर्करत्नः, नवभारत् पावलिशार्स्, कलिकाता, १३८९ वङ्गाब्दः।

- *अभिज्ञानशकुन्तलम्* (महाकविकालिदासप्रणीतम्) - सम्पा. हरिदाससिद्धान्तवागीशः (अभिज्ञानकौमुदीटीका), सिद्धान्तविद्यालयः, कलिकाता, १८८३ शकाब्दः सौरभाद्रस्य त्रिंशत्तमदिनाङ्कः (तृतीयसंस्करणम्)।

- *अष्टाध्यायी* (पाणिनिविरचिता) - (चौखाम्बा सुरभारती ग्रन्थमाला १९) सम्पा. मम. पण्डितराज् ड.गोपाल् शास्त्री, गोपाल् दत्त् पाण्डे च ; चौखाम्बा सुर्-भारती प्रकाशन्, वाराणसी, २०१५ खृ.।

- *काव्यप्रकाशः* (मम्मटभट्टकृतः) - सम्पा. वामनाचार्यझलकिकारः (बालवोधिनीटीका), (संशोधिता) नारायणः, परिमल् पब्लिकेशन्स्, दिल्ली, १९१७ खृ.(प्रथमसंस्करणम्), २००८ खृ. (पुनर्मुद्रितसंस्करणम्)।

- *काव्यादर्शः* (श्रीदण्ड्याचार्य्यविरचितः) - सम्पा.ड.चिन्मयी चट्टोपाध्याय्, श्रीप्रेमचन्द्रतर्कवागीशकृतो मालिन्यप्रोञ्छनीटीको-पेतः, पश्चिमवङ्ग राज्य पुस्तक् पर्षत्, कलिकाता, डिसेम्बर् १९९५ खृ.(प्रथमसंस्करणम्)।

- *काव्यादर्शः* (दण्डिविरचितः) - सम्पा.ड.यमुनापाठकः,चौखाम्बा, कृष्णदास् अकादेमी, २००५ खृ.(प्रथमसंस्करणम्)।

- *काव्यालंकारः* (भामहाचार्यकृतः) - सम्पा.ड.रमणकुमारशर्मा, विद्यानिधिप्रकाशन्, दिल्ली, २००८ खृ.।

- *काव्यालंकारः* (श्रीरुद्रटाचार्यविरचितः) - श्रीनमिसाधुप्रणीतया संस्कृतटीकया समुपेतः मतीलाल् बनारसीदास्, दिल्ली, १९८३ खृ.।

- *काव्यालंकारसूत्रवृत्तिः* (वामनाचार्यकृता) - सम्पा. श्रीकृष्णसूरिः, श्रीवाणीविलास् प्रेस्, १९०९ खृ.।

- *काव्यालङ्कारसूत्रवृत्तिः* (श्रीवामनविरचिता, कामधेनुटीकोपेता) - सम्पा. पण्डीत-श्रीआशुबोधविद्याभूषणः पण्डित-श्रीनित्यबोधविद्यारत्नश्च, कलिकाता, वाचस्पत्ययन्त्रे मुद्रिता, १९२२ खृ. (तृतीयसंस्करणम्)।

- *किरातार्जुनीयम्* (महाकविश्रीभारविविरचितम्) - सम्पा. प्रकाशकश्च जीवानन्दविद्यासागरभट्टाचार्य्यः [श्रीमल्लिनाथकृतघण्टापथव्याख्यासमेतम्], कलिकाता, मुद्रितम्. सिद्धेश्वरयन्त्रे, १९०५ खृ. (षष्ठसंस्करणम्)।

- *किरातार्ज्जुनीयम्* (भारविप्रणीतम्) - सम्पा. गुरुनाथविद्यानिधिभट्टाचार्यः, संशोधको गोविन्दचन्द्र - काव्यतीर्थ - पुराणशास्त्री, जानकीनाथकाव्यतीर्थ एन्ड् ब्रस्. छात्रपुस्तकालयः, कलिकाता, १३४३ वङ्गाब्दः दोलयात्रायाम् (आवृत्तिश्चतुर्थी)।

- *गीतगोविन्दम्* (महाकविश्रीजयदेवविरचितम्) - सम्पा. नारायणराम-आचार्यकाव्यतीर्थः, निर्णयसागरमुद्रणालयम्, मुंबई, १९४९ खृ. (नवमं संस्करणम्)।

- *छन्दोमञ्जरी* (वैद्यश्रीगङ्गादाससूरिविरचिता) - सम्पा. रामतारणशिरोमणिः (मञ्जरीविवृतिटीका) कान्दी, मुर्शिदावादः, कलिकातायाम्, सरस्वतीयन्त्रे मुद्रिता, १८९१ खृ.।

- *दशरूपकम्* (श्रीधनंजयविरचितम्) - सम्पा. काशीनाथ् पाण्डुरङ्ग् परब्, (धनिककृतयावलोकाख्यया व्याखया समेतम्) निर्णयसागर् प्रेस्, मुम्बई, शाके १८१९ वत्सरे (प्रथमसंस्करणम्)।

- *दशरूपकम्* (धनञ्जयकृतम्) - सम्पा. टि. वेङ्कटाचार्यः, (दि अड्यार् लाइब्रेरि सीरीज्, भल्. ९७ ) 'दि अड्यार् लाइब्रेरि एन्ड् रिसार्च् सेन्टार्', अड्यार्,

माद्राज्, १९६९ खृ.।

- *देवीभागवतम्* (महर्षिव्यासप्रणीतम्) - सम्पा. पञ्चाननतर्करत्नः, नवभारत् पावलिशार्स्, अग्रहायणः १३८८ वङ्गाब्दः।

- *ध्वन्यालोकः* (आनन्दवर्धनकृतः) - सम्पा. ड. के. कृष्णमूर्थि, (फरोवार्डकर्ता) ड.के.आर्.श्रीनिवास् आयेङ्गार्, मोतिलाल् वनारसिदास्, दिल्ली, १९८२ खृ. (द्वितीयसंस्करणम्)।

- *नाट्यशास्त्रम्* (आचार्येण भरतेन प्रणीतम्) - सम्पा. ड.अञ्जलिका मुखोपाध्याय् संस्कृत पुस्तक् भाण्डार्, कल्काता, जानुयारी २०१८ खृ. (प्रथम् प्रकाश)।

- *नाट्यशास्त्रम् [प्रथमखण्डम्]* (भरताचार्यप्रणीतम्) - सम्पा. ड. सुरेशचन्द्रबन्द्योपाध्यायः नवपत्रप्रकाशनम्, कलिकाता, मार्च् १९८० खृ.।

- *पद्मपुराणम् [भागः१,२]* (महामुनिश्रीमद्व्यासप्रणीतम्) - [आनन्दाश्रमसंस्कृतग्रन्थावलिः ग्रन्थाङ्कः १३१] सम्पा. कै. श्री. रावसाहेबमण्डलीकेत्युपनामधारी विश्वनाथनारायणः, आनन्दाश्रममुद्रणालयम्, पुण्याख्यपत्तनम्, १८९३-९४ खृ.।

- *ब्रह्मवैवर्त्तपुराणम्* (कृष्णद्वैपायनमहर्षिश्रीवेदव्यासप्रणीतम्) - सम्पा. प्रकाशकश्च पञ्चाननतर्करत्नः, मुद्रणस्थलम्. श्रीनटवरमुद्रणयन्त्रम्, कलिकाता, शकाब्दाः १८२७।

- *बौधायनधर्मसूत्रम्* (श्रीमहर्षिबौधायनप्रणीतम्) - सम्पा. श्रीचिन्नस्वामिशास्त्री, (काशी संस्कृत सीरिज् १०४, कर्मकाण्डविभागः ११) चौखाम्बा संस्कृत् सीरिज् आफिस्, वनारस् सिटी, १९३४ खृ. (चतुर्थसंस्करणम्)।

- *भाषापरिच्छेदः* (विश्वनाथन्यायपञ्चाननकृतः) - सम्पा. ड. रवीन्द्रनाथशास्त्री संस्कृतपुस्तकभाण्डारः, कलिकाता, २००७ खृ. (द्वितीयसंस्करणम्)।
- *मत्स्यपुराणम्* (महर्षिकृष्णद्वैपायनवेदव्यासप्रणीतम्) - सम्पा. श्रीयुक्तपञ्चाननतर्करत्नः, श्रीनटवरचक्रवर्तीना मुद्रितं प्रकाशितञ्च, कलिकाता, १३१६ वङ्गाब्दः (प्रथमसंस्करणम्)।
- *महाभारतम्, आदिपर्व्व १* (महर्षिकृष्णद्वैपायनवेदव्यासप्रणीतम्) - सम्पा. हरिदाससिद्धान्तवागीशः, विश्ववाणी प्रकाशनी, कलिकाता, (प्रथम् प्रकाश) १३३८ वङ्गाब्द, १३६६ वङ्गाब्द (द्वितीय संस्करण)।
- *महाभारतम्, उद्योगपर्व्व* (महर्षिकृष्णद्वैपायनवेदव्यासप्रणीतम्) - सम्पा. हरिदाससिद्धान्तवागीशः, सिद्धान्तविद्यालयः, कलिकाता, १३४२ वङ्गाब्दः।
- *महाभारतम्, कर्णपर्व्व* (महर्षिकृष्णद्वैपायनवेदव्यासप्रणीतम्) - सम्पा. हरिदाससिद्धान्तवागीशः (भारतकौमुदीटीका), सिद्धान्तविद्यालयः, कलिकाता, १३४६ वङ्गाब्दः।
- *महाभारतम्, द्रोणपर्व्व* (महर्षिकृष्णद्वैपायनवेदव्यासप्रणीतम्) - सम्पा. हरिदाससिद्धान्तवागीशः (भारतकौमुदीटीका), सिद्धान्तविद्यालयः, कलिकाता, १३४५ वङ्गाब्दः।
- *महाभारतम्, भीष्मपर्व्व* (महर्षिकृष्णद्वैपायनवेदव्यासप्रणीतम्) - सम्पा. हरिदाससिद्धान्तवागीशः, सिद्धान्तविद्यालयः, कलिकाता, १३४३ वङ्गाब्दः।
- *महाभारतम्, शल्यपर्व्व* (महर्षिकृष्णद्वैपायनवेदव्यासप्रणीतम्) - सम्पा. हरिदाससिद्धान्तवागीशः (भारतकौमुदीटीका), सिद्धान्तविद्यालयः, कलिकाता, १३४६ वङ्गाब्दः।
- *महाभारतम्, सौप्तिकपर्व्व* (महर्षिकृष्णद्वैपायनवेदव्यासप्रणीतम्) - सम्पा. हरिदाससिद्धान्तवागीशः (भारतकौमुदीटीका), सिद्धान्तविद्यालयः, कलिकाता, १३४७ वङ्गाब्दः।

- *रघुवंशम्* (कालिदासप्रणीतम्) - सम्पा. काशीनाथ् पाण्डुरङ्ग् परब्, दि निर्णयसागर् प्रेस्, बम्बे, १८८६ खृ. (तृतीयसंस्करणम्)।

- *रामायणम्* (श्रीमन्महर्षिवाल्मीकिविरचितम्) - सम्पा. श्रीपञ्चाननतर्करत्नः, श्रीनुटविहारी-रायेण मुद्रितं प्रकाशितञ्च, कलिकाता, सन् १३११ साल्, शकाब्दाः १८२६ (तृतीयसंस्करणम्)।

- *वक्रोक्तिजीवितम्* (कुन्तककृतम्) - सम्पा. ड. के. कृष्णमूर्थि, कर्णाटकविश्वविद्यालयः, धार्वाड्, १९७७ खृ. (प्रथमसंस्करणम्)।

- *वक्रोक्तिजीवितम्* (कुन्तककृतम्) - सम्पा. श्रीसुशीलकुमार् दे, कलिकाता, १९६२ खृ. (तृतीयसंस्करणम्)।

- *वैयाकरणसिद्धान्तकौमुदी [द्वितीयो भागः]* (श्रीमद्भट्टोजिदीक्षितविरचिता) - सम्पा. गिरिधरशर्मा चतुर्वेदः, परमेश्वरानन्दशर्मा विद्याभास्करः, मोतिलाल् बनारसीदास्, दिल्ली, पुनर्मुद्रणम् २०१० खृ.।

- *शिशुपालवधम्* (श्रीदत्तकसूनुमहाकविश्रीमाघप्रणीतम्) - सम्पा. पण्डितदुर्गाप्रसादः पण्डितशिवदत्तश्च, [मल्लिनाथप्रणीतं सर्वंकषाटीकोपेतम्] निर्णयसागरयन्त्रालये, मुम्बई, १९०५ खृ. (चतुर्थसंस्करणम्)।

- *शिशुपालवधम्* (माघप्रणीतम्) - सम्पा. हरिदाससिद्धान्तवागीशः (माधुरीटिप्पनी), नकीपुर - हरिचरण - चतुष्पाठी, १८४७ शकाब्दीयसौराग्रहायणस्य प्रथमदिवसः।

- *शृङ्गारप्रकाशः [खण्डानि १ - ३]* (महाराजाधिराज-श्रीभोजदेवविरचितः) - सम्पा. प्रकाशकश्च जि. आर्. जसयेर्, मुद्रणकर्त्ता जि. एस्. जसयेर् (कोरोनेषन् मुद्रणालयः), मैसूर्, १९५५ - १९६९ खृ. (प्रथमसंस्करणम्)।

- *शृङ्गारप्रकाशः [खण्डम् ४]* (महाराजाधिराज-श्रीभोजदेवविरचितः) - सम्पा. प्रकाशकश्च जि. आर्. जसयेर्, मुद्रणकर्त्ता जि. एन्. जसयेर् (कोरोनेषन् मुद्रणालयः), इन्टारनेशानाल् आकाडेमि अफ् संस्कृत् रिसार्च्, मैसूर्, १९७५ खृ.(प्रथमसंस्करणम्)।

- *श्रीमद्भागवतम् [दशमस्कन्धे, खण्डम् ९]* (महर्षिकृष्णद्वैपायनप्रणीतम्) - अनुवादकः. प्रभुपादश्रीलराधाविनोदगोस्वामी, सम्पा.अमरप्रसादभट्टाचार्य्यः, गिरिजा लाइब्रेरि, कलिकाता, नवपरिकल्पने एप्रिल्मासि २०१५ खृ. (तृतीयसंस्करणम्)।

- *श्रीमन्महाभारतम्, शान्तिपर्व* (महर्षिकृष्णद्वैपायनवेदव्यासप्रणीतम्) - सम्पा. टी. आर्. कृष्णाचार्य्यः टी. आर्. व्यासाचार्य्यश्च, निर्णयसागर् प्रेस्, मुम्बाइ, १९०७ खृ. (प्रथमसंस्करणम्)।

- श्रीमहाभारतम्, हरिवंशपर्व (श्रीमन्महर्षिवेदव्यासप्रणीतम्) - सम्पा. रामनारायणदत्तशास्त्रीपाण्डेय, गोविन्दभवनकार्यालयम्, गीताप्रेस्, गोरखपुरम्, २०५२ विक्रमाब्दः (अष्टमसंस्करणम्)।

- *श्री श्री गीतगोविन्दम्* (जयदेवप्रणीतम्) - सम्पा. कालिप्रसन्नविद्यारत्नः, श्रीपूजारिगोस्वामीविरचितया टीकया समेतम्, कलिकाता, वसुमतीयन्त्रे, १३१५ वङ्गाब्दः।

- *स्वप्नवासवदत्तम्* (भासप्रणीतम्) - सम्पा. टि. गणपतिशास्त्री, दि त्रावाङ्कर् गभर्मेन्ट् प्रेस्, त्रिवान्द्राम्, १९१२ खृ. (प्रथमसंस्करणम्)।

- *साहित्यदर्पणः [प्रथमो भागः]* (श्रीमद्विश्वनाथकविराजप्रणीतः) - सम्पा. पण्डितश्रीकृष्णमोहनठक्कुरः, (काशीसंस्कृतसीरिजग्रन्थमाला १४५, अलङ्कारविभागः ६) परिच्छेदाः १-६, लक्ष्मीटीकोपेतः, चौखाम्बा संस्कृत् सीरिज् आफिस्, वनारस् सिटी, १९४७ खृ.(प्रथमसंस्करणम्)।

- *साहित्यदर्पणः* (श्रीमद्विश्वनाथकविराजप्रणीतः) - सम्पा. हरिदाससिद्धान्तवागीशः, (कुसुमप्रतिमाटीका), संस्कृत वुक् डिपो प्राः लिः, कलिकाता, १९८१ खृ. (पञ्चमसंस्करणम्)।


## (ग) वङ्गभाषानिबद्धा आकरग्रन्थग्रामाः


- *दाशरथि रायेर् पाँचाली* - सम्पा. श्रीहरिपद चक्रवर्ती, कलिकाता विश्वविद्यालय, १९६२ खृ. (प्रथम् संस्करण)।
- *रवीन्द्र रचनावली* - नवम् खण्ड, विश्वभारती, कलिकाता, १३४८ वङ्गाब्द (प्रथम् प्रकाश) पुनर्मुद्रण् १३५३ वङ्गाब्द ।
- *श्री श्री इतुपूजार् व्रतकथा ओ पाँचाली* - सम्पा. एस्. चक्रवर्ती, कलिकाता, वेणीमाधव् शील'स् लाइब्रेरी, २००० खृ.।
- *श्री श्री लक्ष्मीदेवीर् व्रतकथा ओ पाँचाली* - सम्पा. श्यामलाल्-कविरत्न भट्टाचार्य, कलिकाता, वेणीमाधव् शील'स् लाइब्रेरी, १९९७ खृ.।


## (घ) अर्वाचीनमौलिकसंस्कृतग्रन्थग्रामाः


- *अभिनवकाव्यालंकारसूत्रम्* - राधावल्लभत्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २००५ खृ. (प्रथमसंस्करणम्)।
- *अलङ्कारसूत्रम्* - चन्द्रकान्ततर्कालंकारभट्टाचार्य्यः, मुद्रणकर्ता. उपेन्द्रनाथचक्रवर्ती, मुद्रणस्थलम्. दि स्यान्स्कृत् प्रेस्, कलिकाता, १८९९ खृ. (प्रथमसंस्करणम्)।
- *कथा द्वादश* - तारापदभट्टाचार्य्यः, संस्कृतसाहित्यपरिषत्, कलिकाता, २००४ खृ. (प्रथमसंस्करणम्)।
- कलापिका - ड. वीरेन्द्रकुमारभट्टाचार्य्यः, (वैजयन्ती ग्रन्थमाला,

तृतीयसंख्या) संस्कृतपुस्तकभाण्डारः, कलिकाता, १९६९ खृ. (प्रथमसंस्करणम्)।

## (ङ) संस्कृतभाषानिबद्धाः सहायकग्रन्थग्रामाः


- चौधुरी, यतीन्द्रविमल. - *'वङ्गीय-दूतकाव्यसाहित्यस्य इतिहासः'.* कोलकाता : प्राच्यवाणी, फेब्रुयारि १९५३ खृ. (प्रथमसंस्करणम्)।
- शुक्ला, रमाकान्त. - *'अर्वाचीनसंस्कृतमहाकाव्यविमर्शः'.* नईदिल्ली : देववाणीपरिषत्, १९७९ खृ.।
- सेनः, शुभ्रजित्. - *'भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गमदृष्ट्या परिशीलनम्'.* कोलकाता : संस्कृत-पुस्तक-भाण्डार, जानुयारि २०१९ खृ. (प्रथमसंस्करणम्)।


## (च) आङ्गलभाषानिबद्धाः सहायकग्रन्थग्रामाः


- Bose, Subhas C. - *'The Indian Struggle 1920-1934'*. London: Wishart & Company ltd, 1935.
- Chattopadhyay, Rita. - '*Mahamahopadhyaya Haridasa Siddhanatavagisa: An Appraisal'.* Calcutta: Sanskrit Pustak Bhandar, 1989.
- Dutta, Kali Kumar. - *'Bengal's Contribution to Sanskrit Literature'.* Calcutta: Sanskrit College, 1974.
- Joshi, K. R. and S. M. Ayachit. - *'Post-Independence Sanskrit Literature'*. Nagpur: Visvabharati Prakashan, 1990, 1st Edition.
- Krishnamachariar, M. - *'History of Classical Sanskrit Literature'*. Madras: Motilal Banarsidass, 1937.
- Lahiri & Shastri. - *'पाणिनीयम्' A Higher Sanskrit Grammar And Composition*. Kolkata: The Dhaka Students Library, 6th edition, Reprint: August 2007.

- Mitra, Arati. - *'Origin and Development of Sanskrit Metrics'*. Calcutta: The Asiatic Society, 1989.
- Mukhopadhyaya, Govindagopal. - *'A NEW TRI-LINGUAL DICTIONARY SANSKRIT-BENGALI-ENGLISH'*. Kolkata: Sanskrit Book Depot, December 2008.
- Raghunathacharya, S. B. - *'Modern Sanskrit Literature: Tradition and Innovation: Seminar papers on Modern Sanskrit Literature'*. (Seminar papers on Modern Sanskrit Literature) New Delhi: Sahitya Akademi, 2002.
- Sanyal, Shukla. - *'Revolutionary Pamphlets, Propaganda and Political Culture in Colonial Bengal'*. New York: Cambridge University Press, 2014.
- Tagare, G. V. - *'THE BRAHMĀṆDA PŪRĀṆA'*. Part 1-5. Dehli: Motilal Banarasidass Publishers Private Limited, 1958-1984 1st edition.
- Williams, Monier. - *'A Sanskrit - English Dictionary'*. Oxford: The Clarendon Press, 1899 1st edition; Reprint. Oxford: The University Press, 1950, 1960.


## (छ) वङ्गभाषानिबद्धाः सहायकग्रन्थग्रामाः


- चक्रवर्ती, सञ्चिता. भट्टाचार्य, अमल् कुमार्.च - *'आधुनिक् संस्कृतसाहित्येर् रूपरेखा'*. कोल्काता : एम्. एल्. दे एण्ड् कों, एप्रिल् २०१३ खृ.(प्रथम् प्रकाश)।
- चट्टोपाध्याय्, ऋता. - *'आधुनिक् संस्कृतसाहित्य (१९१०-२०१०) छोटगल्प ओ नाटक्'*. कोल्काता : प्रग्रेसिभ् पावलिशार्स्, एप्रिल् २०१२ खृ.(प्रथम् संस्करण)।
- दाश्गुप्त, सुधीर् कुमार्. - *'काव्यालोक्' (प्रथम् खण्ड)*. कलिकाता : वीणा लाइब्रेरि, कार्त्तिक् १३५३ व.(प्रथम् संस्करण)।
- दाश्गुप्त, सुधीर् कुमार्. - *'काव्य-श्री'*. कलिकाता : वीणा लाइब्रेरि, आषाढ १३५६ व.(प्रथम् संस्करण)।
- दास्, करुणासिन्धु. - *'संस्कृत साहित्येर् इतिहास्'*. कोल्काता :

पश्चिमवङ्ग वांला आकादेमि, मार्च् २००८ खृ. (प्रथम् संस्करण)।

- बन्द्योपाध्याय्, धीरेन्द्रनाथ. - *'संस्कृत साहित्येर् इतिहास्'*. कोल्काता : पश्चिमवङ्गराज्यपुस्तकपर्षत्, आगष्ट् २००९ खृ. (द्वितीय संस्करणेर् तृतीय मुद्रण)।

- बन्द्योपाध्याय्, सुरेशचन्द्र. - *'संस्कृत साहित्ये बाङालीर् दान्'*. कलिकाता : संस्कृत पुस्तक् भाण्डार्, १९६३ खृ.।

- भट्टाचार्य, अमल् कुमार्. चक्रवर्ती, सञ्चिता.च - *'आधुनिक् संस्कृतसाहित्येर् रूपरेखा'*. कोल्काता : एम्. एल्. दे एण्ड् कों., एप्रिल् २०१३ खृ. (प्रथम् संस्करण)।

- भट्टाचार्य, हेमचन्द्र. - *'वङ्गीय महामहोपाध्याय् जीवनी'*. कलिकाता : प्रगति प्रकाशनी, पौष्, वङ्गाब्द १३७९ (प्रथम् संस्करण)।

- भट्टाचार्य, हेमचन्द्र. - *'वङ्गीय संस्कृत अध्यापक् जीवनी'*. कलिकाता : वङ्गाब्द १३८३ (प्रथम् संस्करण)।

- मूखार्जी, अञ्जलिका. - *'संस्कृत काव्यचर्चाय् बाङाली : सेकाल् ओ एकाल्'*. कोल्काता : संस्कृत पुस्तक् भाण्डार्, २०१३ खृ. (प्रथम् संस्करण)।

- मुखोपाध्याय्, रमारञ्जन्. - *'रससमीक्षा'*. कल्काता : संस्कृत पुस्तक् भाण्डार्, आश्विन् १३६८ व.(प्रथम् संस्करण), आश्विन् १३८४ व.(द्वितीय संस्करण)।

- राय्, मृदुला. - *'संस्कृत वाङ्मये प्रतिभा'*. शान्तिनिकेतन् : स्वागतम्, आगस्ट् २००२खृ. (प्रथम् प्रकाश)।

- साहा, अणिमा. - *'संस्कृत अलङ्कारशास्त्रे दोष्तत्त्व'*.(Calcutta Sanskrit College Research Series No. LXXXVI) क्याल्काट्टा : संस्कृत कलेज्, १९७३ खृ.।

## (ज) हिन्दीभाषानिबद्धाः सहायकग्रन्थग्रामाः


- त्रिपाठी, राधावल्लभ. - *'संस्कृतसाहित्य : बीसवीं शताब्दी'*. दिल्ली : राष्ट्रीयसंस्कृतसंस्थान, १९९९ खृ.।


## (झ) सहायभूताः शोधप्रबन्धाः

### संस्कृतभाषानिबद्धाः


- आचार्यः, सीतानाथः. - *'संस्कृतसाहित्ये वङ्गीयानामवदानम् विंशशताब्द्याः परिप्रेक्षे'*. (Proceedings of the National Seminar on 'Contribution of Bengal in some fields of Sanskrit Studies') Belurmath: Department of Sanskrit, Ramakrishna Mission Vidyamandira, 2008.
- सेनः, शुभ्रजित्. - *'अर्वाचीनसंस्कृतवाङ्मये कवित्रयम्'*. (पि एइच्. डि. इत्युपाधिलाभाय प्रदत्तः शोधप्रबन्धः) यादवपुरविश्वविद्यालयः।


### आङ्गलभाषानिबद्धाः


- Gourley, William. - *'CONCEPTUALISING THE INRERFACE BETWEEN ENGLISH FURTHER AND HIGHER'*. (A thesis submitted for the Degree of Doctor of Philosophy) The University of Sheffield, October 2009.
- Guikema, Wynn Janice. - *'SCANNING HALL PROBE MICROSCOPY OF MAGNETIC VORTICES IN VERY UNDERDOPED YTTRIUM-BARIUM-COPPER-OXIDE'*. (A dissertation submitted for the Degree of Doctor of Philosophy) Stanford University, March 2004.
- Hazra, R. C. - *'Studies in the Purāṇic Records on Hindu Rites and Customs'*. (A thesis approved for the Degree of Doctor of Philosophy in the University of Dacca, 1936) Dacca: The University of Dacca, April 1940.

- Lahiri, P. C. - *'Concepts of Rīti Guṇa in Sanskrit Poetics in their Historical Development'*. (A thesis approved for the Ph. d. degree of the University of Dacca) Ramna, Dacca: The University of Dacca, 1937.

- Mukhopadhyay, Anjalika - *'ĀYURVEDA IN CLASSICAL SANSKRIT LITERATURE'*. Calcutta: Papyrus, December 2004.


## (ञ) सहायकाः शोधपत्रिकाः


- *संस्कृतसाहित्यपरिषत्पत्रिका* (त्रयोदशवर्षस्य, १०म-संख्या) - सम्पा. श्रीक्षितीशचन्द्रचट्टोपाध्यायः, सह-सम्पादकौ. श्रीदक्षिणारञ्जनशास्त्री एम् - ए, श्रीउपेन्द्रमोहनसाङ्ख्यतीर्थश्च, कलिकाता, संस्कृत-साहित्य-परिषत्, १९३०-३१ खृ.।

- *संस्कृतसाहित्यपरिषत्पत्रिका* (५६तमवर्षस्य ७म - ८म-संख्ये) - 'महामहोपाध्यायकालीपदतर्काचार्य्यस्मृतिः' सम्पा. अध्यापकः श्रीरामधनशास्त्री, सह-सम्पादकौ. अध्यापकः श्रीदीननाथत्रिपाठी-नवतीर्थः, अध्यापकः श्रीरवीन्द्रकुमारसिद्धान्तशास्त्री-पञ्चतीर्थश्च, कलिकाता, संस्कृत-साहित्य-परिषत्, १९७३ खृ. (नभेम्बर्-डिसेम्बर्)।

- *अन्वीक्षा* (संख्या ३८) - 'भवानीप्रसादभट्टाचार्य्यस्मृतिः' सम्पा. अध्यापकः तपनशङ्करभट्टाचार्य्यः, कोल्काता, यादवपुरविश्वविद्यालयस्य संस्कृतविभागः, मार्च् २०१७ खृ.।

## (ट) सहायभूताः अन्तर्जालसंकेताः


- http://www.archive.org/
- https://www.azquotes.com/author/17743-Carl_Schimtt
- https://en.m.wikipedia.org/wiki/List_of_wars_involving_India
- https://www.sheffield.ac.uk/polopoly_fs/1.97778!/file/Gourley-William-PHD-Thesis.pdf
- http://www.stanford.edu/JWG-Thesis.pdf


*******************